End: अथोपकाले यथेष्टं यूथं पर्यटेति ॥ अथ वृषवत्सतरीणामलंकारं वाससी-चार्याय प्रयच्छेद्गां च अथ यज्जीवन् वृषोश्नाति पिबति प्रजनयत्यंगानि धुनोति तेन देवान्पितॄन् ऋषी ऋश्च प्रीणातीतिह स्माह कात्यायनः कात्यायनः ॥ ॥ श्लोक । २३ ॥ इति **परिशिष्टं** समाप्तं ॥ संवत् १७१४ वर्षे पुरु० ६ रवौ ॥ **श्रीमालीयज्ञातीयव्या० सनासुतव्या० खोखलासुतव्या० कोगोलसुगदाधरेण०.**

२९७.

४४५०. **पारस्करगृह्यसूत्र**व्याख्या **पारस्करमत्रभाष्यम् । मुरारिमिश्रः.**

PÂRASKARAMANTRABHÂSHYA, by MURÂRIMIS'RA.

Beginning: ६ ॐ स्वस्ति आचार्येभ्यो नमः ॥

प्रणम्य पूर्व्वं पुरुषं पुराणं तथैव **कात्यायन**पादपद्मं ।
तनोति **पारस्करमंत्रभाष्यं मुरारिमिश्रः** पितृ (v. l. प्रति)गृह्यभाष्यान्[त्] ।
गृह्यप्रकाशाभिधभाष्यगर्भाच्छ्री**वेदमिश्रै**र्विधिवत्प्रणीतात् ।
आकृष्य वंधुं विदधामि मंत्रे **मुरारिमिश्रः** श्रुतितो विविच्य ॥

त्वन्नो अग्न इत्यादि ॥ तत्वा त्वन्न इति द्वे अग्निवारुण्यौ । अग्नीवरुणयोः स्विष्टकृते याज्यानुवाक्ये त्रिष्टुभौ । हे । अग्ने । त्वन्नो अस्मान् । प्रतिजानानः । देवस्य हेडः क्रोधं अवयासिसीष्ठ्याः ।

Fol. 39: **श्रीमद्दीक्षितविश्वरूप**तनयः **श्रीवेदमिश्रः** श्रियो नाथं कायमनोगिरा धन्वगेमयिरा(!)राध्य कामप्रदं ।
हेरंवं च शिवं शिवं च सततं नत्वा विरिंचिं रविं । मंत्रार्थं विवृणोमि **गृह्य**विषये श्रद्धासमृद्ध्यै सतां ।
द्वितीयकांडस्य विविच्य भाष्यात् । **श्रीवेदमिश्रै**र्विधिवत्प्रयुक्तात्
प्रारभ्यते **मंत्रविभागभाष्यं मुरारिमिश्रेण** समाससारं ।

Fol. 57: इति **श्रीवेदमिश्र**प्रणीत**प्रकाशाख्या त्रुह्य[दृह्य]भाष्यादुद्धृत्य** तत्सुत**मुरारिमिश्र**कृतं **द्वितीयकांडमंत्रभाष्यं** समाप्तं ॥ ॥

पारस्करीयसूत्रस्य मंत्रभाष्ये समासतः । **द्वितीयकांडो** व्यपगमद्वेद**मिश्रसुतो**द्धृते ।
कात्यायनाय नमः ॥

तृतीयकांडमंत्रार्थः पदवाक्याभिधानतः । विविच्यते **वेदमिश्रै**र्नानाभाष्यानुसारतः ।

End: इति **श्रीवेदमिश्र**प्रणीत**गृह्यप्रकाशभाष्या**दाकृष्य **मंत्रभाष्यं** पृथक्कृत्य तृतीयकांडस्य **मुरारिमिश्रः** समाप्तिमनयत् ॥ ॥ संवत् १४३० समये ॥ अश्विनशुक्लपंचम्यां सौम्यवासरे ॥ श्री **चंडीपुरे** ॥ ॥ मं * ॥ **उपाध्यायश्रीशिवशर्म्मेण प्रयागदासाय** स्वपुस्तकात्समुद्धृत्य लिखापितम् ॥ कायस्थ**श्रीलाहडेन** लिखितं ॥ ॥ शुभमस्तु ॥ लेखकपाठकयोः ॥ श्रीरामाय नमः ॥ मंगलं वः ॥

३२६.

२६७५. ख. **मन्त्रभाष्यम्** । सोमानन्दसूनुः.

MANTRABHÂSHYA, by the son of SOMÂNANDA of VIJAYES'VARA.

Beginning: ॐ शारिकाभगवत्यै नमः

ॐ नमस्कारो नमस्कर्यो नमस्कर्ता न यत्पृथक् । नमात्मानं नमाम्येवं नित्यनेवाहमात्मना १

विजयेश्वरवास्तव्यसोमानंदस्य सूनुना **मंत्रभाष्यमिदं** कॢप्तं पदवाक्यैः सुनिश्चितैः २

उपनयनप्रभृति ब्रह्मचारी स्याः १ उपनयनं शिष्यसंबंधिचित्तस्य ब्रह्मात्मकगुरुकर्तृकं स्वसमीपप्रापणं स्वचित्तेन संयोजनं यत्पूर्वमेवोक्तं मम व्रते हृदयं ते ददामि । मम चित्तं अनुचित्तं ते अस्तु इत्यादि तदादिव्रतचारी ब्रह्मचारिणो ब्रह्मस्वरूपगुरुसमीपप्राप्तिः गुरुरूपेण स्थितिश्च मुख्यं व्रतं वर्तनं स्थितिरिति यावत्.

End: एकतमो वा भुंजीथाः ७९ एकं ब्रह्मैव सन्भुंजीथाः ब्रह्मज्ञानेन ब्रह्मैव भवन्सकलं कर्म कुर्या इति शिवं अत्र स्फुटस्य बाह्यार्थस्य त्रैवर्णिकावश्योपेयस्याचार्यांतरैर्व्याख्यातत्वेपि कुशकाशावलंबनेनाभ्यंतरार्थकथनं रुद्धिति प्रथमाश्रम एव तत्वज्ञानजननार्थं यदि ब्रह्मचारिदशायामेव कचिदायातशक्तिपातस्य विवेकवैराग्यादिनिष्ठिता भवेत्तर्हि कं प्रयोजनामाश्रमान्तुरालंबने क्लेशेन यदहरेव विरजेत्तदहरेव प्रव्रजेत् इति श्रुतेः तत्क्षंतव्यमतिगहनकर्ममार्गप्रवर्तकैर्गुरुभिः ७९.

३५९–३६१.

४४४१. क. ख. ग. **शाङ्खायनश्रौतसूत्रभाष्यम्** । आनर्तीयो दासशर्मा च.

S'ÂÑKHÂYANAS'RAUTASÛTRABHÂSHYA, by ÂNARTÎYA and DÂSAS'ARMAN.

The above three MSS. contain portions of the same commentary on the *Sâñkhâyanas'rautasûtra* which is found in the MSS. of the Berlin Royal Library described by Professor Weber (W. p. 27 sq.) and in the MSS. collated by Professor A. Hillebrandt for his edition of the work in the "Bibliotheca Indica" (see notes Vol. i, pp. viii; 241 sqq.).

From the remark in the verse prefixed in the Berlin MS. No. 107 (Chambers 449+646) to Adhyâyas ix.—xi. it appears that the commentary on these Adhyâyas had been revised by *Dâsas'arman,* son of *Muñja.* Similar verses are found in the Jammu MSS. at the end of the x. and xi. Adhyâyas (see below).

४४४१. क.

This copy, dated Saṁvat 1534, is well written and bears signs of careful correction. It contains the complete text of Adhyâyas ix.–xvi. The xi. Adhyâya closes fol. 249 with the above mentioned verse: **शांखायनसूत्रभाष्ये** एकादशोध्यायः । भाष्यकारगिरां यत्र विनष्टं लेखकादिना । अक्षरं **तद्दासशर्मा मुंज**सूनुरकल्पयत्. After the conclusion of the xiv. Adhyâya the same note is inserted as in the Berlin MS: इति शांखायनसूत्रभाष्ये चतुर्दशोऽध्यायः । अत्राध्याये किंचित्सूत्रं किंचित्खंडछंडितं तत्स्वमनीषिकया पूरितमस्ति ससंप्रदायैर्विमृश्य प्रचारणीयं । इति । मंगलं महाश्रीः ॥

In the commentary on xi. 13. 1, a passage in which Prof. Hillebrandt (Vol. i. p. 242 sq.) has noted a material discrepancy of his MSS., this copy agrees with the text of the Berlin MS.

The colophon at the end of the xvi. Adhyâya reads:

इति श्रीशांखायनसूत्रभाष्ये षोडशोध्यायः समाप्तः ॥ । मंगलं महाश्रीः ॥ शुभं भूयात् । संवत् १५३४ वर्षे वैशाखशुदि ८ शुक्रे--वृद्धनगरे चंद्रिया गोत्रे उपाध्याय------------लिखत् । इति ।

उदकानलचौरेभ्यो मूषकेभ्यस्तथैव च रक्षणीयं प्रयत्नेन यत्नेन परिपालयेत् । १

अपरं च

आदर्शदोषान्मतिविभ्रमाद्वा यदर्थहीनं लिखितं मयाशु ।
यदार्यवर्यैः परिशोधनीयं प्रायेण मुह्यंति हि लेखितारः ।

मंगलं महाश्रीः । शुभं भवतु लेकपाठयोः ॥ इति ।

४४४१. ख.

This MS. contains Adhyâyas ix.—xvi. down to the middle of the last Sûtra of the xvi. Adhy. (fol. 250). The last leaf is lost. No date is shown at the conclusion of the previous Adhyâyas. The writing appears not much younger than in the preceding MS.

The verse mentioning the revision of the text by Dâsas'arman is found after the x. and xi. Adhyâyas, with slight variations, *viz.*:

Fol. 63 (Adhy. x.): भाष्यकारकृतं यत्र विनष्टं लेखनादिना । अक्षरं तद्दाशशर्मा मुंजसूनुरकल्पयत् ॥

Fol. 79 (Adhy. xi.): साध्याहारमिदं यत्र विनष्टं लेखनादिना । अक्षरं०.

After the xiv. Adhyâya the same note is found as in ४४४१. क. In xv. 13.1 the text of the commentary is different from that in the preceding copy, but agrees with that of Prof. Hillebrandt's MS. *M M.*

४४४१. ग.

This copy begins on fol. 1 with xiii. 15 and breaks off (fol. 48) in the commentary on xv. 17. The leaf numbered 49 contains the comments on xiv. 1—3, previously found on fol. 11. The writing is old.

The note at the end of the xiv. Adhyâya is found also here. In the passage xv. 13.1 this MS. shows a text which seems a combination of readings from the texts in Prof. Hillebrandt's *CH.* and *M. M.* (क. and ख. above). It runs:

Fol. 45: सह सोमौ क्रीणंति । एककालं सोमौ क्रीणंति । नैतस्य क्रीतस्य विभागः । ७ ॥ दशपेयस्य च । दशपेयस्य चाभिषेचनीयस्य चेति च शब्दात् । तंत्रमातिथ्यापर्यंतमूर्ध्वंत्वा (!) वभृथात् । उभयोरेकमेव ॥ ७ ॥

३६२.

५०७८. शाङ्खायनश्रौतसूत्रव्याख्या शाङ्खायनसूत्रपद्धतिः । नारायणः.

S'ÂÑKHÂYANASÛTRAPADDHATI, an exposition of the SÂÑKHÂYANAS'RAUTASÛTRA, by NÂRÂYAṆA.

Fol. 2: अनधिकारः । विकारत्वात् केन निषिद्धो अधिकार इति चेत् । श्रुत्यैव भग---यज्ञियान्वा एतद्यज्ञेन प्रयजंति

शूद्रास्त्वयांस्त्वदिति **शतपथे** । तथा च **बौद्धायनः** । निष्ठमयंति वृषलानिति । वैश्यस च यः माहिष्येण करिण्यां रथकार उत्पद्यते तस्य वचनादधिकारः प्राप्नोति ।

Fol. 17: इति **शांखायनसूत्रे** **कौषीतकिमतानुकूलोपदेशोद्भवेनाष्टाक्षराविं[भि]धानेन** विरचितायां पद्धतौ प्रथमोध्यायः समाप्तः ॥ ॥ छ ॥

Fol. 32: इति **श्रीशांखायनसूत्रपद्धतौ** **कौषीतकिमतानुरक्तमलयदेशोद्भवाष्टाक्षरानि[भि]धान**विरचितायां द्वितीयोध्यायः ॥ ॥ समाप्तः ॥ ॥

Similar colophon at the end of Adhyâya iii. (fol. 64).

Fol: 99: इति **शांखांयनसूत्र**विरंजनपद्धतिः प्रकारेण यावत्सामर्थ्यं शोध्य लिखितमस्माभिः । पुनरपि विद्वद्भिः शोधनीयं ॥ ॥ इति चतुर्थोध्यायः समाप्तः ॥ ॥ छ ॥

कौषीतकिं प्रणम्यादौ शंकरं पद्मजोद्भवं । शंखचक्रधरं चापि **शांखायनमुनिं** प्रभुं ।
ब्रह्मदत्तमतं पूर्वं संप्रदायः पुरःसरः । श्रुत्वा **नारायणाख्येन** पद्धतिः कथ्यते स्फुटं ॥ ॥

Fol. 124: **नारायणभट्ट**विरचितायां **शांखायनसूत्रपद्धतौ** षष्ठोध्यायः ॥ ॥ छ ॥
नारायणेनामवता **शिवपुरग्रामजन्मना** त्वे[त]त् । आर्जितमूर्जितगंगाभः पिबता विमुक्तभक्तियुक्तेन ।

Similar Colophon at the conclusion of Adhyâya vii. (fol. 143).

इति **श्रीनारायणेन काश्यपेन पशुपतिशर्मणः** सोमयाजिनः पुत्रेण **मलयदेशोद्भवेन** संप्रदायस्थापनैषणा विरचितेयं **शांखायनसूत्रपद्धतिरग्निष्टोमस्य** समाप्तः ॥ ॥ छ ॥
नारायणनामवता शिवपुरग्रामजन्मना छेत्तत् (sic) मूर्ज्झितगंगांभः पिबता त्वविमुक्तेन
अभ्यासादमृतोपमश्च सुतरा नारायणायेत्ययं मंत्रो यंत्रितबुद्धिपूर्वमनसा यनादेरणञ्च (!) ह ।
तीर्थवनवचसिंधुसंगसारिस्थानेषु वाधीयते विष्णु संस्मरता दिवाकरगतां तस्यैव मुक्तिः परा ॥ ॥ छ ॥

End: इति **श्रीशांखायनसूत्रपद्धतिनवमोध्यायः** ॥ ॥ —— छ ॥ समाप्त ॥ श्रीरस्तु ॥ ॥ शुभमस्तु ॥ ॥ कल्याणमस्तु ॥ ॥ दीर्घायुर्भव ॥ ॥ जयोस्तु ॥ ॥ – संवत् १६९१ वर्षे फाल्गुनशुदि ५ बुधे लिखितं **गोपीनाथेन** ॥ ॥ **श्रीविश्वेश्वरराजधान्यां वारणस्यां** लिषितमस्ति ॥ लेखकपाठयोर्जयोस्तु ॥ ॥ श्रीगंगायै नमः ॥ ॥ श्रीभैरवाय नमः ॥ ॥

३७८.

६८७. श्रौतप्रायश्चित्तप्रयोगरत्नमाला । विश्वंभरदीक्षितः.

S'RAUTAPRÂYAS'CHITTAPRAYOGARATNAMÂLÂ, by VIS'VAMBHARA DÎKSHITA.

Beginning: श्रीमन्महागणपतये नमः ॥ श्रीकृष्णप्रमुखसकलदेवताभ्यो नमः ।

विश्वेशं माधवं सूर्यं गणेशं जगदंबिकां । अग्निं च भैरवं ध्यात्वा नत्वा च पितरौ गुरून्
अश्वलायनसूत्रं च तद्भाष्याणि तथैव च तद्वृत्तिं च प्रयोगांश्च ग्रंथानन्यान्यथोदितान् ।
यानि **बौधायनोक्तानि** सूत्राणि विविधानि च । तद्भाष्याणि प्रयोगांश्च प्रदीपादीन्यथामति ॥
सूत्रांतराणि चालोच्य यत्नतः स्वहिताय वै । **प्रयोगरत्नमालेयं प्रायश्चित्तस्य** मथ्यते ॥

Fol. 18: इति श्रीमद्द्रविडरामचंद्रदीक्षितप्रसादाद्वैराजक्षेत्रापरनामवांपिक्षेत्रवासिथिटे इत्युपनामपुरेश्वरात्मजविश्वंभर-दीक्षितग्रथिताया श्रौतप्रायश्चित्तप्रयोगरत्नमालायामुपोद्घातप्रकरणं समाप्तं ॥

Fol. 84: इति श्रीमद्द्रविडरामचंद्रदीत॰ विश्वंभरदीक्षितग्रथितायां श्रौतप्रायश्चित्तप्रयोगरत्नमालायां हविर्वैगुण्यप्रायश्चित्तानि॥

Fol. 151. The Ms. breaks off with:

तत्र प्रदीपः ॥ स्तोत्रे शस्त्रेंतरिते विस्मृते वा मिंदाहुती हुत्वा पुनरुपाकुर्यात् ॥ उद्गातारो यद्येकास्तोत्रीयामुत्सृजेयुर्मिंदाहुती-हुती हुत्वोत्सृष्टां विस्मृतां जपेयुः ॥ होत्रादयः शस्त्रेषुक्तामृचमर्धर्चे वोत्सृज्येरन् मिंदा----.

३८०.

५२१०. संध्यामन्त्रव्याख्या ब्रह्मप्रकाशिका । वनमालिमिश्रः.

BRAHMAPRAKÂS'IKÂ, a commentary on the SAṀDHYÂMANTRAS, by VANAMÂLIMIS'RA.

Beginning: ॐ श्रीगणेशाय नमः

ॐ महेश्वरं नमस्कृत्य वनमाली महेशजः करोति संध्यामंत्राणां व्याख्यां ब्रह्मप्रकाशिकां

सम्यग्ध्यायते ब्रह्मादिभिरुपास्यते कालत्रये प्रणवादिभिर्मंत्रैर्या सूर्यमंडलाधिष्ठात्री परमात्मस्वरूपा देवता सा संध्या ध्यै चिंताया-मित्यस्य धातोरातश्चोपसर्गे इति कर्मण्यङ्प्रत्ययः तत्र योगी याज्ञवल्क्यः

ब्रह्मणोपासिता संध्या विष्णुना शंकरेण च कस्तां नोपासयेद्देवीं सिद्धिकामो द्विजोत्तमः

End: भट्टोजिदीक्षितन्नत्वा कृत्वा ब्रह्मप्रकाशिका व्याख्येयं संध्यामंत्राणां मिश्रेण वनमालिना

वेदार्थज्ञाने न शक्ता विप्रा वेदार्थवादिना । मध्याख्येयं समालोक्य दृढता क्षम्यता मम ॥

इति श्रीभट्टोजिदीक्षितशिष्यकुरुक्षेत्रनिवासिमहेशमिश्रात्मजवनमालिमिश्रविरचितायां संध्यामंत्रव्याख्या ब्रह्मप्रकाशिका समाप्ता ॐ शुभं हरि ॐ ॥

३८१.

२२८६. संध्यावन्दनभाष्यम् । व्यासः.

SAṀDHYÂVANDANABHÂSHYA, by VYÂSA.

Beginning: ॥ ॐ श्रीमते रामानुजाय नमः

लक्ष्मीलक्ष्मीसपादाभ्यामियमस्तु नमस्क्रिया । श्रुतिस्मृत्युदितं कर्म यदाराधनसाधनं १

वरदश्रीनृसिंहार्य्यस्योपदेशवलोदितां । संध्यावंदनमंत्राणां विदधे वृत्तिमन्वितां २

सिद्धमिह देवतिर्य्यङ्मनुष्यस्थावरस्थानामात्मनां भगवन्नित्यनियाम्यभगवद्धार्य्यभगवच्छेषभूततया भगवत्प्रकारत्वाद्भगवतश्च तत्प्र-तिसंबंधितया तन्नियामकतद्धारणतच्छेषितया तत्प्रकारित्वादाकृतिवाचिनां शब्दानामपर्य्यवसानवृत्या भगवत्पर्य्यंतस्वार्थाभिधायि-त्वात्प्रमेयस्य शब्दैकगोचरत्वेन शब्दस्य विशेषणविशेष्यभावसामानाधिकरण्यमुखेन गमकत्वव्यवस्थापनात् आत्मपरमात्मनोश्श-रीरशरीरिभावेन तादात्म्यं.

End: हारीतान्वयदीपेन व्यासनाम्ना विपश्चिता । मंत्रभाष्यमिदं शुद्धं निखिलं निरणीयतत् (!) ॥

इति श्रीसंध्यावंदनभाष्यं समाप्तं शुभं भवतु.

३८६.

५२२१. सोमप्रयोग आपस्तम्बश्रौतसूत्रानुसारी.

SOMAPRAYOGA, according to the ÂPASTAMBAS'RAUTASÛTRA.

Beginning: श्रीमहागणाधिपतये नमः ॥ ॥ अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य संकल्पं करोति ॥ उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं विछिन्नसोमपीथसंधानार्थमैंद्राग्नं पशुं दौर्ब्राह्मण्यनिवृत्यर्थमाश्विनं च पशुमग्नीषोमीयेण पशुना सहोपालंभ्यौ कुर्वन् सोमेन यक्ष्ये ॥

End: चित्तिस्रुक् अस्मासु नम्णधात्स्वाहा । वाचस्पतये ब्रह्मण इदं० । तमग्निं परित्यज्य । सायमग्नि होष्यामि ॥ काले प्रातर्होमः ॥ संतिष्ठते — ज्योतिष्टोमोग्निष्टोमः सोमः ॥ ॥

On the back of the last leaf is written: श्रीसोमाध्वर्युप्रयोगः समाप्तः.

६७८.

२४१४. ञ. द्वितीयोपनिषद्दीपिका । नारायणः.

DVITÎYOPANISHADDÎPIKÂ, by NÂRÂYAṆA.

Beginning: [Text.] स होवाच प्रजापतिरग्निर्वै वेदा इदं सर्वं विश्वानि भूतानि विराट् स्वराट् सम्राट् तस्मान्नः प्रथमं पादं जानीयात् ॥

[Commentary.] षट्सु पदेष्वंगेषु देवता आह अग्न्यादयो विशिष्टाः क्रमेणांगदेवता इत्यर्थः विराडादिग्रहणं राजोप्युपलक्षणं राट् विराट् स्वराट् सम्राट् पूर्वोयाश्चतस्रो दिशः ऋगिति वेदचतुष्टयरूपता सूर्यस्य सर्ववेदप्रसिद्धा प्रभवति प्रभुर्भवति यो हरिः स इत्युद्देश्यविभक्तिलिंगवत्पर्यायेण ज्ञेया परं ब्रह्मैव भवतीत्युपासनस्य मुक्तिः फलमित्यर्थः.

End: [Text.] उच्चाटयेद्विभीतकैश्च मारयेद्विषवृक्षजैः वश्याय पंकजैर्विद्याद्धनार्थी मोदकैर्हुनेत्

एवं ज्ञात्वा कृतकर्मा भवति कृतकर्मा भवति इति द्वितीयोपनिषत् ॥ ॥

[Commentary.] य एतेनेति उभयोः शुक्लकृष्णयोः अपूपानां पिष्टमयानां पृथुकान् भ्रष्टव्रीहितंडलान् विभीतकैर्विभीतकफलैः विषवृक्षजैः कारस्करसंभूतैः पंकजैः कमलैः कृतकर्म साधितकार्यः द्विरुक्ति समाप्त्यर्था इति द्वितीयोपनिषद्दीपिका ॥

७८६.

५२५१. छन्दःपरिशिष्टम्.

CHHANDAḤPARIS'ISHṬA.

Beginning: ॥ श्रीगणेशाय नमः ॥ अथातः छंदसां विचयं व्याख्याम्मो[स्यामो] गायत्र्युष्णिगनुष्टुप् बृहती पंक्तिस्त्रिष्टुप् जगतीति सप्तार्षाण्येकाक्षरपदादीनि चतुरक्षराधिकानि प्रतिछंदसं ॥ गायत्र्यादीनामुक्तानिरवसानं छंदसामार्षं लौकिकं च ॥ चतुर्विंशत्यक्षरा गायत्री ।

End: ब्राह्मणान्सांडिनश्चैव **पिंगलाच्च** महात्मनः । निदानाद्गुछशास्त्राच्च छंदसा ज्ञानमुद्धृतं । १ ।
यस्माच्च छादिता देवाः छंदोभिर्मृत्युभीरवः । छंदसां तेन छंदस्त्वं ख्यायते वेदवादिभिः ॥ २ ॥
यथा छंदोभिराच्छन्ना देवान्मत्सानिवोदके । न ह्यपश्यत्पुरा मृत्युरमृतत्वं ततो गताः ॥ ३ ॥
छंदो विवेद विप्रस्तु धर्मस्तद्गुणान्वितः । छंदसामेति सालोक्यममृतत्वं च गछति

इत्याह भगवान् **गर्ग्यो गार्ग्यः** ॥ इति छंदनाम **परिशिष्टं** समाप्तं ॥ संवत् १७६० वर्षे मार्गशीर्षकृष्ण ३ सोमे आभ्यंतर-नागरीज्ञातीयंत्र । **परमानंद**सुतत्र । **सोमनाथ**सुतत्र । **मूलराम**सुतत्र । **उदयरामेण** लिखितं सदाशिवार्पणमस्तु सर्वे.

८१९.

२४. आख्यातचन्द्रिका । सूरिसिंहः.

ÂKHYÂTACHANDRIKÂ by SÛRISIMHA.

Beginning: श्रीगणेशाय नमः ॥ अथाख्यातप्रक्रिया निरूप्यते ॥ धातोः ॥ वक्ष्यमानाः प्रत्यया धातोर्ज्ञेयाः ॥ भ्वादिः ॥
भू सत्तायामित्यादिशब्दो धातुसंज्ञो भवति ॥ धातुत्वात्तिवादयः ॥ स च त्रिविधः ॥ आत्मनेपदी परस्मैपदी उभयपदी चेति ॥ आदनुदात्तङितः ॥ अनुदात्तेतो ङितश्च धातो आदित्यात्मने भवंति ॥

End: इति **लकारोर्थप्रक्रिया** ॥ ॥
धातूनामनंतत्वांनानार्थत्वाच्च सर्वथा अभिधातुमशक्यत्वादलमाख्यातवर्णनैः ॥ ॥

इति **श्रीसूरिसिंह**विरचिता **आख्यानचंद्रिका** समाप्ता ॥ श्रीशुभमस्तु ॥ इदं पुस्तकं लिखितं **पट्टवर्द्धनोपनामक आत्मारामभट्टेन** ॥ स्वार्थं परार्थं च ॥ सं० १८०० शा० १६६५ माघशुक्लैकादशीशनौ ॥ श्रीशिवाय नमः गोविंदाय नमः सरस्वत्यै नमः ॥ ॥

८३९.

१०४. काशिकावृत्तिन्यासटीका व्याकरणप्रकाशः । महामिश्रः.

VYÂKARAṆAPRAKÂS'A, a gloss on JINENDRABUDDHI'S KÂS'IKÂVṚITTINYÂSA, by MAHÂMIS'RA.

Beginning: नमो गणेशाय ॥

यतः प्रकाशात्तमसो विनाशात्पदार्थतत्वानि विकाशयंति ।
द्रव्यादिभावेन तु सर्वतत्वं तमीश्वरं सर्व्वमिदं नमामि । १ ।
सुवर्णपूर्णा रमणवि पावनी गुणान्विता शुद्धमता मनोरमा ।
कृतिः कृतैषा बुधचित्तहारिणी हृदि स्थिता हारलतेव राजते । २ ।
नरपतिकृतिरेषा कामिनी नंदिनीव गुरुतमकृततोषा नाशिताशेषदोषा ।
सुललितगतिवंधा निर्जिताशेषतेजा जयति जगदुपेता मालिनी जाह्नवीव ॥
शिवं प्रणम्य देवेशं तथा शिष[व]पतिं शिवां । **प्रकाशः** क्रियते **न्यासे महामिश्रेण** धीमता । ४ ।
वियापतेः प्रेरणकारणेन कृतो मया **व्याकरणप्रकाशः**
यद्यत्र किंचित्स्खलनं भवेन्मे क्षंतव्यमीषद्गुणिनाम्वरैस्तत् । ५ ।

अथ **पाणिनीयानि** सूत्राणि व्याख्यातुकामो **वृत्तिकारो** व्याख्यानस्वरूपसमुपदर्शनव्याजेन प्रतिज्ञां कृतवान् । वृत्ताविता- चित्तादि । तामपि **वृत्तिं** व्याचिख्यासुर्जिनेंद्रबुद्धिः प्रारिप्सितग्रंथे सज्जनसंकीर्त्तनं नाम मंगलं चकार । जयंतीत्यादि ।

Fol. 25. The Ms. breaks off with:

अन्वहीति **न्यासे** कर्मवदतिदेशात् आत्मनेपदं यदुक्तं तन्नोपपद्यते स्वरिते······बोद्धव्यं ये पुनरिदं प्रदेशे यण इगिति कृत्वा प्रत्याचक्षते ते निरर्गलशैशवाः यतः संप्रसारणे तत्र दोषं न दृष्टवंतः । आग्रनन्वेवमित्यादि । अत्र चेदंन्न वक्तव्यं । टित्किितोः संभवात् । परस्परप्रतिबंधेन परत्वमेव भवतीति पर्यायेनोप्युपपत्तेः । मिदा ।

८३७.

३९६. **क्रियानिघण्टुः** । भट्टहलायुधः.

KRIYÂNIGHAṆṬU, by BHAṬṬA HALÂYUDHA.

Beginning: ॥ श्रीगणेशाय नमः ॥

जयंति मुरजित्पादनखदीधितिदीपिकाः । मोहांधकारविध्वंसान्मुक्तिमार्गप्रकाशिकाः । १ ।
लोकेषु शास्त्रेषु [च] ये प्रसिद्धाः काव्येषु ये सत्कविभिः प्रयुक्ताः ।
तच्चिंत्यतां चित्तविनोदनाय शब्दानहं धातुभिरुद्धरामि । २
एकार्था एकशब्दाश्च नानार्थाश्चैकवाचकाः । सदृशार्थाभिधानाश्च नानार्थाः सदृशाक्षराः । ३
एकार्थास्तुल्यशब्दाश्च निबध्य[ध्यं]तेत्र धातवः । धातुपारायणांभोधिपारोत्तीर्णधिया मया । ४ ।
अस्त्यगस्त्यमुनिज्योत्स्नापवित्रे **दक्षिणापथे** । **कृष्णराज** इति ख्यातो राजा साम्राज्यदीक्षितः । ५
गोपायति क्षितिमिमां चतुरब्धिसीमां पापाज्जुगुप्सत उदारमतिः सदैव ।
वित्तं जुगोप यस्तवनीयकेभ्यो धीरो जुगुप्सति महत्यपि कार्यजाते । ६

End: इति समाप्तमवाप्तगुणोदयं कविरहस्यमिदं रसिकप्रियं । सदभिधाननिधानहलायुधद्विजवरस्य कृतिः सुकृतात्मनः । ७३

इति **दक्षिणात्यभट्टहलायुधकृतः क्रियानिघंटुः** ॥ ॥

नरसैक १७२० मिते वर्षे श्रावणे बहुले रवौ नवम्यां **केशवव्यासोलिखच्छवपुरे** स्वयं ।
विष्णुःपदांभोजरसं पायंपायमहर्दिवं । कदाहमवसं काश्यां संतुष्टो येन केन चित् । १

श्रीगुरुः शरणं १

८४४.

९९. **दुर्घटवृत्तिप्रतिसंस्कारः** । सर्वरक्षितः.

An abstract of S'ARAṆADEVA'S DURGHAṬAVṚITTI, by SARVARAKSHITA.

Beginning: श्रीगणेशाय नमः ॥

नत्वा **शरणदेवेन** सर्वज्ञं ज्ञानहेतवे ॥ वृद्दद्दजनांभोजे कोशवीकाशभास्वता ॥
शाकमहीपतिवत्सरमाने एकनभोनवपंचविताने ॥ **दुर्घटवृत्तिरकारि** मुदे वः कंठविभूषणहारलतेव २

वाक्यात् **शरणदेवस्य** छात्रोपग्रहपीडया ॥ **श्रीसर्वरक्षितेनै**षा संक्षिप्य प्रतिसंस्कृता ॥ ३ ॥

क्ङिति च । कथं हृह्वरेच्छन्दसीति । हृधातोरिटि गुणनिषेधात् । उच्चारणार्थोकारेणानंगत्वाद्गुणाभावात् । उच्यते । अत एव नि-
र्देशादिति **रक्षितः** ।

Fol. 3: इति दुघटवृत्तौ प्रथमः पादः; fol. 4: इति **दुर्घटवृत्तौ** कुटादिपादः; fol. 8: **शरणदेवस्य दुर्घटवृत्तौ** भूयः पादः; fol. 10: **सर्वरक्षितसंस्कृतशरणदेवदुर्घटवृत्तौ** प्रथमोध्यायः.

End: इति **श्रीमहामहोपाध्यायश्रीसर्वरक्षित**प्रतिसंस्कृत**शरणदेवदुर्घटवृत्तिः** समाप्ता ॥ शुभं भवतु कल्याणं भवतु ॥ ॥

८६२.

१२५. **पाणिनीयवादनक्षत्रमाला** । अप्यदीक्षितः.

PÂṆINÎYAVÂDANAKSHATRAMÂLÂ, by APYADÎKSHITA.

Beginning: श्रीगणेशाय नमः ॥

उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः [प्र]स्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ॥ १ ॥
पूर्वोत्तरतंत्रयुगे रचिता नक्षत्रसम्मिता वादाः । अधुना **पाणिनितंत्रे** विदुषां तोषाय रच्यंते ॥

किलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमिति वार्त्तिके कौ लुप्तं न स्थानिवदित्यर्थस्य क्वचिद्ग्रंथेषु निषेधदर्शनात् क्वचिदंगी-
कारदर्शनाच्च विप्रतिपत्त्या विचार आरभ्यते ।

The above *mañgalas'loka* occurs also in Apyadîkshita's Kuvalayânanda (verse 3.)

Fol. 10: इति **श्रीमद्भरद्वाजकुलजलधिकौस्तुभ**श्रीमदद्वैतविद्याचार्यमहाव्रतयाजि**श्रीमदप्पयदीक्षित**कृतौ **पाणिनीयवाद[ा]न-
क्षत्रमालायां** कौ लुप्तं न स्थानिवदित्यर्थस्य निराकरणसमर्थन**श्रवणनक्षत्रवादः** ॥

Fol. 31. The Ms. breaks off with:

अंतरंगवहिरंगयोः क्वचिदजानंतर्याश्रयणमात्रेण समकालप्रवृत्तयोरसिद्धत्वनिषेधांगीकारे स्योनः स्योना वृक्ष इंद्रमित्यादिषु वहुषु
दोषप्रसंगात् ॥ यच्चाचः परस्मिन्पूर्वविधान[वि]त्यत्र हरदत्ते[त्ते]नोक्तं अनादिष्टादचः पूर्वत्वविधानाभावेपि वैय्याकर….

८८९.

५७. **प्रौढमनोरमामण्डणम्.**

PRAUḌHAMANORAMÂMANḌANA.

This Ms. is a continuation of No. 3075 in the I. O. Library (Prof. Eggeling's Catalogue p. 192) which contains "the first chapter (*Samjnâprakaraṇa*) of some treatise on contradictory points in *Pâṇini's Sûtras;* by the author of the *Prakriyâpradîpa* and pupil (or son) of *S'esha Vîres'vara*". The beginning of the Jammu Ms. (fol. 11) agrees with the text found after the *Samjnâprakaraṇa* on fol. 10 of the I. O. Ms.

The name शेषकृतं प्रौढमनोरमामण्डनम् is written on the back of the last leaf by a

different hand. On the margin of the leaves are written the letters म० स्व०. The Ms. begins with fol. 11.

Fol. 11: इको गुणवृद्धी । इह भाष्याद्यनुक्तोपि नियमपक्षः सुसाधस्तच्छेषपक्षाद्विशिष्टश्चेति निरूपितं प्रक्रियाप्रदीपेस्माभिः । तथा हि । एतत्परिभाषाया अलोन्त्यशेषत्वे मिदेर्गुणः पुगन्तलघूपधस्य च मृजेर्वृद्धिरित्यादौ दोषमुद्भाव्य मिद इः पुक्यन्तो लघ्व्युपधा ततः समाहारद्वन्द्वः मृजेर्वृद्धिरित्यत्राचो ञ्णितीत्यतोऽच इत्यपकृष्यत इति प्रकृतपरिभाषानुपस्थाने स्थानोपादानादेवेष्टस्थानलाभो भाष्यकृतैवोक्तो नियमपक्षेप्युन्नेयः ।

Fol. 67: The Ms. breaks off with:

एवं रीत्या परिमाणग्रहणस्य हरदत्तादिभिः प्रत्याख्यातत्वात् । न चोक्तविषयताशाली वोधो लक्षणयोपपादयितुमशक्य इति परिमाणं प्रथमाविधानमावश्यकमिति वाच्यं । द्रोणो व्रीहिरिति वाक्योत्तरं परिच्छेद्यत्वसंबंधेन द्रोणरूपपरिमाणप्रकारकव्रीहिविशेष्यकवोधानुभवस्य प्रामाणिकैरुक्तेः । व्रीहिपरिच्छेदकसंदेहनिवृत्तेस्तु लक्षणयाऽभेदेन द्रो···.

९१६.

९६. मितवृत्त्यर्थसंग्रहः पाणिनीयसूत्राणाम् । उदयनः.

MITAVṚITTYARTHASAṀGRAHA, an abstract of the KÂSIKÂVṚITTI, by UDAYANA.

Beginning: श्री । अमंदहृदयानंदनिदानं शिवयोश्चिरं । नमस्कुर[रु]त हेरंबमवलंबं मनीषिणां । १
वल्लकीपुस्तककरां पुंडरीकासनस्थितां । शारदां नीरकुंदेंदुधवलां भावयेतरां ॥ २ ॥
मुनित्रयमतं ज्ञात्वा वृत्तीरालोक्य यत्नतः । करोत्युदयनः साधु मितवृत्त्यर्थसंग्रहं ॥ ३ ॥

अथ शब्दानुशासनं । अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इति माहेश्वराणि चतुर्दश प्रत्याहारसूत्राणि । प्रत्याहारश्च लाघवेन शास्त्रप्रवृत्त्यर्थः ।

Fol. 3: इति पाणिनिसूत्राणां मितवृत्त्यर्थसंग्रहे । पादः प्राथमिकोध्यायस्याद्यस्यायं समर्थितः ॥

Fol. 10: इति पाणिनिसूत्राणां मितवृत्त्यर्थसंग्रहे । पादस्तृतीयोध्यायस्य प्रथमस्य समर्थितः ॥

Fol. 10 breaks off with:

वा[र]णार्थानामीप्सितः । अपादानं । प्रवृत्तिविघातो वारणं । यवेभ्यो गां वारयति । २७ । अंतर्द्धौ येनादर्शनमिच्छति । अपादानं । मातुर्निलीयते कृष्णः । २८ । आख्यातोपयोगे । अपादानं । उपयोगो नियमपूर्वकविद्यास्वीकारः । आख्याता वक्ता । उपाध्यायादधीते । २९ । जनिकर्तुः प्रकृतिः । अपादानं । पुत्रात्प्रमादो जायते । ३० । भुवः प्रभवः । कर्तुरपादानं । हि[म]वतो गंगा प्रभवति । प्रकाशत इत्यर्थः । ३२ ।

९१८.

९७. युक्तिरत्नाकरः । कृष्णाचार्यः.

YUKTIRATNÂKARA, by KṚISHṆÂCHÂRYA.

Beginning: श्रीगणेशाय नमः ॥ अइउण् ॥ वाक्ये संहिताया अनित्यत्वान्न सन्धिः ॥ यद्यपि पदसमूहो वाक्यन्तथापि पदश-

व्देन परिनिष्ठितमुच्यते। अत्र न केवला प्रकृतिरित्यस्यापनिष्ठितेत्यर्थान्निषेधो न। ननु प्रातिपदिकार्थसूत्रे न केवलेति न्यायेन सुबुत्पत्तिर्भविष्यतीति वचनग्रहणन्न कर्त्तव्यमिति वक्ष्यमाणं यिङन्धत्त इति चेन्न। अनुकरणानाम्प्रातिपदिकत्वाभावेन प्रकृतित्वाभावात्।

End: इति **श्रीमद्देवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्य्यकृतो युक्तिरत्नाकरस्समाप्तः** ॥ ॥

९३६.

९८. **वादचूडामणिः**। कृष्णाचार्यः.

VÂDACHÛḌÂMAṆI, by KṚISHṆÂCHÂRYA.

Beginning: श्रीगणेशाय नमः उपदेशे। योगेन गतार्थत्वाददनुनासिकसञ्ज्ञासूत्रङ्कृत्स्नो वर्णो[र्णो] मुखेन नासिकया चोच्चार्य्यते इति **प्रातिशाख्यसम्प्रदायरक्षणार्थम्**। स्वरूपग्रहणन्तु न स्यात् अर्थस्यैव कार्य्ययोग्यत्वात्। दधीयतेः क्विपि दधि कुलमित्यत्रेदित्वान्नुम्स्यादिति न फूलन्धातुग्रहणन्धातूपदेशा एपवस्थापान्नुमर्थमिति भाष्योक्तेः।

End: इति **श्रीमद्देवीदत्तात्मजशमसेवकतनूद्भवकृष्णाचार्य्यकृतो वादचूडामणिः** ॥ श्रीविश्वेश्वराय नमः ॥

९५४.

१५०. **व्याडीयपरिभाषावृत्तिः**.

VYÂḌÎYAPARIBHÂSHÂVṚITTI.

Beginning: ॐ श्रीगणेशाय नमः ॥ ॐ अथ परिभाषासूचनं व्याख्यास्यामः ॥ अथेत्ययमधिकारार्थः ॥ परिभाषासूचनं शास्त्रमधिकृतं वेदितव्यं यदित ऊर्ध्वमनुक्रमिष्यामः इयमस्मिन्सूत्रे सिद्धेयमस्मिन्सूत्रेसिद्धेति किं कारणं अत्र हि ज्ञातपरिभाषः स्वयं शास्त्रं प्रतिपादयितु[तुं] समर्थो भवति स ताव[ज्]ज्ञातपरिभाषो भवति अतो व्याख्यानं द्रष्टव्यं तत्रादित एव तावदियं परिभाषा भवति अर्थवद्ग्रहणे नानर्थकस्येति क पुनरियं परिभाषा ज्ञाप्यते व्रश्चभ्रजाति [व्रश्चभ्रस्जेति] सूत्रे कथं कृत्वा अत्र हि राजभ्राजशब्दौ पीठाते [पठ्येते] अत्र हि राजशब्दग्रहणं स्यादिति।

The text agrees, except for slight variations, with that of the Berlin MS. W.1637.

End: अस्तीयं परिभाषेति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं किमेतस्या ज्ञापने प्रयोजनं प्रयायिणे प्रयायिणः माषवापाणीति व्रीहिवापाणीति प्रातिपदिकांतनुंविभक्तिषु चेति णत्वं सिद्धं भवती[ति] सिद्धं इति **श्रीव्याडीयपरिभाषावृत्तिः** समाप्ता

ॐ लोकोपचाराद्ग्रहणसिद्धिः अर्थवदितरयोरर्थवतो ग्रहणं गौणमुख्ययोर्मुख्यस्य दूरांतिकयोरंत[ति]कस्य नियतव्यभिचारिणोर्नियतस्य कृत्रिमाकृत्रिमयोरकृत्रिमस्य सामान्यविशेषोक्तयोर्विशेषोक्तेर्विप्रतीतावंतरंगत्वात् ॥

ज्ञापकादर्थसिद्धिरनुमानप्रामाण्यात् संसार्ये योगसाधनं सूत्रे लोकेर्वेद[र्थे]वत्पदैरभिहितानामर्थानामर्थानामपेक्षासन्निधियोग्यताभिः परिभाषाधिकारसंसर्गेण वाक्यमहावाक्यसिद्धिः तद्वच्च विभक्तिवचनपरिणामः ७३ इति **परिभाषासूत्राणि** समाप्तानि शुभायो वो भवंतु तस्यां (!) ॥ ॥

शुभमस्तु सर्वजगताम् ॥ श्रीरामाय नमः ॥

९६६.

१५८. शब्दार्थसारसंग्रहः.

S'ABDÂRTHASÂRASAMGRAHA.

Beginning: ॐ श्रीगणेशाय नमः ॥ विशेष्यविशेषणभावो हि द्विविधः भेदान्वयोऽभेदान्वयश्च तत्रोभयत्र धर्मितयोपात्तं परप्रयोगार्हं स्वातंत्र्येण क्रियादावन्वययोग्यं विशेष्यम् इतरद्विशेषणम् भेदान्वयो हि ब्राह्मणस्य धनं ग्रामं गच्छतीत्यादौ प्रायः षष्ठ्याद्यर्थप्रयुक्त एव.

End: शब्दशास्त्रेऽनुक्रतिर्धात्वर्थांतर्भूतैव धात्वर्थविशेष्यक एव च वोधः एकग्रामकर्मकमेव देवदत्तकर्तृकं गमनमित्येवं सर्वत्रोहनीयम् ॥ इति **शब्दार्थसारसंग्रहः** ॥ गमनत्वावच्छिन्नविशेष्यताभिन्नप्रकारतानिरूपितजन्यत्वात्मकभेदसंसर्गावच्छिन्नसंयोगत्वावच्छिन्नविशेष्यताभिन्नप्रकारतानिरूपिताश्रयत्वात्मकभेदसांसर्गिकविषयतावच्छिन्नग्रामत्वावच्छिन्नविशेष्यताशालीति॥श्रीः॥ ॐ नमो नारायणाय ॥

९६८.

४०७३. शाब्दविचारः । अचलशर्मा.

S'ÂBDAVICHÂRA, by ACHALAS'ARMAN.

Beginning: ॥ श्रीगणेशाय नमः ॥

धात्वर्थे प्रथमांतार्थे प्रधानमिति संशये ॥ श्रीमानचलशर्मासौ किंचिद्वक्तुं व्यवस्थितः ॥

घटो भवतीति वाक्यात्प्रथमांतार्थे मुख्यविशेष्यैकवोधसमर्थमिदं वाक्यमित्याकांक्षां प्रति सन्दधानो मुख्यविशेष्यं प्रथमांतार्थं प्रत्येति क्रियामुख्यविशेष्यकवोधसमर्थमिदं वाक्यमिति यः प्रतिसंधत्ते स प्रधानीभूता[तां] क्रियामेवावगच्छतीति सिद्धांतः ॥

End: स्तोकः । स्तोकेनेत्यादौ एकशेषेण वाधस्तु नपुंसकमनपुंसकेनेति सूत्रेऽस्य ग्रहणेन समाहारद्वंद्वविषये ॥ एकशेषस्याप्रवृत्तेर्ज्ञापितत्वात् मुनिमुनिमुनिभिरित्यादौ पदाभेद एव एकशेषेण वाधस्तु न मूलमूलग्रहणाज्ज्ञाप[क]त्वात्तस्यानित्यत्वात् । इति शाब्दविचारः समाप्तम् शुभम् संवत् १९४२ का ॥

१०२१.

८५. सिद्धान्तकौमुदीस्वरप्रक्रियाव्याख्या । रामचन्द्रः.

A commentary on the SVARAPRAKRIYÂ chapter of the SIDDHÂNTAKAUMUDÎ, by RÂMACHANDRA.

Beginning: श्रीगणेशाय नमः ॥ उच्चैः । उच्चैर्नीचैरित्यधिकरणशक्तिप्रधाने उर्द्ध्वभागे अधरभागे इत्यर्थे अव्यये तत्राधिकरणस्य कर्तृकर्मद्वारा क्रियाधारत्वात्प्रकृते शब्दकर्मकोच्चारणक्रियाधारत्वमेव गृह्यतां अन्यस्यासंभवात् । तत्रोर्ध्वभागस्याधारभागस्य च स्थानं सभागत्वे एव संभव इत्यभिप्रेत्याह । ताल्वादिष्विति ।

End: इति वाक्यस्वराः इति **श्रीशेषकुलोत्पन्नेन नागोजीपंडितानां** पुत्रेण **रामचंद्रपंडितेन** विरचिता **स्वरप्रक्रियाव्याख्या** समाप्ता । संवत् १८४८ वैशाखमाशे शुक्लपक्षे ४ वारशनिचर ॥ ॥

१०६७.

३९४. नानार्थरत्नमाला । निरुपमदण्डादिनाथः.

NÂNÂRTHARATNAMÂLÂ, by NIRUPAMA DAṆḌÂDINÂTHA.

The text of this Manuscript is very corrupt.

Beginning: श्रीगणेशाय नमः

यत्पादांवुरुहछाया देवचूडामणीयति । यस्य ज्ञानादयोनंताः स देव[:] श्रेयसेस्तु नः
अस्ति श्रीमां **निरुपमदंठनाथः** प्रचंडधीः सद्वृत्तौ वचंदडेशमुक्तामिणिर्युणि ॥
द्वितीयमंतःकरणं राज्ञो **हरिहरस्य** यः राजकार्यो प्रजारक्षा द्वय धत्ते कुलवतं
भार **हरिहराधीशो** भुवः कूर्मादिदुर्वहं बुद्धौ कुशाग्रसूक्ष्मायां यस्तु विन्यस्य मोदते
विविधग्रंथसंदर्भविमर्दविमलाकृतं ॥ यस्य चेतः सरस्वत्या विलासमुकुरायते
तिस्रो दधानश्चतुरः पंच षट् चायथोचितां प्रयुंजानो नये वृधिं सप्ताष्टौ यो जिगीषति
सोय ग्रथ्नामि **नानार्थरत्नमालां** गुणेज्वली **श्रीमां निरुपमर्दडेशो** नात्यल्पं नातिविस्तरं
कांडैश्चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितै संकीर्णव्ययकांडाभ्यामिति षड्भिरनुक्रमात्
कथ्यंते केपि नानार्थाश्वाव्दास्तंत्रांतराध्वना अमी सलिंगनिर्लिंगभेदाद्वेधा भवंति हि
सलिंगाः सप्तधा वृत्या स्त्रियां पुंसि [नपुंसि] न पुंसके स्त्रीपुंसयोः लीवंपुंसो स्त्री[नी]नपुंसकयोस्त्रिषु
शव्दान्पुंसस्त्रियः क्लीवात्तानालिगान् त्रिलिंगकान् प्रायः क्रमात्प्रवक्ष्यामः कांतादीन्व्यक्षरक्रमात्

Fol.24: इति जगदुपकारिण्यां **निरुपमरडाधिनाथरचितायां व्यक्षरपदकांडोयं पूर्णो नानार्थलीलायां.**

Similar colophons at the conclusion of त्र्यक्षरकाण्ड, fol. 43.; चतुरक्षरकाण्ड, fol. 50.; पञ्चाक्षरकाण्ड and षडक्षरकाण्ड, fol. 51.; संकीर्णशव्दकाण्ड, fol 52.; अव्ययाक्षरकाण्ड, fol. 53.; अव्ययद्व्यक्षरकाण्ड, fol. 54.

End: इति अक्षरकाडः

अतरेणाथ संवुद्धिकृतस्वेदेघहोवती समंततः सर्वतार्थे शोभानांतसुस्वांभयोः
इति जगदुपकारिण्यां **अव्ययत्र्यक्षरकांडः** पूर्णो **नानार्थरत्नमालायां**
अ तस्सदिति श्रीमां **नानार्थरत्नमालायाः** ७ षट्कांडाः परिसमाप्ताः ७ शुभमस्तु ७

१०७३.

४३७. नामसंग्रहमाला । अप्यदीक्षितः.

NÂMASAṀGRAHAMÂLÂ, by APYADÎKSHITA.

Beginning: श्रीगणेशाय नमः । श्रीहंसो जयति

व्यवहाराय वालानां रचिते **नामसंग्रहे** नाम्नां नातिप्रसिद्धानां लिख्यते वृद्धसम्पतः(?)
यस्मिन्नर्थांतरोतवा[त्त्या] च तन्नामोत्तया च संकरः सोन्यथा पूर्वं लिख्यते

अयमाद्यो **नामसंग्रहश्लोकः**

अथ केषां चिदर्थानां व्यवहारोपयोगिनां अभिधानानि कतिचित्संगृह्यंते यथाश्रुतं १ कानिचित् ।

शकं द्वे त्रीणि चत्वारि वा क्वचिदधिकान्यपि १
वसुंधरा रत्नगर्भा मध्ये तस्याः सुवर्त्तुल[ा]ः ज[जं]वूद्वीपः कुमारोसौ वि[वे]ष्टितो लवणाधि[ब्ध]ना २
काश्यपी भूतधात्री च रत्नगर्भा वसुंधरेत्य**भिधानरत्नमाला**
जंवूद्वीपः कुमारश्च यत्रैते **भारतादय** इति **वैजयंती**
द्वयोरपि कुमार स्याद्वाले स्त्रीपुंसयोः **जंवूद्वीपे** कुमारी तु कन्यायां स्यात्स्त्रियामसाविति **केशवकोशश्च**
जंवूद्वीपं समावृत्य लक्ष[णे]योजनविस्तु[तृ]तः मैत्रेय वलयाकार[ः] स्थितः क्षारोदधिर्वहिरिति **विष्णुपुराणं**
तत्र प्रजा[यां]नां स्थानानि वासस्य रमणस्य च वर्षाणि **भारतादीनि** नवोक्तानि मनीषिभिः ३

End: एकैकस्याप्याभिख्यानामियत्ता नावधार्यतो स एव देवस्तात्वेति यस्य निश्वसितं श्रुतिः
केषांवित्वभिधाः काश्चिद्रालवोध – दर्शित्यः यद्ययं राख्योद्यर्मोथता सद्गुणांचिता
नाम[संग्रम]संग्रहमालेयं धार्या सोरभदायिनी ॥ ॥

इति **श्रीमदप्यदीक्षितीविरचिता नामसंग्रहमाला** समाप्ता ॥ छ ॥

१०८०.

४३४. ग. **शब्दभेदप्रकाशः** । पुरुषोत्तमदेवः.

S'ABDABHEDAPRAKÂS'A, by PURUSHOTTAMADEVA.

Beginning: श्रीमच्छ्यामा विजयतेतराम् ॥ ॥
प्रवोधमाधातुमशव्दिकानां कृपामुपेत्यापि सतं[तां] कवीनां ॥
कृतो मया रूप्यमवाप्य **शब्दभेदे प्रकाशो**खिलवङ्मयार्थं ॥ १ ॥
विद्यादगारमागारमपगामापगामपि अ[ा]रातिमारातिमथो अम आमः प्रकीर्त्तितः ॥ २ ॥
भवेदमर्ष आमर्षा अंकूरोंकुर एव च ॥ अंतरिक्षमन्तरिक्षमगस्त्योगस्तिरेव च ॥ ३ ॥
अटरूपश्चाटरूपोऽवशायोऽप[व]श्यायं एव च ॥ प्रतिश्यायो भल्लूको भल्लकोपि च ॥ ४ ॥
उल्मूकमुल्मुकं प्राहु शंवूकमपि शंवुकं जतु [॥] कास्या जतूकापि मसूरो मसुरो मतः ॥ ५ ॥

End: वाराणसीत्यपि प्रोक्ता वाणारसी च तथा ॥ तमलिप्ता दामलिप्ता तुंगोप्यौतुंग इत्यपि ॥ ५६ ॥
अंतस्थीयवकारस्तु यवनस्य तु कथ्यते ॥ तत्र वायस्य वायेयि तंत्रादित्वं च दृश्यते ॥ ५७ ॥ ॥

इति **श्रीपुरुषोत्तमदेवकृतः भेदप्रकाशः** समाप्तः ॥ ॥ श्रीशुभमस्तु ॥ ॥ कल्याणमस्तु ॥ ॥ संवत् १८८० चैत्र-कृष्ण १० गुरुवासरे.

१०९०.

४४५. प्रत्ययाभिख्याष्टमलक्षणव्याख्या.

A Commentary of the Eighth Lakshaṇa, called the *"pratyayas"*, of some work on prosody.

The name of the treatise, of which the chapter dealing with the *pratyayas* (see Vṛittaratnâkara vi. 1) is explained here, remains to be ascertained.

Beginning: श्रीगणेशाय नमः ॥

नृसिंहं सच्चिदानंदं प्रणम्य तदनुग्रहात् । व्याख्यास्ये **प्रत्ययाभिख्यं स्पष्टमष्टमलक्षणम्** ॥ १ ॥

कथितानां मात्राभेदमात्रपरिमितानामार्यादीनां वर्णगणभेदभिन्नानां श्रीप्रभृतीनां वृत्तानां चेयत्तां प्रस्तारादिभिर्निर्धारयितुम-**ष्टमोध्याय** आरभ्यते ॥ ॥ समं प्रस्तारः ॥ ॥ पृथगनयोः पदयोरधिकारस्संनियोगशिष्टन्यायन्या[व्या]वृत्तये तेन नि-वृत्तेप्यन्यतरस्मिन्नन्यतरदनुवर्तत एव विधिवाक्यापेक्षितपदोपस्थितिमात्रार्थकतया तदेकवाक्यतापत्युत्तरमेवानयोश्शाब्दधीजनकता । सममित्यन्वर्थसंज्ञा ।

The MS. breaks off with:

Fol. 10: अथैकद्व्यादिलगक्रि—तत्र द्विकोष्ठा प्रथमा पङ्क्तिः । तदधः पार्श्वद्वयविवृद्धार्धकोष्ठकत्रिकोष्ठा द्वितीया पङ्क्तिः । एको—— तुकोष्ठा तृतीया पङ्क्तिः । इति क्रमेण सप्तविंशतिकोष्ठपर्यंताः षड्विंशतिपङ्क्तयः पंचे —— तकोष्ठपर्यंताश्चतुरुत्तरशतपङ्क्त्यो….

१०९६.

४४१. **प्राकृतपिङ्गलव्याख्या** । श्रीपतिः.

A Commentary on the PRÂKṚITAPIÑGALA, by S'RÎPATI.

Beginning: श्रीगणेशाय नमः ॥ ॐ नमो महेश्वराय ॥ ॥

गौरीकल्पलताविभक्तवपुषं श्रीकण्ठकल्पद्रुमं भक्तानामचिरादभीष्टफलदं नत्वा सतां प्रीतये ॥
वेदे वृत्तमदीपयद्ग्रथितवान् यो **वृत्तरत्नावलीं श्रीमत्पिंगलनागराज**रचनां व्याख्याति स **श्रीपतिः** ॥ १ ॥
तर्काभियोगरणकर्कशता मतौ चेत्सूक्तिः कुतोत्र मधुरा मधुरा न मंत्रे ॥
दृष्टं यतोस्ति सुकुमारशिरीषपुष्पे वृत्तं निसर्गकठिनं खलु चिततोपि ॥ २ ॥
टीकास्ति **पिंगलग्रंथे** यद्यप्यन्या पुरातनी ॥ विशेषं तदपि ज्ञात्वा धीराः पश्यत मत्कृतिं ॥ ३ ॥
इमां छंदोविद्यां सदयहृदयः प्राह गिरिशः फणींद्रायाख्यातः स **गरुडभिया पिंगल** इति ॥
द्विजस्यास्य ग्ने[स्ने]हादपठदथ शिष्योतिसुमतिः स्वकांतां संबोध्य स्फुटमकथयत्सोखिलमिदं ॥ ४ ॥

इहायातः सुमतिस्तां विद्यामधीत्य छंदोग्रंथं साधारणजनोपयोगार्थमपभ्रंशेन चिकीर्षुस्तस्य विघ्नविघातद्वारा समाप्तिकामः स्व-गुरोः **पिंगलाचार्य**स्योत्कीर्तनरूपं शिष्टाचारपरिप्राप्तं मंगलमादौ कुर्वन्नाह ॥ जो विविह इति ॥ ॥

The MS. breaks off in the *Gâthâprakaraṇa* with:

Fol. 13: अथ **गाथाप्रकरणं** ॥ तत्र गाहूप्रभृतीनां उद्देशं रड्डाछंदसा करोति । होइ इति । चतुःपंचाशन्मात्रो गाहू भवति १ गाथा च सप्तपंचाशन्मात्रा ॥ २ ॥ तथा विगाथा परावृत्य क्रियते ॥ सप्तपंचाशन्मात्रा भवतीत्यर्थः । द्वितीयार्द्धलक्षणं प्रथमार्द्धे । प्रथमार्द्धलक्षणं द्वितीयार्द्धे ॥ ३ ॥ उद्गाथः षष्टिमात्रः ॥ ४ ॥ गाहिएपां द्विषष्टिमात्रा दीयंते ॥ ५ ॥ तथैव परावर्तते सिंहिनी द्विषष्टीमात्रैव भवति परं तु उत्तरार्द्धलक्षणं प्रथमार्द्धे प्रथमार्द्धलक्षणं उत्तरार्द्धे भवतीत्यर्थः एवं अन्योन्यगुणलक्षणानि सप्त रूपकानि ॥ स्कंधके चतुःषष्टिमात्रा भवंति ॥ ५१ ॥ अथैषा विशेषलक्षणान्याह । पुव्वद्धे इति ॥ पूर्वार्द्धे उत्तरार्द्धे च सप्ताधिकविंशतिमात्रा भवंति ॥ अथ पादद्वयमध्ये षष्ठो गणो मेरुरेव भवति ॥ षरमेरु इति लघोर्नाम ॥ ५२ ॥

१११९.

६५५. संगीतानूपाङ्कुशः । भावभट्टसंगीतरायः.

SAṀGÎTÂNÛPÂÑKUS'A:, by BHÂVABHAṬṬA SAṀGÎTARÂYA.

Beginning: श्रीगणेशाय नमः

जनार्दनपदांभोज[जं] कामराजपदांबुजं सम्यक्ज्ञानप्रवोधा[य] स्मृत्वा नुत्वा प्रपूज्य च १
स्तोकं मुद्रामुरीकृत्य सा[र्ध]वर्षत्रयात्मिका **श्रीमदनूपसिंह**स्याक्ष[ज्ञ]या ग्रंथद्वयं कृतं २
एको**नूपविलासाख्यो**नूपरत्नांक[कु]रः परः **अनूपांकुश**नामायं ग्रंथो निःपाद्यतेधुना ३
श्रीमत्संगीतराजेन तानयोगप्रवर्त्तकः सरीगमाधौनीति सरीगमायुधौनिव ४
सरीगमापधौनीति स्थानत्रयमिदं जगुः प्रथमं सप्तमं मंद्रं द्वितीयं मध्यमं स्मृतं
तृतीयं सारसंज्ञं स्यादेवं स्थानत्रयं मतं ५

Fol. 16: Close of *Svarâdhyâya*; fol. 30 of *Râgâdhyâya*; fol. 34 of *Prakîrṇakâdhyâya*.

End: इति **चक्रवलिप्रबंधः** इति श्रीमद्रागेवु[ड]कुलदिनकरमाहाराजाधिराज**श्रीकर्णासिंहा**त्मनयश्रीविराजमानचतु[:]समुद्रमुद्रावछेदि[निमेदि]नीप्रतिपालनचतुरवदान्म ¯ ना[न्यता]तिशयनिर्जितचिंतामणिस्वप्रतापतापितारिवगा[र्ग]धर्म्मावतारश्रीमजाधिरज्ज**श्रीमदनूपसिह**प्रमा[मो]दितश्रीमहीमहे[न्द्र]मौलिमुकुटरत्नकिरनीराज्जितचरणकमलश्री**साहजा**[साहिजहां]सभामंडन**संगीतरायजनार्दन**मदांग[भटांगं]जाग्रष्ट[तुष्ठु]प् चक्रवर्ती**संगीतरायभावभट्ट**विरचिते **संगीतानूपांकुशे** प्रबंधाध्यायः समाप्तः चतुर्थ श्रीवाग्देवी प्रसंन्नास्तु शुभं भवतु ॥ ॥ संवत् १८९२ ॥ ॥ मितिवैशाखमासे शुक्लपक्षे पचम्यां ५ रविवासरे शुभमस्तु ॥ श्री ॥

The same colophon occurs of the close of the *Svarâdhyâya*, from where the readings shown in brackets have been taken.

११३९.

५४०. कविकर्पटीकरचना । कविराजः.

KAVIKARPAṬÎKARACHANÂ, by KAVIRÂJA.

The name of the author is given as *Kavirâja S'añkadvâra* in the MS. described in Prof. Peterson's Third Report p. p. 21 a. 340.

Beginning: श्रीगणेशाय नमः

यः कातन्त्रसुधानिधानकल[श]शस्साहित्यरत्नालयस्सानन्दस्फुरगद्यपद्यरचनाप्रागल्भशव्दोदयः
षट्तर्कामृतपूरपूर्णवदनस्सद्वृन्दचन्द्रोदव[य]स्तस्येयं **कविकर्प्पटीकरचना** कंठे प्रतिष्ठाप्यतां १
यत्नादिमां कंठगतां विधाय श्रुतोपदेशाद्विदितोपदेशः ॥
आपातशव्दार्थविनिश्चयोपि श्लोकं करोतीव सभासु शीघ्रं २

आदौ तावदनुष्टुप्वृत्तेन चंद्रमारभ्यते तत्र तावत्प्रथमपादे पंचाक्षरे कर्प्पूरपूर हिण्डीरपिण्ड रजनीकर शंबुकंठ गंगाप्रवाह मृणालनाल शंखसंचय मल्लिकाचय कैरवव्रात चंदनद्रव नीहारहार कैलाशकाश सुधासंचय प्रालेयजाल वर्षोपलौघ कुन्दसंदोह कटिकोपल शालितण्डुल केतकीगर्भ मल्लिकापुष्प केतकीपत्र कदलीशाल मृणालसूत्र शरदंभोद नवनीतौघ[घ] शुभ्राभ्रद्युति शफरीचय पुनस्तथैव तृतीयाक्षरे.

End: इति **श्रीकविराजविरचिता कविकर्प्पटीकरचना** समाप्ता ✠ द्विषष्टिसम्वत्सरे अश्वयुजश्चतुर्थमासे पूर्वपक्षे मार्द्दतिथौ पौरुहूतेज्यसंयुते मध्याह्ने व्यलेखीद् पुस्तकम्**वेनीप्रसादः** ॥ ✠

११३९.

३३७. काव्यकौस्तुभः । विद्याभूषणः.

KÂVYAKAUSTUBHA, by VIDYÂBHÛSHAṆA.

Beginning: श्रीगणेशाय नमः ॥

कलाभिर्निभृतः श्रीमान् **राधया** समलंकृतः ॥ दीव्यत्कुवलयः सोयं विधुवि[र्वि]जयतेतरां ॥

प्रारिप्सितस्यास्य शास्त्रस्य काव्यं[ा]गत्वा[त्] काव्यफलमिव तावदाह ॥

कीर्त्तिः सार्वेश्यमानंदो धनादीनि च काव्यतः ॥

सार्वेश्यं देवमानवादिप्राणिचेष्टावगतिरूपं ॥ आनंदो रसानुभवसमुद्भूतः ॥ धनं नृपतिप्रसादलब्धा हस्त्यश्वादिसंपत् ॥ आदिना धर्मकाममोक्षाः ॥ तत्र धर्मो भगवद्वंदनादि ॥ कामो धनद्वारकः मोक्षो ज्ञानकांडे व्युत्पत्तिविधानादित्येतत् सर्वं काव्यादेव भवेदतस्तत्र पुंभिः सफलैभ[र्भ]व्यं ॥

Fol. 2: इति काव्यकौस्तुभे काव्यफलादिनिर्णयः ॥ प्रथमी प्रभा ॥; 6 शब्दार्थतद्वृत्तिनिर्णयः ; 16 रसनिर्णयः ; 17 रीतिनिर्णयः; 20 दोषनिर्णयः ; 23 ध्वनिभेदनिर्णयः ; 24 मध्यमकाव्यनिर्णयोऽष्टमी प्रभा.

End: **नवप्रभः** संप्रति **काव्यकौस्तुभः** प्रभाति **विद्यैकविभूषणेन** यः ॥

आलोकतस्तस्य जनैः सुबुद्धिभिः परीक्षतामेष तु काव्यपूरुषः ॥ १ ॥

विद्याभूषणगदितं गदितं तंत्रं **काव्यकौस्तुभं** विभ्रत् ॥ तिष्ठति यदि कमनीयो नमनीयोसौ न किं सदसि ॥ २॥

इति **काव्यकौस्तुभे शब्दार्थलंकारनिर्णयो नवमी** प्रभा ॥ ९ ॥ संवत् १८३१ भाद्रपदशुक्लप्रतिपत्तिथौ भौमे ॥ शुभं भूयात् ॥ लिष्यतं **नंदकेश्वरब्राह्मण ब्रह्मपूरीमध्ये** ॥ ॥

११५०.

२०८. काव्यप्रकाशटीका उदाहरणप्रदीपः । नागेशभट्टः.

UDÂHARAṆAPRADÎPA, a commentary on MAMMAṬA'S KÂVYAPRAKÂS'A, by NÂGES'ABHAṬṬA.

Beginning: श्रीगणेशाय नमः ॥ स्वाधीनपतिका काचिदसकृदुपभुक्तेष्वपि वरोपकरणादिषु उत्कटासक्त्या तेषामत्यंतोपादेयतां सूचयन्ती सखीमाह यः कौमारेति अत्र तच्छब्दा उपभुक्तत्वार्थकाः हि शब्दो यद्यप्यर्थकः स च सर्वत्रान्व[न्वे]ती

अस्ति क्रियाध्याहारश्च यः कौमारहरः वरः यद्यपि स एवास्ति चैत्रक्षपा यद्यपि ता एव संतीत्यादिक्रमेणान्वयः कौमारं बाल्यं परमरसिकतया तत्रापि संभोगेछोत्पादनेन हृतवान् कौमारं अभिच[न]त्रयौवनंमित्यर्थो न चारु निषिद्धलक्षणापत्तेः.

End: इति **श्रीमदुपाध्यायोपनामकनागोजिभट्टकृते उदाहरणप्रदीपे** दशम उल्लासः ॥

११६४.

२१५. **काव्यप्रकाशटीका** । पण्डितराजः.

KÂVYAPRAKÂS'AṬÎKÂ by PAṆḌITARÂJA.

Beginning: श्रीलम्बोदराय नमः ॥

रघुवंशजलधिचंद्रं रावणवनदन्तिपारींद्रं **सीताविपिनमयूरीमुदिरमुदारं** महः कलये ॥
मौली निधाय पाणी वाणीमनिशं नमस्कृत्य । **पंडितराजः** कुरुते **टीकां काव्यप्रकाशस्य** ॥
इयतापि वुद्धिविभ[ा]वेन मोहतो यदमुष्य भावशतवर्णनोद्यमः ॥
अपि सत्सु सत्सुगुणभारगौरवादर[व]धेहि वाणि करवाणि साहसं ॥
वालिशादपि वक्रहृदः कुलिशादपि कठिनकर्म्माणः । गरलादपि मर्म्मभिदो ये केचन तान्नमस्कुर्म्मः ॥
हरमौलिगलितगंगावीचिविचित्राशयाः सुधियः । मत्कृतिमतिदीर्वदयादृक्पातसुधारसेन सिंचंतु ॥

प्रथमतः प्रेक्षावत्प्रवृत्तिनिमित्तत्वेन प्रयोजनाभिधेयसंवंधस्याभिधातुमुचितस्यानभिधानाभा[द्वा]रतीस्तुतिनत्यात्मकमंगलस्य समाप्तौ व्यभिचारात् फलांतरस्याभावादफलस्योपनिवंधनाच्च ग्रंथकर्त्तुर्भ्रांतत्वेनानवधेयवचनत्वशंकान्निराकृत्य प्रथमश्लोकमवतारयति ग्रंथारंभ इति ॥

The MS. breaks off after the ii. Ullâsa:

Fol. 31: इति **श्रीपंडितराज**विरचितायां **काव्यप्रकाशटीकायां द्वितीयोल्लासः** ॥ शब्दार्थयोर्व्यंजनाश्रयत्वेन काव्यत्वमित्युक्तं तत्र शब्दस्य व्यंजकत्वमुदाहृतं इदानीमर्थस्य व्यंजकत्वमुदाहर्त्तुमर्थाननुवदति अर्था इति यद्यपि सर्वेषां प्रायशोर्थानामित्यादिनार्थव्यंजकत्वमुदाहृतमेव तथापि तत्र लक्षणेऽसंभववारणाय संप्रति तु प्राधान्येन सहकारिविशेषाभिधानेनेति न वैयर्थ्य···.

११७०.

३५१. **काव्यप्रकाशटीका श्लोकदीपिका** । गोविन्दठक्कुरः.

S'LOKADÎPIKÂ, a Commentary on MAMMAṬA'S KÂVYAPRAKÂS'A, by GOVINDA ṬHAKKURA.

Beginning: श्रीगणेशाय नमः ॥

गृह्णंतौ दधिभाजने सुमहती हस्तौ विहस्तौ मम त्वं कृष्ण[:] स्खलदंचलंनियमयेत्यभ्यर्थितो **राधया** ॥
स्पृष्टे वाससि नीविविश्लथतया तस्याः परं व्यग्रतां पश्यन्पेशलचारुस [ा]स्मितमुखः पायात्स मायार्भकः ॥ १ ॥

काव्यप्रदीपेन हरेः प्रसादात्काव्यप्रकाशस्य विविच्य भावं ॥
तत्रत्यपद्येषु निगूढमर्थं **गोविंदशर्मा** प्रकटीकरोति ॥ २ ॥

यः कौमारेति ॥

End: इति मह[ा]महोपाध्यायठकु[कु]रश्रीगोविंदकृतायां **श्लोकदीपिकायां नवम** उल्लासः ॥ श्रीः ॥ संवत् १७६८ वर्षे चैत्रमासे शुक्लपक्षे द्वादश्यां भौमवासरे लिखितमिदं पुस्तकं **तुलारामेन.**

११७९.

३४३. **दण्ड्यलंकारटीका** । विवृतः वादिघंघलः.

DANDYALAMKÂRAṬÎKÂ, a Commentary on DÂṆḌIN'S KÂVYÂDARS'A by VIVṚITA VÂDIGHAÑGHALA.

Beginning: श्रीगणेशाय नमः ॥ तदेवं श्लेषप्रसादादिशब्दालंकारस्वरूपं मार्गविभावनानिरूपणमभिधाय साधारणमुभयमार्गव्यापकं स्वभावताख्यानादिभाविकपर्यंतमधुना **द्वितीयपरिछेदेनोच्यते** । तत्रालंकारेषु प्रचक्षत इत्यनेनास्य प्रकरणस्य शब्दविभागरूपस्यालंकारादिविषयत्वप्रतिपादनादभिधेयत्वाभावमपाकरोति ॥

Fol. 40: इति **दंडिकृतालंकारस्य टीकायां द्वितीयः परिच्छेदः ॥**

Fol. 41: श्रीगणेशाय नमः ॥

विवृतः श्रीधरं नत्वा सत्यवाक्यं जगत्पतिम् **दंडिनोऽलंकृतेष्टीकां** कुरुते **वादिघंघलः** ।

वैदर्भगौडीयमार्गविभावनाय परिच्छेदे माधुर्यमावि[च]ख्यातु[सु]नाचार्येण तद्रूपातिदि(?) यदा शक्तिः सानुप्रासा रसावहेत्यनुप्रासप्रसंगेन वर्णावृत्तिरनुप्रासलक्षणाधिकारे प्रसंगतो यमकमप्युद्दिष्टं तत्तु नैकांतमधुरमतः पश्चाद्विधास्यत इति न प्रपंचितम् ।

End: इति **दंड्यलंकारटीका** समाप्ता ॥ शुभम् ॥ संवत् १८६१ आषाढकृष्णत्रितीयाया सोमवासरे समाप्त शुभमस्तु ॥ ॥

११९०.

२४०. **कुवलयानन्दव्याख्या अलंकारसुधा** । नागेशभट्टः.

ALAMKÂRASUDHÂ, a Commentary on APYADÎKSHITA'S KUVALAYÂNANDA, by NÂGES'ABHAṬṬA.

Beginning: श्रीगणेशाय नमः

उत्तेजितनुतभाग्यं श्रृंगाररसान्यदत्तवैराग्यम् ॥
आहतनतदौर्भाग्यं कामं कलये कपालिसौभाग्यम् ॥ १ ॥
गंगां तरलतरंगां कामं करुणविलसितविहंगां
नततितितामसभंगां कलयाम्यनंगरिपुसंगां ॥ २ ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ॥
श्रृंगवीरपुराधीशाद्रामतो लब्धजीविकः ॥ २ ॥
उपाध्यायोपनामा नागेशभट्टशर्मा तनोति सुधीं ॥ ३ ॥
अलंकारसुधाख्यां व्याख्यां कुवलयानंदस्य ॥ ३ ॥

ग्रंथसमाप्त्यादिप्रतिबंधकशमनाय शृंगारालंबनविभावतया समुचितगौरीचरणाशीर्वादरूपं मंगलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषंगतो मंगलाय च निवध्नाति ॥ अमरीति ॥

Fol. 20: इत्युपाध्यायोपनामकशिवभट्टसुतसतीसतीगर्भजनागोजीभट्टकृतायां कुवलयानंदव्या[ख्या]यां अलंकारे[र]सुधाख्यायां उपमाप्रकरं[णं]समाप्तिमगमत् ॥ ॥

The MS. breaks off in the *Utprekshâprakaraṇa* with:

Fol. 41: वित्रिजयदेवस्तु उत्प्रेक्षोन्मीयते यत्र हेत्वादिर्निह्नुतिं विनेत्याह[:] धानामपि प्रत्येकं द्वैविध्यमाह उक्तेत्यादि । अःत्र (!) आसाम[मु]त्प्रेक्षाणां मध्ये आद्या[द्या] वस्तूत्प्रेक्षा । उक्तानुक्ते आस्पदे धर्मिरूपविषयौ यस्याः सेत्यर्थः एवं सिद्धास्पदे इत्यत्रापि । एव[वं] सिद्धानां षणामुत्प्रेक्षाणां क्रमेणोदाहरणा….

११९१.

२१३. कुवलयानन्दीयविषमपदव्याख्या षट्पदानन्दः । नागेशभट्टः.

SHAṬPADÂNANDA, a commentary on APYADÎKSHITA'S KUVALAYÂNANDA, by NÂGES'ABHAṬṬA.

Beginning: ॐ श्रीगणेशाय नमः गौरीचरणपंकजमित्यंशे परिणामः अमरीत्यादिविशेषणस्य साभिप्रायत्वात्परिकरः कवरीभारे सौगंध्यादागता भ्रमर्य इत्यर्थः सुरांगनानिष्टगौरीविषयकभावः कविनिष्टंतेपुंच्छातीति(?) प्रेयोलंकारोपि परस्परेति । परस्परतपःसंपदः फलायितं परस्परं ययोरिति विग्र[ग्र]हः मातृत्वादिकं च मायेश्वरकार्मत्वाज्जगतः जायापती[:] गौरीशिवौ ।

End: अलंकारेषु वहुषु दधानेष्वपि साम्यकं वैलक्षण्यं प्रतिव्यक्ति प्रतिभाति मुखेष्विव ।
अलंकारप्रकारेषु मघनास्या मनीषिणां स्वर्णादिरचिते नूत्नेलंकारे न च शिल्पिना
कथं न जायते नास्था सुहृदां प्रतिभावताम्

शरदागमसंभव इति शरदागमात्संभवः प्रको[का]शो यस्येत्यर्थः कुवलयानंदे रसगंगाधरोद्भावितदूषणोद्धारस्त्वंस्मत्कृतरसगंगाधरमर्मप्रकाशे द्रष्टव्यः इति श्रीकालोपनामकनागेशभट्टविरचितः कुवलयानन्दीयविषमपदव्याख्यारूपः षट्पदानंदाख्यो ग्रंथः समाप्तः ॥ ॥

१२२१.

५७२. रसमञ्जरीटीका रसमञ्जरीविकासः । गोपालः.

RASAMAÑJARÎVIKÂSA, a commentary on BHÂNUDATTA'S RASAMAÑJARÎ, by GOPÂLA.

Beginning: ॐ श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥

निगमानुगीतकीर्त्तिं चिंतितमूर्त्तिं विरिंचिकृष्णाद्यैः ॥ नाशितभक्तजनार्तिं तं वंदे दक्षिणामूर्त्तिम् ॥ १ ॥
भूषितभस्मपरागः कृतांगरागः कचिज्जटामुकुटी ॥ फणिहारभूषणगात्रस्त्वर्द्धकलत्रः शिवो जयति ॥ २ ॥
विलसति नूतनभूतं विस्तृतभूतं मुखेषु भूतानां ॥ अद्यापि वाङ्मयं तन्नुदतु महो ममांतरं तिमिरम् ॥ ३ ॥
उत्कृत्तविघ्नमूलं सर्व्वस्य भजंतमनुकूलम् ॥ विद्यालतालवालं शिववालं नमानि गजभालम् ॥ ४ ॥
आत्मीयदत्तसिद्धिर्नतकृतबुद्धिस्तथा च कृतऋद्धिः ॥ शोषितविपक्षवृद्धिः कुलदेवो विठ्ठलो जयति ॥ ५ ॥

भाष्यद्रुमालवालं शेषोन्यस्सकलकलापरनामा फणिपतिगुरुमीड्यतमं तमहं विज्ञानदं वंदे ॥ ६ ॥
श्रीनृसिंहाचार्यसंज्ञं तातं गुणगणान्वितं ॥ गौरीमिव गुणैर्युक्तां सुखांबां च नमाम्यहं ॥ ७ ॥
अस्ति स्वस्तिनिकेतनं धृतयशाः कौंडिन्यवंशोद्भृताचार्याख्यो गुणवांश्च यस्त्वपि विधुस्त्वेकः सुधाशीकरः ।
मत्तः के ननु वाक्सुधाद्रवभृतग्रंथप्रपानंदिनो विद्वांसः कति ना भवन्निति महान् क्षीराब्धिना स्पर्द्धते ॥८॥
श्रीमद्विठ्ठलपादसेवनपरिप्राप्तेड्यवाग्देवतापूर्व्वग्रंथविधानदीक्षितधियस्तेनंतरामादयः ॥
गोपालं च पितामहं समवधीकृत्य प्रियं भावुकाः पूर्वे यस्य जयंति तत्र वसुधागीर्वाणगीर्वाणकाः ॥ ९ ॥
यो विद्यानिखिलमहार्णवाऽवगाही धत्ते यः सकलकलोपनाम सार्थं ॥
यत्कीर्त्तिर्भुवि वितता स मेंगनाथो विप्राग्र्यो जयति यस्य सान्वतातः (?) ॥ १० ॥
अन्वर्थक्यं नान्यलभ्यैर्विशेषैर्धत्ते यस्योन्मोदते वा पयोष्णी ॥
कन्येवी[वां]तार्विंध्यसह्यागवाह्वोः प्रख्यं राष्ट्रं तन्महाराष्ट्रमस्ति ॥ ११ ॥
तत्राजस्रकृतोषितः स जवलग्रामेलकासोपमे गोपालात्मजनृसिंहतनयो गोपालनामा बुधः ॥
साहित्यार्णवपारगस्य वचसां भानोर्म्मनोहारिणीं व्याख्यां पुख्यतमां पदार्थविधिविद्बोधात्तनोति स्फुटाम् ॥१२॥
क्रीडासहं यः कुरुते शिरीषमम्लानयन्वा रसमुद्धरन्नपि ॥
अवाच्यतां याति विवेचयन्सः साहित्यमार्गेनिपुणः कदापि वा ॥ १३ ॥
वाग्जालमाकलयतापि सुपद्यदूत्यभावोधृतिरस्त्वचिरेण कथं सुलभ्या ॥
वल्लीवितानमनुसंतति गाहमानः कीशोपि किं नु कुसुमावचितौ विदग्धः ॥ १४ ॥
कलयन्नपि तर्क्ककर्कशोक्तीर्न्न हि साहित्यकलाविदां समः स्यात् ॥
अपि यत् द्विजतां सवर्णतां वा न हि काकः पिकरम्यनिस्वनोस्ति ॥ १५ ॥
दधतोप्यतस[न्]रतुशास्त्रवृत्तिं न हि साहित्यकलासु ते प्रवीणाः ॥
दृषदामनुधायिनः पुलिंदा न हि पुष्पन्यसनेपि ते प्रवीणाः ॥ १६ ॥
शिवपूजनमंतरेण लभ्यं न हि साहित्यविदः त्वमेकमेव ॥
पुनरेव यदीदमस्ति शास्त्रे सह लभ्यं किमतः परं हि भाग्यम् ॥ १७ ॥
इति यद्यपि शास्त्रचंचुना बुधसाहित्यमजानता मयापि ॥
विवृतिर्वचसस्तथाविधस्येत्युपहासाय तथापि नोपहास्यम् ॥ १८ ॥
स्तोकं किंचिदिह ब्रवीमि सुजनाः प्रासंगिकं विस्तराद्गीतेस्तत्कलयंतु निर्म्मलतया शोध्यं तथा चाथ सत् ॥
सांमन्यं यदि कुत्रचित्तदिह चा[च] प्रोच्येत सच्चेतसां प्राचां तद्भरतादिकाव्यरसिक[ा]मत्रावधार्यं बुधैः॥१९॥

इह खलु यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृत्तये कांतासंमिततयोपदेशयुज इति प्राचीनवचनप्रामाण्यात्काव्यस्य कीर्त्याद्यनेकमनीषितसंपादिकतामनुगच्छंस्तदऽदोषौ शब्दार्थौ सगुणावऽनलंकृतीति तत्सचिवतया विशिष्टत्वं तदितरस्य काव्यालापत्वेन काव्यालापांश्च वर्ज्जयेदिति निषेधं चानुजानन् रसमंजरीनामकग्रंथविशेषं चिकीर्षुर्भानुकरनामा कविः चिकीर्षितनिर्विघ्नपरिसमाप्तिप्रचयगमनप्रयोजनविशिष्टशिष्टाचारानुमितमंगलाचरणमनुमत्याशीर्न्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीरायन्यतमस्य प्रबंधमुखलक्षणत्वाच्च प्रकृते परमेश्वरलक्षणं वस्तु निर्देशन्नाक्षेपलब्धनमस्क्रियालक्षणं मंगलाचरणमातनुते ॥

End: इति रसमंजरीविकासो गोपालाचार्यविरचितः सोयं ॥ प्राप्तः समाप्तिमीड्यः कुसुमैरेकादशभिर्युतो रम्यैः ॥ ११ ॥
स्फुटरम्यरसेन भावभाजः सुरभित्वेन तथैव तर्यतं ॥ युवतीगणना चकास य कंतमो नांचति मंजरीविकासं ॥ १ ॥

अल्पस्थत्वाद्बुद्धिवैकल्यहेतोरत्रैक्तं स्याद्यन्मया वाप्यवद्यं ॥
तत्साध्वारतां सद्वचोयोगतोयो हेमत्वं यात्येव निध्यशन[श्म]योगात् ॥ २ ॥
यद्यमुत्र गुणा गुणेष्वपि बुधा[:] क्षीरं विहाय ध्रुवं हंसाः क्षीरलिहो यथा गुणपरा निंद्यास्पृशः केवलं
तत्वं ह्यरसं विहाय सततं रक्तैषिणी रक्तपा तद्वद्यूयमसत्प्रियाः सदमुदो मा सा[मा] भवध्वं वृथा ॥ ३ ॥
अवद्यमनवद्यं वा चापल्याद्यन्मयोदितं ॥ कृपयेतदनुमाह्यमंजलिर्वो निवध्यते ॥ ४ ॥
प्रतिपदमपि **भानो**रत्र वाणीविलासे यदपि हृदयहारि ध्वन्यमाभासतेन्यत् ॥
प्रकटितमलसेन ग्रंथवाहुल्यभीत्या न हि तदपि मयैतद्गूढसाहित्यभाजां ॥ ५ ॥
आचार्यापरनामक[:] सुमतिमान्कौंडिन्यगोत्रोद्भवो **गोपाल**स्त्विति **बोपदेव** इति वा गृह्णाति नामद्वयं ॥
तेनायं युगरंध्रवेदधरणी (1484 ?) गण्ये गिरो वत्सरे **मंजर्य्या**स्तु **विकास** एष रचितो भूयात्सतां प्रीतये ॥ ६ ॥
त्रिमल्लपितृतः कविश्वरशिरोरत्नाद्यत्रोनीरधेरुत्पन्नपिकपर्वतगणयु – यो नागराजाह्वये ॥
तेनेदं **रसमंजरीविकसनं** स्वार्थ परार्थं तथा प्रालेखि स्वकरेण सन्मतिमतामस्तु प्रमोदाय तत् ॥ १ ॥
वेदज्येषुक्षोणिभिः संमिताब्दे माघामाया मंगले वासरे च ॥
ढुंढिः पुस्तं **मंजरीकाविकास**नाम श्रीमद्वाणतीर्थे विलिख्यत् ॥ २ ॥
रसमंज – – कारीविकासतीर्थे **वाणेश्वरे** च सोल्लासं ॥ अलिखद्विरिविरजासन्नत्वात् – – – – जैनावासं ॥ ३ ॥

इति **श्रीमन्नृसिंहाचार्यसुतश्रीगोपालाचार्यकर्तृकमंज – – कासाभिधानरसमंजरीटीका** समाप्ता ॥
शुभमस्तु सर्वजगताम् ॥ – – – – तमिदं पाठकेन **गीतारामेण** ॥ भाद्रपदे मासि कृष्णपक्षे चतुर्थ्यां तिथौ सो – – – – लिखित-मिदम् ॥ श्रीमारमणचरणारविंदसेवकस्य **गीतारामस्येदं** – – – – –.

१२२७.

४०५. रसरत्नहारटीका लक्ष्मीविहारः । शिवरामः.

RASARATNAHÂRA, with a commentary called LAKSHMÎVIHÂRA, by S'IVARÂMA TRIPÂṬHIN.

Beginning: Text. निरीक्ष्य विष्णोश्चरणारविंदनखेषु लक्ष्मीः प्रतिविंवमस्मात् ॥
दशावतारादपि मन्यमाना स्वाधिक्यमास्ताद्विदुषां सुखाय १
उद्बध्यते सर्वविचक्षणानां प्रीत्यै मयायं **रसरत्नहारः** ॥
गुणैरुपेतोखिललब्धवर्णकंठे स्थितः स्याद्विदितो दिगंते २ ॥

Commentary. श्रीगणेशाय नमः ॥
सीताकराब्जमृदुलालितपादपद्मस्तस्या मुखं जलजसुंदरमीक्षमाणः ॥
रत्यन्वितस्य मदनस्य रुचिं दधानः श्रीमान् रघुप्रभववंशपतिर्विरेजे ॥ १ ॥

ग्रंथादौ कृतमंगलं शिष्यशिक्षायै निवध्नाति निरीक्ष्येति विष्णोश्चरणारविंदनखेषु स्वीयं प्रतिविंवं निरीक्ष्य दशावतारादपि अस्मात् विष्णोः स्वाधिक्यं मन्यमाना लक्ष्मीः विदुषां सुखायाऽऽसाकल्येन स्तात् भवतु विष्णोः पादसेवनं कुर्वाणा लक्ष्मीः पादनखेषु दशसु स्वीयं प्रतिविंवं ईक्षमाणा एकादशींमात्मानं ज्ञात्वा विष्णोराधिक्यं मन्यमानेतिभावः स्त्रीस्वभावादियत्येव धीः

समुत्पन्ना न साम्यपर्यंतं यद्वा । भगवता तिर्यगादियोनिषु जन्म विडंबयता दशावता[राः] संपादिताः मया तु वक्षस्थलस्थितयैव स्वरूपादप्रच्युतया चेति स्वाधिक्यं मन्यमानेति भावः ॥ १ ॥ उदिति सर्वविचक्षणानां प्रीत्यै मयायं **रसरत्नहार** उद्गथ्यते गुणैरुपेतः अखिललब्धवर्णकंठस्थितो दिगंते प्रथितः स्यात् आशीरलंकारः आशी[र]र्नामाभिलषिते वस्तुन्याशंसनं यथेति दंडी ॥ २ ॥

End: Text. जगति यद्यपि संति परःशता गुरुतमा रचना बुधबुद्धये
नतु तथापि मया न वृथा कृतागुरुतमा रचनाबुधबुद्धये ।
गुरुपादांबुजद्वंद्वप्रसादावाप्तसन्मतिः **त्रिपाठी शिवरामाख्यो हारं** पूरितवानमुं २ ॥

इति **त्रिपाठिशिवरामकृ॰ रसरत्नहारः** समाप्तः ॥

Comm. जगतीति शतात्परे परशताः परःशताद्यास्ते ये[स्ते]षां परा संख्या शतादिकादित्यमरः नतु इति वाक्यालंकारे अगुरुतमा रचना अबुधबुद्धये बालबोधाय इति **श्रीशिवरामत्रिपाठिकृतो लक्ष्मीविहारः** समाप्तिमगात् श्री.

१२३१.

८०४. **वाग्भटालंकार**टीका **समासान्वयटिप्पनम्** । क्षेमहंसगणिः.

SAMÂSÂNVAYATIPPANA, a commentary on the VÂGBHAṬÂLAṀKÂRA,
by KSHEMAHAṀSAGAṆI.

Beginning: ॐ श्रीगणेशाय नमः

ॐ श्रीमान् श्रीआदिनाथः श्रियमिह दिशतु श्रीयसीं भूयसीं वो बिभ्राणः सौरभीयं हृदयगतशिख[व]ः शंकरः शंकराभः ।
सेव्यो भूत्यै विभूत्या परिकलिततनुर्वर्णनीयो द्यहीनैर्बिभ्रद्वर्णं सुवर्णं तुहिनशिखरिणा भाति यः कामजेता ॥
प्रभावविभवावासं प्रतिभादानदक्षिणं स्पृशामि शिरसा शौचगुरुं पादरजःकणम् ।
बालानामवबोधाय स्वस्यार्थस्मरणाय च **वाग्भट्टालंकृतेः** कुर्वे व्याख्यां संक्षेपयुक्तितः ।

तत्र शास्त्रस्याविघ्नेन परिसमाप्त्यर्थं **श्रीवाग्भट्टदेवो** विशिष्टेष्टदेवतानमस्कारमाह श्रियमिति.

Fol. 26: **वाग्भट्टालंकारे समासान्वयटिप्पने** च **क्षेमहंसगणि**कृते चतुर्थः परिच्छेदः ॥ ४ ॥

End: **क्षेमहगगणेः**(!) साधोरियं कृतिरनुत्तरा **वाग्भट्टालंकृते**रेषा व्याख्या सर्वजनप्रिया ॥ ३७ ॥

इति **श्रीवाग्भट्टालंकारे** पंचमः परिच्छेदः ॥ ५ ॥ शुभमस्तु सर्वजगतां ॐ नमः सरस्वत्यै ॥

१२३८.

५५५. **विदग्धमुखमण्डन**टीका **सुबोधिनी** । त्रिलोचनः.

SUBODHINÎ, a commentary on DHARMADÂSA'S VIDAGDHAMUKHAMAṆḌANA,
by TRILOCHANA.

Beginning: श्रीमहामंगलमूर्त्तये नमः ।

सिद्धौषधानि भवदुःखमहागदानां पुण्यात्मनां परमकर्णरसायनानि
प्रक्षालनैकसलिलानि मनोमलानां शौद्धोदनेः प्रवचनानि चिरं जयंति ॥ १ ॥

सिद्धौषधानीति **शौद्धोदनः शाक्यसिंहस्य** प्रवचनानि चिरं जयन्ति कीदृशानि वाक्यानि भवदुःखमहागदानां सिद्धौषधानि भवस्य संसारस्य दुःखानि जन्ममरणादीनि तान्येव महागदा अशक्योपचारा रोगास्तेषां पुनः कीदृशानि परमकर्णरसायनानि-श्रोतव्यानीत्यर्थः १

End: इति **श्रीधर्मदासविरचिते विदग्धमुखमंडने** चतुर्थपरिच्छेदः इति नानाविधिप्रश्नोत्तरजातिरम्यं **श्रीविदग्धमुख-मंडनशास्त्रं** समाप्तं

टीका सुबोधिनी नाम **विदग्धमुखमंडने त्रिलोचन**कृता रम्या वर्त्ततां विदुषां मुदे ॥
त्रित्र्यब्धं[ब्धे]कमिते शाके वैशाखे कृष्णपक्षके **जलालावादनगरे**ह्यलिखत्प्रे**मवल्लभः** ॥ ॥

१२४३.

४१३८. ख. **शृङ्गारामृतलहरी** । सामराजदीक्षितः.

S'ṚIÑGÂRÂMṚITALAHARÎ, by SÂMARÂJA DÎKSHITA.

This MS. appears to have been transcribed about 1875 from a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: श्रीगणेशाय नमः ओम् ॥

सिंधुसुताकुचकुंकु[म]पाटलवक्षःस्थलं किमपि उपवीणितं च निगमैः सटाजटालं महः कलये ॥ १ ॥
नरहरिविंदुपुरंदरजनुषा विदुषाथ **सामराजेन शृंगारामृतलहरी** विरच्यते रसिकजीवातुः ॥ २ ॥

तत्र तावद्रसो विचार्यते ॥ स्थायिभावो रतः ननु स्थायित्वव्यपदेशतया रसस्य नैरंतर्यायति मैवम् ॥ विरुद्धाविरुद्धभावान-भिभाव्यतया स्थायित्वव्यपदेशो न तु मितयता ॥ उक्तं च **भरतेन**

विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः ॥ आनंदाङ्कुरवीरोसौ भाव स्थायिपदास्पदं ।

End: अनुभावव्यभिचारभावाश्च ग्रंथांतरेपूह्याः ॥ इह ग्रंथगौरवान्न लिखिताः ॥ इति श्रीकविकुलतिलक**नरहरिविंदु-पुरंदर**कुलोतंसश्री**सामराजदीक्षित**विरचिता **शृंगारामृत**लहरी संपूर्णः शुभम्.

१२४६.

३३५. **सरस्वतीकण्ठाभरणविवरणम्** । जगद्धरः.

A commentary on the SARASVATÎKAṆṬHÂBHARAṆA, by JAGADDHARA.

Beginning: श्रीगणपतये नमः ॥ इदानीमुभयालंकारविवेचनाय चतुर्थं परिच्छेदमारभते । शब्देभ्य इति यासूभयालंक्रिया-स्विवादिभ्यः शब्देभ्यो विशिष्ट उपमादिरूपोऽर्थो ज्ञायते । ता उभयालंक्रियाः स्युः । की — — । कवीनां प्रियाः प्रीतिविषयाः उपमादीनां कविसर्वस्वायमानत्वात् शब्दश्चार्थश्चेत्युभयं । सह तुल्ययोगितया वर्त्तते सतुल्ययोगितः । एवमि-तरेष्वपि । परिष्कृतिः परिकरः । भाविकैरिति सहार्थे तृतीया ॥ उपमालक्षणमाह । प्रसिद्धेरिति ।

End: रत्नं रत्नधरोऽजनिष्ट गुणिनामाद्योऽनवद्यः सतां सा शुद्धा **दमयंतिका**पि सुषुवे नैयायिकं यं सुतं ।
तस्य **श्रीशजगद्धरस्य** कवितुर्वाणीगलालंकृतेष्टीकायामुभयप्रकाशनपरिच्छेदश्चतुर्थो गतः ॥ * ॥

इति **महामहोपाध्याय**धर्माधिकरणिक**श्रीजगद्धर**विरचिते **सरस्वतीकंठाभरणविवरणे** चतुर्थः परिच्छेदः ॥ * ॥ शुभमस्तु शकाब्दाः १५२१ अग्रहणशुदि पंचमीं सोमवारे समाप्तमिदं ॥ श्री**गौडदेशां**तर्गतयाजिग्रामनिवासिना श्रीहरानंदसिंहेन काश्यां लिखितं पुस्तकं * संवत् १६५६ श्रीः.

१२५४.

२३८. साहित्यसुधासिन्धुः । विश्वनाथः.

Sâhityasudhâsindhu, by Vis'vanâtha.

Beginning: श्रीगणेशाय नमः ॥ वाग्विलासिन्यै नमः ॥ गुरवे नमः ॥

उत्तालतालस्फुरदंघ्रिपातप्रजातपातालभुजंगकंपं ॥
अभ्रांतविभ्रांतकपर्दजालविस्रस्तताळं कलये नटंतं ॥ १ ॥
उत्तालांघ्रिप्रपातस्फुटितवसुमतीरंध्रनीरन्ध्रनिर्यत्पातालांभःस्रवंतीस्नपनसिमिसिमाकारिलालाटनेत्रं ।
ऊर्ध्वव्याधूतभोगीश्वरवररचितायासनिश्वसरिंगद्गंगाकल्लोलजालं कलयतु विभवं धूर्जटेनाट्यलीला । २ ॥
चंद्रचूडप्रियापांगसंदोहानंदनिर्भरः विदधाति कविः कोपि **सुधासिंधुतरंगितं** ॥ ३ ॥

इह खलु सामाजिकपरीक्षितमेव काव्यं स्वर्गापवर्गादिजनकमिति तत्परीक्षार्थमयमारंभः । अत एवोक्तं **काव्यप्रकाशे** । काव्यं यशसे इति । अत एवान्यत्र अदोषं गुणवत्काव्यमलंकारैरलंकृतं । रसान्वितं कविः कुर्वन्कीर्तिं स्वर्गं च विंदतीति । तत्रादौ काव्यलक्षणमाह ।

जायते परमानंदो ब्रह्मानंदसहोदरः । यस्य श्रवणमात्रेण तद्वाक्यं काव्यमुच्यते ।

Fol. 4: इति **श्रीसाहित्यसुधासिन्धौ** प्रथमस्तरंगः; Taraṁga ii. completed fol.8; Tar. iii. fol. 23; Tar. iv. fol. 24; Tar. v. fol. 42; Tar. vi. (गुणनिर्णयो नाम) fol. 47; Tar. vii. (शब्दालंकारमार्जनं) fol. 52.

End: आस्ते **धारासुराख्यं** नगरमतिलसत्केशवोद्दामधामप्रभ्राजत्कीर्त्तिपूरं विलसति सविधे यस्य **गोदावरी** सा ।
तत्रत्योऽ**नंतदेवा**त्मज इह वसतिं **मुक्तिपुर्यां** स---क्रे तस्यांगजस्योल्लसति कृति--------भिधस्य ॥ ॥
प्रबलकर्कशतर्कविचारणोल्लसितकाव्यसुलक्षणलक्षिता ।
त्रिमलदेवतनूजवि----मतां वितनोतु मनोमुदं ॥ ॥

इति **श्रीत्रिमलदेवतनयविश्वनाथ**विरचिते **साहित्यसुधासिंधौ** अर्था--------नामाष्टमस्तरंगः ॥ ॥
समाप्तोयं ग्रंथः ॥ ॥ कृतिरियं **विश्वनाथस्य** ॥ ॥ शुभं भवतु ॥ ॥------५ समये पौषशुदि ११
वारबृहस्पति । तद्दिने पुस्तकं लिखितं ॥ ॥ रामो जयति ॥ ॥ राम ॥

Then follows in another handwriting:

कीर्त्तिशेषं गते तैस्तैर्गुणै**र्विक्रमभूभुजि** ॥ महांभोधिरसन्यो ---संवत्सरक्रमे ॥
एकादश्यां गुरौ स्वीयः **सुधासिंधु**र्विलेखितः ॥ **पत्तने चंद्रचूडस्य विश्वनाथेन** धीमता ॥ २ ॥

१२६९.

५६०. **अमरुशतकटीका** । ज्ञानानन्दकलाधरः.

AMARUS'ATAKA, with a commentary of JÑÂNÂNANDA KALÂDHARA

Beginning: श्रीगणेशाय नमः

विद्या वितरति मुक्तिं भुक्तिमविद्या च तां भजिष्यामः या च रमा चरमा या शक्तिः सा नः शिवं दिशतु १
तदुभयरसपरिपाटीपरिहृतवाटीमिमां रम्यां कुरुते**ऽमरुशतटीकां ज्ञानानंदकलाधरः** २
योसौ भाग्यवता विभक्तवलितज्ञानामृतानंदथुर्यो **वात्स्यायनकामतंत्र**विलसत्केलिक्रियाकौशलः
व्याचक्षेत्र रसद्वयं कविकुलालंकारचूडामणिः श्रीलक्ष्मीरविचंद्र एष पिशुनां मात्सर्य्यतामुत्सृजन् ३
यदि स्यात्परमानंदे रमानंदे च वासना तदा संसेव्यता[तां] धीरा टीका[के]यं कामदा सदा ४
क चातिकर्कशः शांतः क चातिललितः शुचिः एकत्र वाक्य वाख्यातुंस्तावद्दो कौशलः कवेः ५

निर्विघ्नं प्रारीप्सितशतसमाप्तिकामो ग्रंथकृदिष्टदेवतां कीर्तयन्नाह ज्याकृष्टेति.

The MS. contains the text and commentary as far as the 25th verse, closing:

Fol. 10: तीर्थेषु तोयांजलिर्वंशतारणायेति चेत्तत्राह आभिरायातिभिस्त्वं त्वं ज्ञा च वसितश्च वंधः कः स्तीर्थेषु तोयांजलिः सन् ॰ प्रादेशः अपि तु स च वंधः सः स्नातः सर्वतीर्थेषु परंब्रह्मणि विंदतीति श्रुतेः एतेनैतदुक्तं भवति संसारवासनादृष्टिनितस्य तत्त्वज्ञानं जायते तस्मिंश्च सति वंशोद्धारणसर्वतीर्थफलं च जायते इति २५ संप्रति वालाया मानं वर्णयन्नाह सेति---.

१२७०.

३५६. **कवीन्द्रचन्द्रोदयः** । [कवीन्द्रः].

KAVÎNDRACHANDRODAYA, by KAVÎNDRA (?).

The first 10 leaves as well as foll. 15, 16, 31 are missing. The name of the work is found only on the margin of the leaves. The work is probably identical with the *Kavîndra-chandrodaya* described in L. No. 815 as the verses quoted there from the end of the Calcutta MS. are found also here, fol. 37. The author's name is not indicated in the Jammu MS.

Fol. 11: नाभिनालं मनस्त्वाश्रमाः पादतीर्थे पिवंति ॥ ५ ॥

कामाक्षा प्रथमप्रयाणसमये विद्यानिधान प्रभोरिंद्रत्वं तव मस्तके कृतवती **श्रीसाहिजाहामुखात्** ।
सा सद्यो भवतां प्रयच्छतु मुदा साम्राज्यलक्ष्मीं यदा श्रीमत्सर्वमनोरथाः फलभृतस्ते संतु पूर्णाशिषः ॥ ६ ॥

पूर्णानंदब्रह्मचारिणां षट् पद्यानि ॥ १११ ॥

कवींद्रस्वामिनां नाम विख्यातं भुवनत्रये । नात्र चित्रभिरभ्यां च सिद्धं तत्पदवाचकं ॥ १ ॥
काणादो जैमनिर्व्यासः कपिलो गौतमस्तथा ॥ **पतंजलिः** स्वयं साक्षात्**कवीन्द्रस्वामिदेवताः** ॥ २ ॥

अष्टादशसु विद्यासु निष्णातो जगतां गुरुः । कवींद्रस्वामिराजेंद्रो राजते रामचंद्रवत् ॥ ३ ॥
कवींद्रस्वामिनां नामग्रहणाद्दुःखराशयः । पलायंते हरेः संगात्तमसामिव राशयः ॥ ४ ॥
भट्टो नारायणः साक्षात्पुरासीच्छंकरः शिवः । तथैवात्र स्वयं कृष्णः कवींद्रस्वामिदंडधृक् ॥ ५ ॥
कमनीये भवेद्रामः कामो व नलनैषधः । गांभीर्ये सरितां नाथः कवींद्रस्वामिवाक्पतिः ॥ ६ ॥
हनूमान् भयनाशाय करतापनिवारणे । क्षुधांशू रामभद्रोपि कवींद्रस्वामिशंकरः ॥ ७ ॥
सर्वोपकृतये विद्याधीता गीता सुनिश्चिता । गोब्राह्मणभयत्राणे कवींद्रस्वामिभास्करैः ॥ ८ ॥
आचार्याचार्यहंसानां शंवट्तारजुषां सतां । कवींद्रस्वामिनां भक्त्या मुरलीशकृताष्टकं ॥ ९ ॥

कालिदासमिश्रपौत्रस्य मुरलीधरस्यैतानि नव ॥ १२० ॥

The MS. has no colophon, ending:

End: अंतः संतोषतोषो हसति रतिगतीर्जागतीर्जाग्रतीर्यः । सौवाग्नीरेव पश्यन् जनक इव पुनः किं नु रामः शुकः किं ॥
किं वा व्यासः सदासौ परमशमसुखास्वादवेत्ताधिरूढः सौघुरीं चित्स्वरूपो जयति मुनिवरः श्रीकवींद्रो यतींद्रः॥३१॥
✠ ॥ शुभम् ॥

१२७१.

४१३६. कितवोल्लासः । लक्ष्मणाचार्यः.

Kitavollâsa, by Lakshmaṇâchârya.

The MS. appears to be a recent transcript from a copy in the Library of H. H. the Mahârâja of Alwar.

Beginning: श्रीगणेशाय नमः ॥ अथ कितवोल्लासप्रारंभः ॥

श्रीबालाचरणौ नमामि सततं संपत्प्रदौ सुंदरौ स्वच्छप्रेंखितराजहंसमहिलापक्षस्फुरच्चामरौ
मुक्तिज्ञानकृपार्थकामसुकृतप्रागल्भ्यदानादरौ श्रीमद्देवजनाधिनाथललनावंदारुमस्ताकरौ ॥ १ ॥
चरणाक्रांतविबुधा श्रीबाला परमेश्वरी भतः मृताय सन्माता नित्यं विजयतेतरां ॥ २ ॥
प्रणामो मातर्मे भयविनाशाय सततं मम स्वांतं बाले चरणकमलं ते विलसतु
सदा वाणी मे त्वत्सुगुणपठनायास्तु यदयं परं किंचिल्लीलाललितपदगुंफो भवतु मे ॥ ३ ॥
प्रसन्नविमलाशयां समकरस्फुरत्कंकणां चलद्घनपयोधरां सुरतरूपशोभामहं
शरज्जलधिवैभवप्रसतिप्रावृडाखंडलस्थलीसमकलेवरां बहुलभक्तदेवीं भजे ॥ ४ ॥
क्षोणीमंडलपावनासितधुनीतीरोत्तरस्यां दिशि प्रायेणेंद्रसमानभाग्यवृषभारूढैर्जनैर्भूषिता
श्रीवैराजपुरी करिश्रुतिमदामतद्विरेफध्वनिस्माराविर्भवकामिनीकरसमाश्लिष्टान्यकांतास्ति वै ॥ ५ ॥
तस्यां संप्रति सामगा—यचलत्कल्लोलिनीभारभृत् वेणीमाधवसत्सुधांशुचरणप्राणोग्रणिर्लक्ष्मणः
तेनेयं कविनायकेन कितवोल्लासेन नाम्ना कृतिर्लोके निर्जररंजनाय रचिता संश्लाघनीया बुधैः ॥ ६ ॥

End: वैराजेंद्रपुरे सदा निवसता यो लक्ष्मणेनाधुना श्रीमत्सामगवंशनंदनभुवा प्रज्ञादलेन द्रुणा
वेणीमाधवबीजजेन कितवोल्लासः प्रसूनात्मकः श्रीबालापरमेश्वरिचरणयोर्न्यस्तो बुधैर्दृश्यतां ॥ ६८ ॥

शाके मारुतमित्रभूधरसुतापोतास्यभूभृत्क्षमाखे शालीवहभूपतै प्लववौ गौरे गुरौ सन्द्ररौ
यामे । दूषणनाशकेह्नि **कितवोल्लासोद्य** पूर्णः कृतो **वेणीमाधव**पादचिंतनफलः **श्रीलक्ष्मणे**नांजसा ॥ ६९ ॥

इति श्रीमद्रसालंकारतर्कपारावारतीरपारीणविचक्षणधुरीणकेतुवारणायमानसामगोपनामक**श्रीवेणीमाधवाचार्य**तनुजनिलक्ष्म-णाचार्यविरचित**कितवोल्लासे** सिद्धमनोरथाख्यस्तृतीयो विवासः समाप्तः ॥। श्री ॥।

१२८०.

४९२. ख. **किरातार्जुनीय**टीका । जोनराजः.

Commentary on the KIRÂTÂRJUNÎYA, by JONARÂJA.

Beginning: ॐ श्रीगणेशाय नमः ॐ नमः सरस्वतीपादुकाभ्यां ।
ॐ प्रसादगांभीर्यमनोरमश्रीरसप्रवाहं मधुरं स्रवंती
सरस्वतीवास्त्वतिपुण्यलभ्या सरस्वती वो मलशोधनाय
श्रीनोनराजतनयः कुरुजिच्चरित्रे पर्यायमात्रमभिधास्यति **जोनराजः**
किं नाम नामलमणिप्रगुणांस्तडाको व्याकोशयत्युदधिवत्तरलांस्तरंगान्
श्रीजैनोल्लाभदीनस्य साम्राज्ये **जोनको** द्विजः खर्षिविश्वमिते शाके यथामति यतिष्यते ॥
ॐ श्रियः **कुरूणाम**धिपस्य पालनीं प्रजासु वृत्तिं यमयुंक्त वेदितुम्
स वर्णिलिंगी विदितः समाययौ **युधिष्ठिरं द्वैतवने** वनेचरः ॥

The commentary on the last verse of Sarga xviii. is followed by the colophon:

End: इति **श्रीनोनराज**सूनुपण्डित**जोनराज**विरचितायां **किरातार्जुनीयटीका**यामष्टादशः सर्गः ॥ १८ ॥ समाप्तश्चेयं **किरा-तार्जुनीयटीका**यामों भद्रं नो बोभवीतु
मंगलं लेखकानां च पाठका–नां च मंगलम् मंगलं सर्वजंतूनां भूमौ पतति मंगलम् ॥
आदर्शदोषान्मतिविभ्रमाद्वा यदऽर्थहीनं लिखितं मयात्र तत्सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यंति हि ये लिखंति ॥
ग्रंथस्य संख्येयं ६३०० ॥ ॥ इयं **किरातार्जुनीयटीका** विप्रवर**नारायणेन काश्मीरनगरे** समाप्तीकृता बाणर्षिमुनी-न्दुशाके शुचिकृष्णसप्तम्यां ॥ तथा च संवत् १९१० शास्त्रसंवत् ४९२९ ॥ ॐ ॥

१२८५.

५८८. **खड्गशतकम्.**

KHADGAS'ATAKA.

Beginning: श्रीगणेशाय नमः ॥ ॥
कल्पातिक्रूरकालभ्रुकुटिकुटिलताकल्पकल्पाग्रमुष्टिः क्रुध्यत्कालोकटाक्षांकित––कल–––तिमेकांतकाली ।
क्रीडत्यस्याक्रमेण क्रकचकृतिकृती कुंतिकुंभाग्रकूटक्रोडेपूत्कृत्तकंठोस्थितरुधिरकणाकीर्णकोणः–––॥ १ ॥
खं प्रेंखद्भिः खरांशोः प्रखरखरशिखा[:] खंडयन्स्वैर्मयूखैः खेलासंख्येषु खंजीकृतररणरसिकः संमुखानां ख–त्रं ।
ख्या–सौख्यस्य खानिः खलु कमितृजुषां खेचरीणामखर्वः खेलत्युत्खातखड्गप्रतियुवसु खनत्कारवानस्य खड्गः॥ २॥

------त्रिग्रहणमवगणय्याग्रतः स्वर्गमार्गं ग्रस्यन्नस्य महाग्रेसरकरगुणितोदग्रजाग्रद्गभस्तिः ।
गर्वोग्रग्रंथिगोत्रग्रहिलरिपुगण--भंगीगृहीतो गर्जत्यग्रेसराग्र्यग्रहगिलनगुरुः संगरे मंडलाग्रः ॥ ३ ॥

The MS. has lost the last leaf, ending in verse 99:

Fol. 12: मुष्टिग्राह्यापि नागायुततुलितबलैर्दस्युभिर्दुर्ग्रहा या शुभ्रं प्राप्तापि--रिपुहननमयैर्यावदानैः प्रकाशाः ।
शीतस्पर्शाप्यरण्ये तृण-----भस्मसाद्याविधत्ते सा शाणोन्मृष्टकोणा विलसति सुतरामस्य जैत्रा कृपाणी ॥९७॥
ऋज्वंगी या स्वयं न क्षणमपि सहते वक्रभावं रिपूणां स्निग्धछिन्नांजनाभा स्थगयति धवलं या यशः शात्रवीयं ।
ईशा दीर्घा मुहुर्या-सन्न रिकुले दीर्घदीर्घं विधत्ते सा निर्द्वंद्वं स्फुरंती समिति विजयतेमुष्य जैत्रा कृपाणी ॥ ९८ ॥
मुग्धा या युद्धभूमावहितनरपतीन्स्तत्क्षणं मोहयंती प्रोद्धता या विनेत्रा मुहुरभिपतितांस्तान्समुत्कंपयंती ।
स्वछा या संनिपा....

१२८६.

५८९. खड्गशतकटीका.

Commentary on the KHAḌGAS'ATAKA (No. 1285).

The leaves bear the marginal note ख० श० टी०. The MS. has lost the first three leaves and begins in the comments on verse 6:

Fol. 4: वित्तः छिदुरगणचणः तेन वित्त इति चणप् छेदानां नागराणां हृच्छोककारी ॥ ६ ॥ जमिति ॥ अमुष्य खड्गः इह लोके जयति । किंविधः जैत्रं जयशीलं यत् जन्यं संग्रामः तस्य अजिरभुवि जंघालः सत्वर इत्यर्थः जंघालेतिजव इत्यमरः जंतुजाते प्राणिमात्रे ज्वरार्त्तिं ज्वरपीडां जनयन् त्रिजगति त्रैलोक्ये जयिनः पराक्रमवतः वाहुजस्य क्षत्रियस्य जीवातुः जीवनौषधं जीवातुर्जीवनौषधमित्यमरः । पुनः किंविधः अथ वा त्रिजगति जयिनः । दोर्भुजंगस्य वाहुसर्पस्य जिह्वा । ज्याजानिः वसुधाजानिः जायाया निङ् । वसुधा मौर्व्यां ज्येति मे० । व्याघ्राश्च जाग्रद्गजरदनाश्च शिलाश्च तासां भंजनं तत्र अजस्रं योग्यः जाताः ज्वालाः यस्मिन्स तथा अत एव जटावान् । जगज्जित्वरः ॥ ७ ॥

The last leaf is lost. The MS. breaks off in the comments on verse 100.

Fol. 26: ॥ ९९ ॥ स्वे स्वे इति ॥ एतदीया सा कृपाणी निष्कार्पण्याहितानां निर्गतं कार्पण्यं कृपणस्य भावः कार्पण्यं येषां ते निष्कार्पण्याः ये अहिताः वैरिणः तेषां हृदि हृदये हठेन आकृष्टात्-त्कीर्त्तिलक्ष्मीः वसतु सर्वदा तिष्ठत्वित्यर्थः किंविधा स्वे स्वे काले स्वस्वसमये अतिक्रांतः कोषोपिधानं भयात्सा पुनः स्वगुणविभवतः ....

१२८९.

३८६. गीतगोविन्दटीका अनूपोदयः । अनूपभूपतिः कारयिता.

ANÛPODAYA, a commentary on the GÎTAGOVINDA, prepared under the patronage of ANÛPASIṀHA.

Beginning: श्रीगणेशाय नमः ॥
गंडद्वंद्वमिलन्मत्तमधुपालीरुताकुलं ॥ सिंधूरारुणशुंडं तं कलये गणनायकं ॥ १ ॥

वल्लकीपुस्तककरां पुंडरीकासनस्थितां । शारदां नीरकुंदेंदुधवलां भावयेतरां ॥ २ ॥
अथ **श्रीजयदेवीयपद**भावार्थबोधकं । भूपानूपविनोदार्थमनूपोदयमारभे ॥ ३ ॥

इह खलु सकलकविशिरोमणिर्जयदेवः प्रारिप्सितस्य निर्विघ्नपरिसमाप्त्यर्थं राधामाधवस्मरणरूपं वस्तुनिर्देशलक्षणं मंगलमाचरति । मेघैर्मेदुरमिति ।

End: श्रीमद्राजाधिराजेंद्रतनयोऽनूपभूपतिः । व्याचक्रे जयदेवीयं सर्गोऽगात्तद्वितीयकः ॥ ॥

१२९१.

३८३. गीतगोविन्दटीका पदाभिनयमञ्जरी । वासुदेवः वाचासुन्दरः.

PADÂBHINAYAMAÑJARÎ, a commentary on the GÎTAGOVINDA, by VÂSUDEVA VÂCHÂSUNDARA.

Fols. 3, 33, 54 and 60 are missing. Lacunae are indicated on fols. 15, 50 and 51.

Beginning: ॐ श्रीगणेशाय नमः ॥ ॥ ॐ नमो गुरुभ्यः ॥ ॥

मंदं मंदं मुखजमरुता पूरयन् मध्यभागं वेणो रंध्रे जलदसुभगश्याल(?)यन्नंगुलीश्च
गोपीः पश्यन्नयनकमलप्रांतलेशैः स्मरार्त्ता नादैर्वृंदावनमिह हरिः पूरयन् पातु युष्मान् १

अपि च

रेवोपकंठे त्रिपुरीप्रदेशे गढापुरी पर्वतवृंददुर्गा
राजा **पुलस्त्यान्वयसिंधुचंद्र**स्तस्यामभूद**र्जुनदास**संज्ञः २

अपि च

महीमहेंद्रो**र्जुनदास** एषः सहस्रबाहोरधिको द्विबाहुः
धनंजयात्कृष्णसखाच्च धन्वी प्रतीपभूपालपतंगवह्निः ३

अपि च

तस्यासीत्तनयो नयैकरसिकः क्ष्मापालचक्रोल्लसच्चूडारत्नमरीचिचर्चितपदः **संग्रामसाहिमहान्**
येन स्वात्मनि दानशौर्यमहिमप्रज्ञागुणैरर्जितं साम्राज्यं जगतीतले धवलिते कीर्त्या सुधाशुभ्रया ४

अपि च

यदीयदंत्यावलिदानवारिसेकोरितेजोनलशांतिहेतुः
दारिद्र्यवह्नेरपि दानवारिसेको यदीयोर्थिजनस्य शांत्यै ५
तस्मादजायत निजायतबाहुदंडचंडोरुविक्रमनिराकृतवैरिवर्गः
श्रीचंद्रसाहिनृपतिर्जगतीतलेस्मिन्धर्मैकरक्षणपरः शरणं गुणानां ६
प्रातः प्रातः पथि पथि जनैर्यद्यशो गीयमानं श्रावंश्रावं स्तरल(?)शिरस कल्पभूमीरुहस्य
प्रादुर्भूते पुलकपटके शंकया कंटकानां त्रासादासादयति नकरं नायिका नाकभर्त्तुः ७
गीतगोविंदकाव्यस्य पदाभिनयमंजरी तन्यते **वासुदेवेन चंद्रसाहिनृपा**ज्ञया ८
पदाभिनय एवास्मिन्ग्रंथ उद्देशतः कृतः लक्षणानि पदार्थाश्च नादृता ग्रंथविस्तरात् ९

The MS. concludes with Sarga viii.:

Fol. 68: इति श्रीमहाराजाधिराजमहाराजश्रीराजचंद्रसाहिदेवाज्ञया वासुदेववाचासुंदरविरचितायां श्रीगीतगोविंदपदाभिनयमंजर्यां अष्टमः सर्गः ८ ॥ श्रीः.

१२९३.

८२१. ग. गुणरत्नम् । भवभूतिः.

GUṆARATNA, ascribed to BHAVABHÛTI.

The thirteen verses of this "Treasury" agree with the quotations from the *Guṇaratna* in Haeberlin's Kâvyasaṁgraha, as given by Exc. Otto von Böhtlingk in the "Indische Sprüche." Haeberlin's Anthology is not accessible to me.

Beginning: गुणरत्नं ॥

सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारबर्हित्रासान्नासाग्ररंध्रं विशति फणिपतौ भोगसंकोचभाजि ।
गंडोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेर्वैनायक्यश्चिरं वो वदनविधुतयः पांतु चित्कारवत्यः ॥ १ ॥

End: गुणेन स्पृहनीयः स्यात् न रूपेण यतो जनः । सौगंध्यवर्ज्यं नादेयं पुष्पं कांतमपि क्वचित् । १३ ।

इति श्रीमहाकविभवभूतिविरचितं गुणरत्नकाव्यं समाप्तं ॥ ऽऽ ॥

१२९४.

४०४८. चन्द्रोदयवर्णनम्.

CHANDRODAYAVARṆANA.

Copied from a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥ अथ चंद्रोदयवर्णनम् ॥
मदनमोहनलेखमिदं विधौ सुलिखितं विधिना मशिकाकृति ॥
जनमनोहरणाय न लांछनं भवति किं तु हिमांशुगतं स्फुटम् ॥ १ ॥
मदनभस्मचयं रतिरादधौ शशिनि लांछनकैतवतः किमु
अमृतयोगवशादचिरादयं निजशरीरमवाप्स्यति मे प्रियः ॥ २ ॥
सोम नवपुंडरीक नभसाकारे विराजते नूनं ॥
तन्मकरंदकलुब्धो ह्यंकभ्रमरोपमेव मम भाति ३

End: शेषांशेषावभोगभीरुजलधेरामूलकूलस्थितप्रोद्यद्युक्तिगरिष्टरत्ननिवहे ग्रैवेयकोद्भासितं ॥
नेपालक्षितिपालमौलिमुकुटालंकारचूरामणिं प्रद्युम्नज्ञमहं दशौरयनगं कृत्वा कृतार्थाजनि ॥ ४४ ॥

इति चंद्रोदय संपूर्णम् ॥ संवत् १९४१ पौषशुक्ला ८ ꣸

१३०२.

८२३. चित्रकाव्यचाटुचर्चा । जगद्धरः.

CHITRAKÂVYA, with a commentary called CHÂṬUCHARCHÂ, by JAGADDHARA.

Beginning: Text. ॐ अघद्रुमध्वंसमहाकरेणवः सुधासिताः पावककल्करेणवः
वसंति यस्मिन्नभयंकरेणवः करोतु सं तेन हरः करेण वः १ ॥

Comm. ॐ स्वस्ति ॥ ॐ नमो विघ्नहर्त्रे ॥

ॐ इमाः प्रमोदाय दयामृताब्धेः सरस्वतीविभ्रममन्दिरस्य
जगद्धरेण प्रणयात्प्रणीताः **संग्रामसिंहस्य** भवन्तु वाचः ॥

इह हि बहिरंतरुन्मिषन्महारणार्तः करणेन प्रबलपरिपंथिपृतनावनावनिदावपावकेन दुर्वारदारुणदारिद्र्यदावदहनदह्यमानमानधनजनमनस्तापनिर्वापणपङ्कीकृतसमस्तसम्पदाः दारितसकललोककार्त्तिकार्त्तिकीचंद्रिकानुकारिचरित्रपवित्रितमहीमंडलेन दयादानदाक्षिण्यादिगुणगणगभीरभासुरसुचरितभरितरोदसीगर्भेण भूरिसौभाग्यभाग्यवश्यपक्ष्मलाक्षीकटाक्षलक्ष्यलक्षणभूतमूर्तिना नानादिगंतरागतकविवरविरचितवचनरचनाचवणचारुचातुर्यधुर्यधियाखंडनवखंडमहीमंडलाखंडलशिखंडमंडनमहाराजाधिराजश्रीमत्**प्रतापसिंहां**गभुवा रणरंगसंगताराातिमातंगभंगाप्रसंगसंगतार्थीकृताभिधानेन दुर्गतारिकारिणा कुमारेण श्रीमता **संग्रामसिंहेन** कृताभ्यर्थनानुरोधात् मया कतिपये ये विरचिता विचित्ररचनादानरवः सहृदयहृदयाह्लाददायनश्चित्रकाव्यश्लोकाः तेषां कचिन्मृदुमतिदुरवधानाभिधेयावरोधविधये विवृतिलेशोयमारभ्यते १ ॥ ॥

End: **श्रीमत्प्रतापनृपतेस्तनयेन** नाम **संग्रामसिंह** इति दर्शयता यथार्थम्
अभ्यर्थितो व[व्य]रचयं निज**चित्रकाव्यश्लोके**ष्वमीषु **विवृतिं** निरवद्यहृद्याम्

इति **चित्रकाव्यचाटुचर्चा** सम्पूर्णा ॥ श्लोक ५२ इति शिवम् ॥

१३०३.

५५६. चित्रप्रपञ्चटीका । विश्वेश्वरः.

CHITRAPRAPAÑCHA, by VIS'VES'VARA, with a commentary of the same.

Beginning: Text. नानाननेन नानेन नूनं नुन्नानि नो ननु नोनान्ननीनि नानैनोननानि नु ननानि नुः १

Comm. ॐ श्रीगणेशाय नमः नानानमाय नमः

गोविंदगिरिशतिग्मगुगणेशगौरीगिरो गुरुं नत्वा **विश्वेश्वरो** विवृणुते स्वीयं **चित्रप्रपञ्चम**मुम्

कविनिष्टव्युत्पत्तिविशेषोन्नायकत्वेन चमत्कारहेतोर्बंधादिचित्रकाव्यस्य रसविशेषानाधायकत्वात् पृथक्त्वेन निबद्धस्यारंभे विघ्नविघाताय कृतं मंगलं श्रोतृशिक्षार्थमुपन्यस्यति नानेति एकाक्षरं श्लोकत्रयं अनेन सर्वसिद्धिप्रदेन नाना बहून्याननानि यस्य पंचमुखत्वात् महेश्वरेणेति यावत् नो अस्माकं नानाविधानामेनसां पापानां अननानि जीवनानि विद्यमानानि नानापापानीति यावत् नूनं निश्चयेन न नुन्नानि किं तु निरस्तान्येवेति काकर्थः ननु श्रोतृसंबुद्धौ किंभूतानि न ऊनं नोनं नकारेण समासः अन्नं भोगः अद्यत इति व्युत्पत्तेः नन्नयंति प्रापयंति पुरुषं इति नोनान्ननीति नु शब्दो वाक्यालंकारे पुनः किंभूतानि नुर्नरस्य नृशब्दस्य षष्ठ्यां

रूपं ननानि न विद्यते नो नमस्कारो येषु तानि विवेकिनामनादरणीयानीति यावत् नमतेर्डप्रत्ययः विसर्गादयो नानुप्रासयमकादिबंधविरोधिन इति संप्रदायः १

End: Text. हरिण्यापि सभापूज्या भवदीयतनूपुरः हारिण्यापिंजभा त्याज्या तव गायति नूपुरः ॥
शरयंत्रबंधः ॥

Comm. कश्चित्प्रियामाह हरिण्येति सभायां पूज्या सर्वादरणीयत्वात् हारिणी मनोहरणनियता आपिंजा उच्छृंखला भा कांतिः हरिण्याप्सरोविशेषेणापि भवदीयास्तन्वाः शरीरस्य पुरोग्रे त्याज्या त्वदग्रे तद्रूपमदनाशादित्यर्थः तव नूपुरो गायति वदति सिंजितछलेनेत्यर्थः मंजीरो नूपुरोऽस्त्रियामित्यमरः प्रथमतृतीयपादयोर्द्वितीयचतुर्थपादयोः श्रृंखलया वाचनं ॥

१३१२.

२१७. दिव्यसूरिचरितम् । श्रीनिवासकविः.

DIVYASÛRICHARITA, by S'RÎNIVÂSAKAVI.

Comp. L. 2526 for synopsis of contents.

Beginning: श्रीगणेशाय नमः

प्रभार्काविव संसक्तौ भवभीतिनिवृत्तये रक्षितारौ त्रिजगतां लक्ष्मीनारायणौ भजे १
क दिव्यसूरिचरितं क च मे मंदशेमुषी नियंतुकामोस्मि गजं साहसाद्विश्व[स]तंतुना २
प्राचां प्रशस्तिं प्राज्ञानां प्रार्थये प्राकृताग्रणीः पिपासोरगमाग्रस्थं क्षौद्रं पंगोः समोस्म्यहं ३

End: कासारादिमदिव्यसूरिकृतसत्सोपानवद्भ्रां द्वयश्रीमंत्रोभयपार्श्वदण्डघटितां श्रीभाष्यकीलस्थिराम्
निश्रेणीं निखिलो जनश्च परमव्योमस्थलीप्रापिकां स्वस्वाचार्यनिरूपित--शतः प्राप्याधिरोहेत्सदा ९६
इत्याशास्य सरः शठांतकमुखश्रीदिव्यसूरिः कृतीरर्चास्वस्य च तत्प्रबंधनिवहैः सार्द्धम् प्रतिष्ठाप्य सः ९७
श्रीरंगादिमधामसु स्वयमभूच्छ्रीदिव्यसूरिव्रजैस्तैस्साकं परमं पदं निजपू रामानुजाख्यो मुनिः ९८

स्वामीत्यादि सर्वं पूर्ववत् ॥ * ॥ इति श्रीकाश्यपकुलतिलकस्य रंगाधिपारोग्यशालावल्लभस्य कविवैद्यपुरंदरापरनामधेयस्य श्रीरंगगरुडवादनपंडितस्य श्रीनिवासकवेः कृतौ नित्यसूरिचरिते महाकाव्येऽष्टादशः सर्गः ॥ ॥

१३१८.

७४९. नलोदयटीका सुबोधिनी । प्रज्ञाकरः.

SUBODHINÎ, a commentary on KÂLIDÂSA'S NALODAYA, by PRAJÑÂKARA.

Beginning: Comm. हृदयेति हे हृदय अन्तःकरण यादवतः यादवात् पञ्चम्यास्तसिल् त्वं मा गाः मा गच्छेः कथम्भूतात् पापाटव्याः पापारण्याद् दुरासदायाः दुःखेन सोढुं शक्यायाः दवतः दवाग्नेः अरिसमुदायाच्छत्रुसमूहात् त्रिजगत् त्रैलोक्यं सदा अवतः पालयतो रक्षतो वा यद्वा कीदृशाद् यादवतः दुःसोढा या पापाटवी तस्या दवाग्नेरिति रूपकं पुनः कीदृशात् अरिसमूहात् त्रैलोक्यमवत इति पुनः कीदृशात् स्मरेण कामेन दायादवतः पुत्रवतः दायादौ सुतबांधवावित्यमरः १ ॥

End: इति **सुबोधिनीटीका**सहिते **श्रीकालिदास**कृते **नलोदये** सत्काव्ये चतुर्थोच्छ्वासः ॥
मिश्रानंदकरस्त्वासीत् महोपाध्यायलक्षितः **पुण्यग्राम**सभाजेता यथा वाणीमयः सुधीः १
वेदेनैव विधिं कविं नयरुतैस्तर्केण वाचस्पतिं वेदान्तेन शिवं मनुं स्मृतिमयैर्ज्योतिश्चयैर्भास्करम्
व्याकृत्येन फणाधरं क्षितिधरं नागाधिपं छन्दसा धर्म्मो यस्य विजेतुमञ्चति परं सांख्येन चार्वाकपम् २
तत्सूनुः सुकृती क्षितीश्वरकृपापात्रः सुहृत्पालको नानाशास्त्ररतो महापदयुतोपाध्यायसंज्ञान्वितः
सत्तर्कायतकाननोद्यतवलद्वादीन्द्रदंतावलश्रेणीमर्द्दनचातुरीचणहरि**र्विद्याकरो मैथिलः** ३ ।
तस्यात्मजोभूद्विबुधाग्रगंता **प्रज्ञाकरः** सज्जनतापहंता शास्त्रेषु दक्षः कुधियां नियन्ता ४ ।
स्वल्पेन वयसा तेन कृता टी[का] **सुबोधिनी** । पूर्वाचार्य्यकृतीर्वीक्ष्य सुधियाम्पश्यतां मुदे ॥ ५ ॥

१३२१.

४११. **नृपविलासः** । शिवरामः त्रिपाठी.

NṚIPAVILÂSA, by S'IVARÂMA TRIPÂṬHIN.

Beginning: श्रीगणेशाय नमः ॥
वृषाकपी शंखहस्तौ शितिचंद्रांशशोभिनौ । विनायकयुतौ नागयुजौ स्तां वः सुखप्रदौ ॥ १ ॥
कार्त्तवीर्यें दशग्रीवे प्रलंबे प्रबलेऽसुरे । एधि राम इवारातौ राजन्राजीवलोचन ॥ २ ॥
कंसे संतमसे वृत्रे द्विरदे रदशालिनि । भूया हरिरिवारातौ राजंस्तामरसानन ॥ ३ ॥

End: इति रिपुपलायनं यशश्च ॥
त्रिलोकचंद्रात्मजकृष्णरामसूनुस्त्रिपाठी शिवरामनामा ।
वंधोर्मुदे **केशवरामनाम्न**श्चक्रे निवंधं **नृपतेर्विलासं** ॥ १ ॥

इति **शिवरामकृतो नृपविलासः** ॥ ॥

१३४१.

८२१. ङ. **पद्यसंग्रहः** । कविभट्टः.

PADYASAṀGRAHA, an anthology, by KAVIBHAṬṬA.

Beginning: पद्यसंग्रहः ॥
नत्वा तां परमेश्वरीं शिवकरीं श्रीभारतीं भास्वतीं गंगातीरनिवासिना **सुकविना** लोकोपकारार्थिना ।
नानापंडितवक्त्रनिर्गतवतां निर्मीयते केनचित् **पद्यानामिह संग्रहो**मृतकथाप्रस्तावविस्तारिणां ॥ १ ॥
काव्ये भव्यतमेपि विज्ञनिवहैरास्वाद्यमाने मुहुर्दोषान्वेषणमेव मत्सरयुषां नैसर्गिको दुर्ग्रहः
कासारेपि विकाशिपंकजचये खेलन्मराले पुनः क्रौञ्चश्चञ्चुपुटेन कुञ्चितवपुः सम्बूकमन्वेषते । २ ।

End: राजोवाच ।
सुधांशोर्जातेयं कथमपि कलङ्कस्य कणिका विधातुर्दोषोयं न च गुणनिधेस्तस्य किमपि ।
स किं नात्रेः पुत्रो न किमु हरचूडार्चनमणिर्न वा हंति ध्वान्तं जगदुपरि किं वा न वसति । २० ।

इति **श्रीकविभट्टकृतः पद्यसंग्रहः** समाप्तः ॥ ऽऽ ॥

१३४४.

२२१. भगवत्प्रसादचरितम् । दामोदरः.

BHAGAVATPRASÂDACHARITA, by DÂMODARA.

Beginning: श्रीगणेशाय नमः ॥ श्रीलक्ष्मीनृसिंहाय नमः ॥ श्रीमन्मार्तंडभैरवाय नमः ॥
श्रीसरस्वत्यै नमः ॥ श्रीगुरवे नमः ॥ श्रीरस्तु ॥
श्रीकृष्ण नाथ करुणाकर दीनबंधो भ्रातः पितः प्रभु विधेहि दयामुपेहि ।
श्रुत्वेति कौरवसभागतयाज्ञसेनीशब्दं क्षणागतमशेषपति भजामः ॥ १ ॥
यद्व्यासनाकुजनिशेषगुहेशकार्यैर्वाणीगणेशगुरुकाव्यकवींद्रलक्षैः ।
तत्वेन वेदितुमथो गदितुं न चेशे लोकेशचित्रचरितेल्पमतिस्त्वहं कः ॥ १ ॥

Fol. 8: यन्माता **यमुना**धरीकृतसतीव्राता चरित्रैः पिता सत्कीर्तिर्द्विजदेवपूजनपरः **श्रीविश्वनाथ**स्तथा
तेन श्रीन[र]सिंहचिंतनफले **दामोदरे**णोदिते काव्ये **श्रीभगवत्प्रसादचरिते** सर्गोयमादिर्गतः ॥ ५५ ॥ १ ॥

End: यन्मातेति पूर्ववत् तेन श्रीनरसिंहचिंतनफले **दामोदरे**णोदिते काव्ये **श्रीभगवत्प्रसादचरिते** सर्गस्तु विंशो गतः ॥२०॥
श्रीरस्तु ॥
विश्वनाथसुतो वंशे **दबडघायो**पनामनि ॥ **दामोदरकविः** श्रीमद्भगवत्कृपया कृती ॥ १ ॥
काव्यार्थानिव काव्यार्थान्दस्यधीर्वितनोत्यलं ॥ **दामोदरकविः** सोयमामोदयति भूतलम् ॥

इति **श्रीनिवासभट्ट**स्य श्लोकः ॥ ॥

१३५७.

२७६. भावसिंहशतकम्.

BHÂVASIṀHAS'ATAKA.

The above title is found on the margin only written by another hand.

Fol. 2: ------------राः । न्यक्काराः शत्रुसूनोः कुनपकुलभुवां हृद्धिकारानुकाराः ।
क्षौणीभारावतारातुलविमलमहःखंडितारातिवारास्तारातापावतारास्तरणिकुलमणेस्ते शरा वज्रताराः ॥ ३ ॥
तप्तस्तापनतीव्रतापदहनज्वालाकलापैश्चिरं नीहारद्रवसारशीतलघनछायां ययोराश्रितः ।
स्वैरं शाम्यति सूरसारथिरसौ शोणछविछद्मना विष्णोस्तौ चरणौ मुदं घटयतां **श्रीवीरसिंह**प्रभोः ॥ ४ ॥
कामारेर्मणिवंधवंधनमिलद्भोगींद्ररत्नांकुरप्रद्योतस्तवकेषु दाडिमफलभ्रांत्या करं कल्पयन् ।
तत्फूत्कारपरंपरानिलपराभूतोऽभिभूतोक्त्यिा भूत्यै भूतपतेरुरस्थलकृतालंवोऽस्तु लंवोदरः ॥ ५ ॥

The MS. breaks off with:

Fol. 21: त्वत्कीर्त्तिर्विजगीषयैव मथितः कल्लोलिनीवल्लभः स्वर्लोकेंद्रविरिंचिपंचवदनोपेंद्रादिवृन्दारकैः ।
अत्रोत्थं सकलंकमिंदुमभितो निर्वर्ण्य लज्जावशादंतर्गोपयितुं तमेव कवलीकुर्वन्ति सर्वे सुराः ॥ ९४ ॥
आनंदामृतपूरपूरिततनुर्मन्ये कलावानसौ तारोत्तानकलातिरेकमधुरो युष्मद्यशो गायति ।
तत्सत्यं नृप **भावसिंह** यदसौ तत्तत्समाकर्णनारंको मुंचति रंकुरंकवसतिं नाद्यापि शीतद्युतेः ॥ ९५ ॥

प्रतीतिरियमन्यथा न खलु मे प्रतप्तातपे प्रतापतपने तमां तपति **भावसिंहप्रभोः** ।
पयोधिशयनो.......

१३५९.

४१२४. मधुकेलिवल्ली.

MADHUKELIVALLÎ.

A modern transcript from a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: ॥ श्रीरामजीः ॥ श्रीराधिकायै नमः ॥
गोविंददेवपदसेवनभूरितर्षान्वर्षाकरान्निजगुरून्व्रजभावसिंधोः ॥
प्रेमार्त्तिदात्करुणानरुणायमानान्स्वीयाप्रबोधकुहरे मुहुरेव वंदे ॥ १ ॥
होलाकादिवसेषु मंजुलरसेष्वादेशतो **गोकुलाधीशस्यातुलवत्सलस्य** नियमं संत्यज्य गोचारणे
निःशंकं कुलकन्यकाभिरभितः कुर्वन्कलिं कौतुकी राधावर्गजितो हरिर्विजयते **वृंदाटवीचंद्रमाः** ॥ २ ॥

End: कृष्णचैतन्यकारुण्यपुण्यावनीरूपसंदर्भकल्पद्रुमालंविनी
वेल्लिता पंचभि पल्लवैर्वर्द्धतां **केलिवल्ली** सतामालवाले हृदि ॥ १९ ॥

इति **श्रीमधुकेलिवल्ल्यां राधागोविंदसमागमोनाम** पंचमः पल्लवः समाप्तः ॥ ५ ॥ लीषतं **रामचंद्रब्रामण** वासी नरू-कानकीबसइकाः मीती भादवा सुदी १० दीतवारः संमत १९४१ काः ॥

१३६०.

४०५२. मनोदूतिकाकाव्यम्.

MANODÛTIKÂKÂVYA.

A recent copy from a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥
प्रणम्य श्रीधरं देवं श्रियं वात्सल्यसागरं ॥ विष्वक्सेनं महावाहुं वासुदेवस्य सेनपं ॥ १ ॥
प्रणम्य शिरसा भूमौ **शठारेः** पादपंकजं ॥ ज्ञानमुद्रायुतो जातो ज्ञानिनां यो गुरोर्गुरुः ॥ २ ॥
षोडशाव्दमनाहारश्चिंचिणिकोटरस्थितः ॥ वेदार्थं कथितं येन सम्यग् द्राविडभाषया ॥ ३ ॥
अनंतज्ञानसंपन्नं **अनंतस्य** पुरातनं ॥ निरस्य **शंकरादीनां** भाष्यं येन प्रकाशितं ॥
स्वयं **रंगेशपादाब्जे** शिष्यानां हितकाम्यया ॥ कृतवान् यो(?) प्रपत्तिं च प्रणम्य तत्पदाम्बुजे ॥ ५ ॥
करोमि **दूतिकाकाव्यं मनः**पूर्वमपूर्वकं ॥ इमे सस्नेहसंतुष्टं सुष्टुपुष्टप्रमाणकैः ॥ ६ ॥

End: इति **श्रीमनोदूतिकाकाव्यं** समाप्तं ॥ शुभुं भुयात् ॥ मीति पौषशुक्ल ॥ १० ॥ शनिवासरे ॥ संवत् ॥१९४१ ॥
लिप्यकृतं **सुगनशर्म्मा** ॥

१३६१.

८१४. ख **महापद्यषट्कम्** । [कालिदासः].

MAHÂPADYAS'AṬKA, ascribed to KÂLIDÂSA.

The text runs as follows:

॥ ओम् ॥ अस्थिवद्दधिवच्चैव शंखवद्बकवत्तथा । राज़न् तव यशो भाति पुनः संन्यासिदन्तवत् ॥ १ ॥
कालिदास इमं श्लोकं स्वकवित्वस्य गोपकं । लिखित्वा प्रददौ पत्रं कवये **शंकराय** वै ॥ २ ॥
पठित्वा **शङ्करः** श्लोकं प्रहसन् कौतुकाय तत् पत्रं करे समादाय सानंदस्त्वरया तदा ॥ ३ ॥
कालिदासेन सहितो **भोजराज**सभां ययौ । अथ दृष्ट्वा स राजानमाशिषं प्रजगाद ह ॥ ४ ॥ ॥
राजन् अभ्युदयोस्तु **शंकरकवे** किं पत्रिकायामिदं पद्यं कस्य तवैव कीर्त्तिरचना तत् पठ्यतां पठते ।
किन्त्वासामरविंदसुंदरदृशं द्राक् चामरान्दोलनाद् उद्वेल्लद्भुजवल्लीकङ्कणझनत्कारः क्षणं वार्यतां ॥ ५ ॥
महाराज श्रीमन् जगति यशसा ते धवलिते पयःपारावारं परमपुरुषोयं मृगयते ।
कपर्दी कैलाशं करिवरमथोयं कुलिशभृत् कलानाथं राहुः कमलभवनो हंसमधुना ॥ ६ ॥
नीरक्षीरे गृहीत्वा सकलखगपतीन् याति नालैकजन्मा तक्रं धृत्वा कराब्जे सकलनिधीन् चक्रपाणिर्मुकुंदः ।
सर्वानुद्धृत्य शैलान्दहति पशुपतिर्भालनेत्रेण पश्यन् व्याप्ता त्वत्कीर्त्तिकांता सकलवसुमतीं **भोजराज** क्षितीन्द्र ॥ ७ ॥
श्रीमद्राजशिखामणे तुलयितुं धाता त्वदीयं यशः कैलाशञ्च निरीक्ष्य तत्र लघुतां तत्पूर्त्तये पर्यधात् ।
उक्षाणं तदुपर्युमासहचरं तन्मूर्ध्नि गङ्गाझरं तस्याग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितीं ॥ ८ ॥
अपायि मुनिना पुरा पुनरमायि मर्यादया अतारि कपिना पुरा पुनरदाहि लङ्कारिणा ।
अमंथि मुरवैरिणा पुनरवन्धि लङ्कारिणा क्व नाम वसुधापते तव यशोम्बुधिः काम्बुधिः ॥ ९ ॥
स्वस्ति **श्रीभोजराज** त्रिभुवनविजयी धार्मिकः सत्यवादी चित्रा ते मे गृहीता नवनवतियुता रत्नकोटिर्मदीया ।
तां त्वं मे देहि शीघ्रं सकलबुधजनैर्ज्ञायते सत्यमेतन् नो वा जानंति केचिन्नवकृतमिति चेद् देहि लक्षं ततो मे ॥ १० ॥
मा गाः प्रत्युपकारकातरधिया वैमुख्यमाकर्ण मे **श्रीकर्णाट**वसुंदराधिप सुधासिक्तानि सूक्तानि म (!) ।
वर्ण्यन्ते कति नाम नार्णवनदीभूगोलविंध्याटवीझंझामारुतचंद्रमःप्रभृतयस्तेभ्यः किमाप्तं मया ॥ ११ ॥

इति श्रीमहाकवि**कालिदास**कृतं **महापद्यपट्कं** समाप्तं ॥ ॥

१३८४.

७८९. **रघुवंश**टीका **अर्थालापनिका** । समयसुन्दरः.

ARTHÂLÂPANIKÂ, a commentary on the RAGHUVAṀS'A (Sarga ii.), by SAMAYASUNDARA.

From the double colophon at the end of the Sarga it appears that this commentary was taken by the copyists to be a part of the S'is'uhitaishiṇî of Châritravardhana of which the comments on Sargas iv. xiv—xix. are found in No. 1387.

Beginning: श्रीगणेशाय नमः ॥ अथ द्वितीयसर्गस्यार्थालापनिका प्रारभ्यते अथेति । अथानंतरं प्रभाते प्रातःकाले

यश एव धनं यस्य सः तादृशः प्रजानामधिपः ईश्वरो **दिलीप** **ऋषेर्वशिष्टस्य** धेनुं वनाय वनं गंतुं मुमोच क्रियार्थोपपदात्कर्मणि चतुर्थी कीदृशीं धेनुं जायया **सुदक्षिणया** प्रतिग्राहिते स्वीकारिते गंधमाल्ये चंदनपुष्पस्रजौ यस्यां सा जा०

End: इति श्री **रघुवंशे** महाकाव्ये कृता **समयसुंदरैः** **अर्थालापनिका** वृत्तिः पूर्णा सर्गे द्वितीयके ॥ २ ॥

इति **श्रीचारित्रवर्द्धन**विरचितायां **राघवीयटीकायां** द्वितीयः सर्गः समाप्तिमग[म]त् ॥ २ ॥

१३८९.

४९२ क. **रघुवंशटीका** । लोष्टकः.

Commentary on the Raghuvams'a, by Loshṭaka.

A modern copy written in a fine Kashmirian hand in book form, folio size.

Beginning: ॐ स्वस्ति प्रजाभ्यः ॐ नमो विघ्नौघहर्त्रे नमः श्रीरस्तु नः.

Then follows the text of verses 1-9. The commentary sets in with the exposition of the k u l a k a in verses 4-9.

Fol. 1: यस्य मे तद्वर्णने एवंविधा गतिरुपायोस्ति सोहं रघूणामन्वयं वक्ष्ये वर्णयिष्यामीति समन्वयः तनुवाग्विभवोपि सन् अल्पभारतीप्रपञ्चोपि भवन् तेषां रघूणां गुणैरौदार्यादिभिः कर्णमागत्य चापलाय वर्णनाय प्रेरितो नियुक्तः ॥ ४ ॥

Fol. 10: **आनन्दवर्धन**बुधस्य गृहे पुरासीत्कृष्णः क्षणं त्रिभुवनैकपतिर्ग्रहीतुम्
प्राणाहुतिं निजकरेण तु यस्य भक्त्या पूर्वोक्तितेन स निमंत्रितपूर्वपादः
तस्यान्वयेषु **कुलवर्धनदीक्षित**स्य जातो रघोः सुरसपिण्डनिभस्य शीघ्रम्
टीकामिमां तदनु सूर्यजनोपयुक्तां **माणिक्यवर्धन**सुतोकृत **लोष्टकाख्यः** ॥ ॥

इति श्रीमहाकाव्ये **रघुवंशे** **श्रीलोष्टका**ख्यविदुषा कृतायां टीकायां प्रथमः सर्गः ॥ १ ॥ ॥ ॥

End: इति श्रीआदिकविकालिदासविरचिते **रघुवंशे** महाकाव्ये **श्रीपंडितलोष्टक**विरचितायां टीकायाम**ग्निवर्ण**वर्णनं नामैकोनविंशः सर्गः १९ ॥ इयं टीका मया विप्रवर**नारायणेन** समाप्तीकृता ॥ संवत् १९२० आषाढवदि सप्तम्यां चन्द्रे ॐ ॥

१३९९.

४११६. **रसकल्पद्रुमः** । चतुर्भुजमिश्रः.

Rasakalpadruma, by Chaturbhujamis'ra.

The remark on the fly-leaf shows that this copy was transcribed from a MS. in the Library of H. H. the Mahârâja of Alwar for H. H. Mahârâja Ranbîr Singh.

From verse 29 of the introduction (fol. 3) it appears that this anthology was prepared Saṁvat 1705.

Beginning: ॥ श्रीगणेशाय नमः ॥

वंदे तत्किमपि ज्योतिरतिचित्रं चिदात्मये । यत्स्मृतेरेव भूयांसि तमांसि हरति द्रुतं । १ ।

End: Text. गर्गर्षिवंशतिलको **जयशंकराख्यो** ज्योतिर्विदां प्रणयकुम्भुकवींद्रमान्यः
अध्यात्मिवगतिशांतिपरायणोभूधर्म्मोपदेशनपटुर्नयबोध आसीत् २०
तत्सूनु**र्हरदत्त** इत्यमलधीः श्रीमत्फणींद्रोदिते भाष्ये पाटवतः पृथामधिगतश्छंदश्चितीनां बुधः
साहित्यार्णवमंथनैक··.

Comm. गर्गर्षीत्यादिपद्यानि स्पष्टार्थानि प्राप्ताटनाः अट अतिक्रमहिंसयोः प्राप्तमटैवमतिक्रमणमनाटं स यैस्ते इति प्राप्ताटना इति प्रकर्षभ्रमणाः प्रकर्षेण भ्रमणं येषां भ्रमच्चित्ता लाभार्थं दूरगता इति महाकाव्यं काव्यस्य शुभाचार्य्यस्य शुकाव्यं प्रशस्तकाव्यं तद्वत्काव्यं स्तुत्यं कवृ कर्णने ऋहलोण्यत् अत एव परमयुत्कृष्ट इति भावः समजीघटत् निरमासीत् एतावद्गूढमत्र ज्ञेयं * * *

इति श्री **सूरिहरिदत्त**कृते **राघवनैषधीये** महाकाव्ये द्वितीयः सर्गः * * *
आकाशाम्नायाद्रिचंद्रे शके कृष्णत्रयोदशीयुते भौमेर्कैनक्षत्रे ह्यलिषत्**प्रेमवल्लभः**
पुस्तं तु यादृशं दृष्टं लिखितं तादृशं मया अशुद्धं शुद्धमथवा दोषो मम न दीयताम्
श्रीरामचंद्राय नमो नमः.

१४१३.

४०५१. राधाकृष्णयोः प्रेमसंपुटकाव्यम्.

RÂDHÂKṚISHṆAYOḤ PREMASAṀPUṬAKÂVYA.

Recent transcript from a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥ श्रीराधाकृष्णाभ्यां नमः ॥
प्रातः कदाचिद्दुररीकृतचारुरामावेशो हरिः प्रियतमाभवनप्रयाणे ॥
गत्वारुणांशुकतटेन पिधाय वक्रं नीचीनलोचनयुगः सहसावतस्थे ॥ १ ॥
आराद्विलोक्य तमथो **वृषभानु**पुत्री प्रोवाच हंत **ललिते** सखि पश्य केयं ॥
स्वस्यांशुभिर्हरिमणीमयतां निनाय मत्सद्म पद्मवदनाद्भुतभूषणाढ्या ॥ २ ॥
श्रुत्वा सखीगिरमथो **ललिताविशाखे** तं प्रोचतुर्द्रुतमवाप्य तदाभिमुख्यं ॥
का त्वं कृशोदरि कुतः किमु वात्र कृत्यं ब्रूहीत्यसौ प्रतिवचस्तु ददौ न किंचित् ॥ ३ ॥

End: षट्शून्यकत्ववनिभिर्गणिते तपस्ये श्रीरूपवाङ्मधुरिमामृतपानपुष्टः ॥
राधागिरींद्रधरयोः [॥] सरसोरुतटांते तत् **प्रेमसंपुट**मविंदत कोपि काव्यं ॥ १४१ ॥

इति **श्रीराधाकृष्णयोः प्रेमसंपुट**काख्यं काव्यं संपूर्णतामगात् ॥ शुभं भवतु मीती पोसशुक्ला ॥ २ ॥ गुरुवासरे सम्वत् ॥ १९४१ ॥ लिप्यकृतं ॥ सुग्रर्सा (!) ॥

१४१८.

२०९१. रामबाहुशतकम् । श्रीनिवासाचार्यः.

RÂMABÂHUS'ATAKA, by S'RÎNIVÂSÂCHÂRYA.

Beginning: श्रीगणेशाय नमः

यस्मादस्मात्समक्षा(?)गमदमरधुनी सर्वतो द्राक्समुद्रान्वृष्टिर्नूनं मृदूनामपि भवति सदानूनजाम्बूनदानाम्
चञ्चद्रत्नप्रपञ्चप्रकटकटकवानम्बरालम्बदायी बाहुः सौमित्रिबन्धो तव विबुधधुरं धारयन्मेरुबन्धुः १
यस्मिन्यस्य भरं बिभर्त्ति शयनानन्दं मुकुन्दः स्वयं भोगो यस्य महोज्ज्वलः शुभवलः सर्वत्र यो विश्रुतः
यः कूर्मेश्वरविग्रहे विजयवाग्शब्दप्रपञ्चे कृती साकेतेन्द्र फणीन्द्रवत्तव भुजस्तम्भः समुज्जृम्भते २
यः पङ्कादतिशङ्कते त्यजति यो मुद्रां द्विजेन्द्रागमे यो मित्रस्य विकासकृन्निवसति श्रीर्यत्र रात्रिंदिवम्
भेत्ता यः परकुञ्जरस्य मरुतां यत्सौरभं दुर्लभं स श्रीरामशयः कुशेशयसमः ख्यातुं न जातु क्षमः ३

End: येनायं भगवानजायत सुनासीरोर्द्धनारीगिरीशोहंकारविहारभूमिरहह ब्रह्मापि गीःकामुकः
गोपालः किल येन लोलनयनात्माऽकारि मायारिपुर्मीनाङ्कस्तव पाणिरेष कमलागारेश पारे गिराम् १०० ॥

इति श्रीरामचन्द्रचरणचन्द्रिकाचकोरायमाणश्रीमन्मारुतिसिद्धान्तसुधासमुद्रविहरमाणविद्वद्धुरीणश्रीमत्**कोतेयाचार्य**वर्यसूनु**श्रीनिवासाचार्य**विरचितं **श्रीरामबाहुशतकं** समाप्तम् । श्रीरामाय नमः ।

१४२०.

३५०. **रावणपुरवधः** । शिवरामः.

RÂVAṆAPURAVADHA, by S'IVARÂMA.

Beginning: श्रीः ॥ संसारतापव्यथिता मदीया मतिः प्रयातींदुविभूषणस्य ॥
श्रीरामचंद्रस्य च कीर्तिनीरनिधिं विगाढुं कविराजमी[मा]र्गात् १
शेषावदातं यशसो वितानमशेषमापूरयदस्य नाकं ॥
स्पर्द्धेत कोन्यः **कविराजनाम्ना** वैधेयता यं समुपैति तस्मात् २
कस्यापि कर्बुरपटो न ततान सौख्यं तेनामराः कमलभूप्रमुखाः शरण्यं ॥
देवं प्रणम्य विधिवत्कथयां बभूवुर्हे नाथ कौणपकटो बहु बाधतेऽस्मान् ३

The concluding verses occur also at the end of the author's *Kâvyalakshmîprakâs'a* (No. 1087) from where the readings shown in brackets have been taken; comp. the extracts from the author's *Lakshmînivâsâbhidhâna*, L. 723.

End: ग्रंथान्मया विरचितान्परिशीलयंतु शीलान्विताः सुमनसो मनसो मुदे मे ॥
यद्वह्निशोधितमनल्परुचा समेतं जांबूनदं [भवति] मूल्यविशेषलभ्यम् ४३
काव्यानि पंच स्तुतयोपि च पंचसंख्याटीकाश्च सप्तदश चैक **उणादिकोशः** ॥
भूपालभूषणमथो रसरत्नहारा[रो] विद्याविलास [इ]नपूर्वशरत्फलाद्याः ४४
परिश्रमो व्याकरणे(काव्या)काव्यादावपि यः कृतः ॥ सव्याख्या दिगियं तस्य **शिवरामेण** दर्शिता ४५ ॥
इति **शिवरामकृती रावणपुरवधः** ॥

Then follows a detailed list of S'ivarâma's compositions:

नृपविलासनक्षत्रमालाकाव्यलक्ष्मीप्रकाशरावणपुरवधअंत्याक्षरीकंटकोद्धाराः ५ शिवरामस्तोत्रशिवभैरवस्तोत्रगंगायमुनास्तोत्रकृष्णस्तोत्रगणेशस्तोत्राणि ५ काव्यप्रकाशवासवदत्तादशकुमारकादंबरीवृत्तकौस्तुभगणेशपुराणविनायकमाहात्म्यदशस्वग्रंथटीका एवं सप्तदश १७ सूर्यादिवर्षफलोक्तिः । आद्यपदेनालंकारसमुद्गकरहस्यचंद्रिके ७.

१४२१.

४०५८. लक्ष्मीसरस्वतीविवादः । रामानन्दशर्मा त्रिपाठी.

LAKSHMÎSARASVATÎVIVÂDA, by RÂMÂNANDAS'ARMAN TRIPÂṬHIN.

Recent transcript of a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥

ब्रह्मेन्द्रोपेन्द्रमुख्यत्रिदशपरिवृढश्रेणिभास्वत्सुधर्मा ॥ सिन्धोरावर्त्तसान्द्रध्वनिरिव विलसद्गद्यपद्यप्रवाहः ॥
नानालंकारछन्दोगुणगरिमगुणग्रामविश्रामबन्धुः ॥ श्रीभारत्योर्विवादः कलयतु सततं शर्म निर्मत्सराणाम् ॥ १ ॥

लक्ष्मीः ॥

यत्राहं तत्र भोगाः कति कति न पुनः पूर्त्तखातप्रयोगाः संयोगाः सत्सुखानां विलयमपि तथा यान्ति ये विप्रयोगाः ॥
कीर्त्तिस्तेषां हि येषां भवनमधिगता ते गुणानां निधानं वाचाले वर्वरे त्वं कथमिह रमया स्पर्धसे वाणि सार्धम् ॥ २ ॥

सरस्वती ॥

आसे यस्याहमास्ये तमिह निजगुणैः पूरयित्वा नृपाणां पूज्यं पीयूषशुभ्रैः प्रचुरतरलसद्गद्यपद्यैः करोमि ॥
त्वं तावद्यस्य कस्याप्यपि खलु भवनं भावयित्वा विधत्से बुद्धिभ्रंशं तदेतद्बद वत कमले चंचले मुञ्च गर्वम् ॥ ३ ॥

End: अब्दे खश्रुतिसागरेन्दुकलिते पक्षे वलक्षेतरे सन्मास्याश्विनके हरेः [॥] शुभतिथौ श्रीमद्गुरोर्वासरे
श्रीवाण्योरिह तीर्थराजनगरे सद्वादमत्यद्भुतं **रामानंद**सुधीश्चकार विदुषां निर्मत्सराणां मुदे ॥ ५८ ॥
एतस्मिन्मम गद्यपद्यरचनामाधुर्यमोदप्रदे श्रीवाण्योरितरेतरोक्तिगहने वादे मदीयं बुधाः ॥
स्यादेवानवधानतः खलु यथा स्वेनागच्छतां तद्वन्मे स्खलनं तदत्र कृतिभिः क्षंतव्यमित्यंजलिः ॥ ५९ ॥

इति श्रीमत्**सरयू**पारीणपंडितधुरीणमहाकुलीनश्रीम**त्त्रिपाठिम**धुकरसत्संतान**त्रिपाठिरामानंदशर्म**विनिर्मितो **लक्ष्मीसरस्वत्यो-र्विवादः** समाप्तः ॥ संवत् ॥ १९४१ ॥ पौशमासे कृष्णे तिथौ २ गुरौ वासरे ॥

१४४९.

३८२. शृङ्गारकौतूहलम् । लालमणिः.

S'ṚIÑGÂRAKAUTÛHALA, by LÂLAMAṆI.

Fol. 2: नृपस्य विलासहेतोः सन्नभिकूपघटिता विदधे विधात्रा ॥ ९ ॥
हस्तानुरोधकरिणि च विजिमू[ह्म ?]नेत्रा किंचिद्विकंचितमुखी वपुषा नमंती ॥
आलिंगिता नववधूरपि भीतभीता धूर्त्तेन किं च रमितेयमिति प्रतीमः ॥ १० ॥
आरोपितालिंगनचुंबनेन निश्वास्य पूर्वं शयने कथंचित् ॥
लम्या यतोवेधि शनैः शनैः किं प्रियेन साभोजि धूवे नवीना ॥ ११ ॥
नीविं निमुंच मम नाथ तवास्मि दासी दीपं पुनः शमय देहि कपाटयुग्मं ॥
इत्थं नवोढरमणीयवचनैः सशंकैरानंदमेव बहुधा तरुणा भजंते १२

End: यः **श्रीमालवदेश**चक्रतिलकश्रीबालकृष्णात्प्रभावत्यां जन्म किलाप्तवानिह पितुर्वाराणसीमंडले ॥
तेनोक्ते कविना च **लालमणिना** शृंगारकौतूहले काव्ये खंडमये समाप्तिमगमत्छातोदरीवर्णनं १०१५

निपीय [प]रसिकैः सदा परमतोष आतन्वतां विलोक्य कविभिः परं रचितयुक्तिराकृष्यतां ॥
निरीक्ष्य हृदि वर्णितं कठिनबुद्धिभिर्दूष्यतां तथापि मम कौतुकं न किल कोपि कोपक्रमः १०१६

इति श्रीकविपंडितबालकृष्णात्मजकविलालमणिविरचिते श्रृंगारकौतुहालाभिधे केनके खंडमये काव्ये विविधनायकावर्णनं समाप्तिमगमत् ॥ १०१७ ॥ लिखितं हंसदासेन काश्यां ॥

१४५४.

४१०६. श्रृङ्गारसरसी । भावमिश्रः.

S'ṚIÑGÂRASARASÎ, by BHÂVAMIS'RA.

Recently copied from a MS. in the Library of H. H. the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारं ॥
गुरुमवगमनप्रदमिष्टकरीमिष्टदेवतां वंदे ॥ १ ॥
अनुरंजनाय राज्ञामाज्ञामादाय रसिकलोकानां ॥
श्रीभावमिश्रकविना क्रियते श्रृंगारसरसीयं ॥ २ ॥
यः कृपया परकाव्यदूषणमपि भूषणं कुरुते ॥
तस्य पुरो मम काव्यं प्रकाशनीयं न दुष्टानां ॥ ३ ॥

तत्रादौ केशवर्णनं ॥

End: अथ शरद्वर्णनं ॥

चंद्रश्चारुमरीचिवीचिनिचयैर्द्यावापृथिव्योस्तमः स्तोमं हंत समस्तमस्तमनयत्तद्रोदसी राजते ॥
मन्ये वारिधरावरोधवियदुन्मुक्तं शरत्पूर्णिमाचंद्रं चुंबितुमृक्षमौक्तिकगणैर्वृद्धोऽस्ति दुग्धोदधिः ॥ १ ॥

इति श्रीभावमिश्रकविविरचिता श्रृंगारसरसी संपूर्णा ॥ संवत् ॥ १९४१ ॥ भाद्रप कृष्णा येकादशी रविवारसमन्वितायां कृतेयं लिपि गोविन्दसिंहवर्म्मा ॥

१४५५.

५८६. श्रृङ्गारसारसंग्रहः । शंभुदासः.

S'ṚIÑGÂRASÂRASAṀGRAHA, by S'AṀBHUDÂSA.

(The MS. No. 1456 contains the same anthology, but gives towards the end the verses in a somewhat changed order. Though older in appearance this MS. is less correct than No. 1455.)

Beginning: ॥ श्रीगणेशाय नमः अथ मंगलाचरणम्

सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारबर्हित्रासानासाग्ररंध्रं विशति फणिपतौ भोगसंकोचभाजि
गंडोड्डीनालिमालामुखरितककुभस्तांडवे शूलपाणेर्वैनायक्यश्चिरं वो वदनविधुतयः पांतु चीत्कारवत्यः १

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण
आलिंगन्योवधूतस्त्रिपुरयुवतिभिः सास्रुनेत्रोत्पलाभिः कामी चार्द्रापराधः स दहतु दुरितं शांभवो नः शराग्निः २
तपस्वी कां गतोवस्थामिति स्मेराननोत्सुकौ गिरिजायाः कुचौ वंदे भवभूतिसिताननौ ३.

End: हरनयनहुताशज्वालया यो जलाया रतिनयनजलौघैः खाक बाँकी वहाया
तदपि दहति चित्तं मामकं क्या करोंगी मदन शिरसि भूयः क्या वला आग लागी ॥ ५३ ॥
इंदुस्तत्र न शोभते प्रियतमे यत्र त्वदीयं मुखं हंसस्तत्र न भासते च सुतरां यस्यांगरागस्तव
यत्रेन्दीवरगर्भकांतिदलने नेत्रे त्वदीये जिते तेनात्मीयसुनेत्रतां सुहरिणा धिक्कृत्य दूरं गताः ॥ ५४ ॥
नामित्रेष्वपि कर्त्तव्यं सद्विजिह्वं कदाचनः श्रोत्रिये चान्त्यजे वापि समं चंद्रः प्रकाशते ॥ ५५ ॥
यभस्व नित्यं यदि शक्तिरस्ति ते दिने दिने गछति नाथ यौवनं
मृते तु को दास्यति पिंडसंनिधौ तिलोदकैः सार्धमलोमशं भगम् ॥ ५६ ॥

इति **शृंगारसारसंग्रहः** * श्रीः श्रीः श्रीः श्रीः *

१४६२.

१२६. ख. **सभ्याभरण**विवृतिः **मयूखमाला** । रामचन्द्रः.

MAYÛKHAMÂLÂ, a commentary on RÂMACHANDRA'S SABHYÂBHARAṆA KÂVYA, by the author. Ullâsas vii.–ix.

Beginning: श्रीगणेशाय नमः । अथोपकारप्रशंसा प्रकाश्यते ।
द्वंद्वस्यावयवैः परार्थपरतामध्यापिता ये चिरं हंतैतान्स्तुतिगोचरं न गमयाम्येवं न निंदामि च ॥
ते जीवंतु परं परार्थपरतास्त्राचार्यकं स्वीकृतं येषां तत्पुरुषस्य तैरवयवैः स्वार्थादरेणोज्झितः ॥ १ ॥

इह प्लक्षन्यग्रोधावित्यादिषु द्वंद्वपदेषु प्लक्षपदस्य स्वार्थमिलितपरार्थे सति न्यग्रोधपदस्य च स्वार्थमिलितप्लक्षार्थे इति वैयाकरणमतं । साहित्ये लक्षणेति मीमांसकास्तत्रेदमुच्यते । ये द्वंद्वावयवैः परार्थपरतां शिक्षिताः स्वार्थाविरोधेन परार्थं साधयंतीति यावत् । तान्न निंदामो नापि स्तुमः । यतः परार्थपरा न निंद्याः स्वार्थपरा न स्तुत्यास्तेषु चोभयं वर्त्तते इति नोभयविषया इत्यर्थः । एतेन सामान्यपुरुषा उक्ता उत्तरार्द्धेनोत्तमानाह ।

Fol. 47: प्राप्तप्रौढिरशेषे शास्त्रविषये **श्रीविश्वनाथः** सुधी[य]र्यं धीमंतमसूत शोभनसमारंभा च **रंभा** सुतं ॥
श्रीसभ्याभरणस्य साधुविवृतौ श्री[भ]**रामचंद्रा**भिधस्योक्तौ तस्य गता समाप्तिमचिरादेषोपकारस्तुतिः ॥

श्रीरामभद्र जय इति **श्रीविश्वनाथ**तनयेन श्रीरामचंद्रचरणोपासिनां **विलग्रामवासिना रामचंद्रेण** रचितायां स्वकृत**सभ्याभरणपंजिकायां मयूखमालायां** सप्तम उपकारप्रशंसोल्लासः समाप्त् ॥ ॥ श्रीगणेशाय नमः ॥ ग्रंथसंख्या १७५० ॥ ॥ अथ **नीतिः**
य एकतामिव गतः परं जानाति सेवितुं । तस्यैव तदुत्तरात्तश्रीरामंत्रितसुवंतवत् । १ ।

Fol. 67: प्राप्तप्रौढिरशेषशास्त्रविषये **श्रीविश्वनाथः** सुधीर्यं धीमंतमसूत शोभनसमारंभा च **रंभा** सुतं ॥
श्रीसभ्याभरणस्य साधुविवृतौ । **श्रीरामचंद्रा**भिधाभाजस्तस्य कृतौ समापदधिचादुनास[°दचिराटुल्लास] एषोष्टमः ॥

इति श्रीमदनेकविद्वदंतेवासि ॥ वंदितपादारविंदस्य **महाराष्ट्रज्ञातिमंडन** ॥ ॥ श्रीगणेशाय नमः अथ **दैवप्रशंसा** ।

End: अधिकं तु प्रयोजनप्रस्तावे निरूपितं ॥
प्रयो जनः कलितमत्सर एवं संतः कुत्रापि ते परगुणैः परितोषवंतः
त्वत्कारितेन तदेन निबंधनेन सीतासहाय परितुष्य परं त्वमेव ॥ १ ॥
मंदा **महाभाष्यमहार्णवं** ये तरीतुमुद्वेलममुं न शक्ताः ।
तत्रापनीतैः कृपया तदर्थं विलासवापी रचिता मेयं ॥ २ ॥
सुजनानां स्वभावेन गुणे स्नेहः स्नेहेरिव ॥ जायते गुतु गुणे द्वेषो द्विषोरिव दुरात्मनां ॥ ३ ॥
मंदानां मादृशामेव कृतेयं संग्रहः कृतः स्फुरत्स्वकलशास्त्रार्थस्तन्मामुपहसंतु म ॥ ४ ॥
याचे कृतांजलिपुटो भवतो दयालूनालोकितेन भवतां हृतदूषणेन ॥
पत्नीव दाशरथिनेव सुमनेः सदोषा येषा कृतिः सगुणतां कवयः प्रयातु ॥ ५ ॥
श्रीविश्वनाथसूनोरुक्तिं नम्रस्य रामचंद्रस्य । सुधियः शोधयंत्वेतामुत्सारितमत्सराः सदयं ॥ ६ ॥
दोषप्रीतिमंतो दोषा गुणप्रीतिमतां गुणः । दृष्टौ पातति कस्तत्र विषादो हर्ष एव वा । ७ ॥
आनंदयेत्सुकृतिनः कृतिरियमवधीरिता खलैर्यदपि । विलसति नृपालमौलौ चंपकमलिनावहेलितं तदपि ॥ ८ ॥
ग्रामे प्रकाशासविधौ **विलाले** विघ्नेशयुक्तोस्ति मठे रमेशः ।
तस्याज्ञया मंदधिया मयायं ग्रंथः कृतत्सुकृतं पितु स्तात् ॥ ९ ॥
प्राप्तप्रौढिरशेषशास्त्रविषये **श्रीविश्वनाथः** सुधीय धीमंतमसूत शोभनसमारंभा च **रंभा** सुतं ॥
श्रीसभ्याभरणस्य साधुविवृतौ **श्रीरामचंद्रा**भिधाभाजस्तस्य कृतौ समापदचिरादुल्लास एषोतिमः ।

इति श्रीमदनेकविद्वदंतेवासिवंदितपादारविंदस्य **भट्टविश्वनाथस्य** तनयेन श्रीरामचंद्रंचरणकमलोपासिना प्रकाशासन्निहितां विलालग्रामवासिना **रामचंद्रेण** निर्मितायां स्वकृत**सभ्याभरणपंजिकायां मयूखमालायां**मंतिम उल्लासः समाप्तः ॥ समाप्तोयं ग्रंथः सीतापतेः सप्रसादात् ॥ श्रीरस्तु जगतः । ॥ ॥ संख्या २६७५.

१४६३.

४१४. **सभ्याभरण**विवृतिः **मयूखमाला** । रामचन्द्रः.

A manuscript of the same work as No. 1462, containing Ullâsa viii. (foll. 1-32) and foll. 4-37 of another Ullâsa, called *Râjapras'amsâ*. The leaves of the two Ullâsas are numbered separately.

Fol. 4: पदं तवाविभक्त्यंतमपरस्वादिसंगतं महाराज महाश्चर्यमनेकार्थसमर्पकं ४

विविधा विभक्तयो रचनाविभक्तयः न विद्यते विभक्तीनामंतो यस्मिस्तदविभक्त्यंतं विविधप्रकार[प्रका]प्रतोलीप्रासादसौधादि-रचनांचितमित्यर्थः अपरस्वादिसंगतमिति परस्वादिभिः परधनपरजातीयापरद्रोहादिदोषैर्नालिंगितमित्यर्थः । अनेकार्थेति गलतु-रगादिविविधार्थसमर्पकमित्यर्थः महांति आश्चर्याणि यस्मिंस्तन्महाश्चर्यं पदं सुप्तिङंतं पदमिति शास्त्रीयं विभक्त्यंतमेवार्थं समर्पकं यश्च राजभ्यामित्यादौ प्रकृतिभागः पदं सोपि स्वादिष्वसर्वनामस्थान इति स्वादिसंगत एव पदत्वं नलोपादिसिद्ध्ये लभते तव तु पदमविभक्त्यंतमथ च न परैः स्वादिभिः संगतमथ चानेकार्थसमर्पकमित्याश्चर्यं शास्त्रपक्षे । ननु सुप्तिङंतपदमित्यनेन सप्तमीबहु-वचनांतस्य पदसंज्ञा दीयते तथा चाविभक्तिकस्यापि पद्येतऽर्थेनेनेति पदमित्याश्रयणावपदत्वव्यपदेशो दुर्वार इति चेत् । उच्यते । तत्र सुबिति प्रत्याहारग्रहणं न बहुवचनस्य ।

Fol. 37: अनुदात्तं पदमित्यत्र यद्वक्तव्यं तदभिहितं निहन्यते नाम पदमित्यत्र श्लोके ॥
प्राप्तप्रोढिरशेषशास्त्रविषय **श्रीविश्वनाथः** सुधीर्ये धीमंतमसूत शोभनसमारंभा च **रंभा** सुतं ।
श्रीसभ्याभरणस्य साधुविवृतौ **श्रीरामचंद्रा**भिधाभाजस्तस्य कृतौ समाप्तिमचिराद्राजप्रशंसागमत् ।

इति **श्रीविश्वनाथतनयेन** श्रीरामचंद्रचरणोपासिनां **बिलालग्रामवासिना रामचंद्रेण** रचितायां सूक्तसभ्या**भरणपंजिकायां मयूखमालायां राजप्रशंसोल्लासः** समाप्तः.

The viii. Ullâsa begins:

Fol. 1: श्रीगणेशाय नमः । अथ **नीतिः**
य एकतामिव गतः परं जानाति सेवितुं । तस्यैव तदुदात्तश्रीरामंत्रितसुवंतवत् १

Fol. 32: प्राप्तप्रौढिरशेषशास्त्रविषये **श्रीविश्वनाथः** सुधीर्ये धीमंतमसूत शोभनसमारंभा व **रंभा** सुतं ।
श्रीसभ्याभरणस्य साधुविवृतौ **श्रीरामचंद्रा**भिधाभाजस्तस्य कृतौ समापदविराड्डुनास एवोष्टमः ।

इति श्रीमदनेकविद्वदंतेवासिवंदितपादारविंदस्य **महाराष्ट्रज्ञातिमंडन**....

१४६६.

७५७. सूक्तावलिः । भर्तृसारस्वतः.

Sûktâvali, by Bhartṛisârasvata.

The MS., written in a modern Kashmirian hand, begins with fol. 6. The copyist uses occasionally S'âradâ characters.

Fol. 6: ॐ श्रीगणेशाय नमः ॐ
तैर्गत्तेतश्चिरमाखुभक्षितपरित्यक्तैः स्थितं पत्रकैः
तानि प्राप्य कुतश्चनादृतधिया कौतूहलाम्न्विताश्शिष्याग्रे **रसलोष्टकेन** कतिचित्**सारस्वतस्योक्तयः**
स्तुतिः परोचनाभेद श्रृंगारः कालवर्णनं चाटून्यन्यापदेशश्च लोकवृत्तं प्रकीर्णम्
प्रेहेलिकाथ वैराग्यमिति पद्धतयो दश ताश्च हारितशिष्टत्वासम्पूर्णा इव स्थिताः

अथ स्तुतिः
प्रीतिप्रस्ततमूर्धचुम्बननमश्चंडीशमौलिस्खलच्चंडाचंद्रकलासमिर्थितगुहप्रोत्खातदंष्ट्रांकुरः
देवीकल्पितदीर्घदुश्चरतपसम्भारविघ्नार्पणप्राप्तप्राज्यपितृप्रसादमुदितो वंद्यो म[ग]णानां पतिः
किंचित् कुंडलिताग्रमध्यविनमन्नासातुवंशस्थितिं शिंजानभ्रमरावलीविरचितप्रत्यग्रतंत्रीगुणाम्
गम्भीराननगह्वरां भणवतीं वीणां गणानां पतिव्यातन्वन्नुपमात्तमीश्वरसिव प्रेंणे परायास्तु वः.

Fol. 7: इति **भतृसारसुत**वातौ[कृतौ] **सूक्तावल्लौ** स्तुतिपद्धतिः प्रथमा १.

fol. 9 *parochanâbhedapaddhati*; fol. 14 *s'ṛiṅgârapad°*; fol. 14 *kâlavarṇanapad°*; fol. 16 *châṭupad°*; fol. 19 *anyâpades'apad°*; fol. 29 *lokavṛittapad°*; fol. 31 *prakîrṇapad°*; fol. 35 *prahelikâpad°*.

End: इति श्रीमद्भर्तृसारसुतकृतायां सूक्तावलौ वैराग्यपद्धतिदशमी ॥

अधीतये [अधीते य] इमां पूर्णा सूक्तावलिमशेषतः दशपद्धतिसम्बद्धा [संबद्धां] सम्यस्सद्भिः प्रकीर्तितः ॥

समाप्तेयं संपूर्णा सूक्तावलिः ॥

१५००.

६४५. प्रभावतीप्रद्युम्नः । रामकृष्णसूरिः.

PRABHÂVATÎPRADYUMNA, by RÂMAKṚISHṆA SÛRI.

Beginning: श्रीगणेशाय नमः ॥ ॥

पादांतप्रणतोपि कांतवचनप्राचुर्य्यचातुर्य्यभाग्दृष्ट्वा मानपरां श्रियं नतमुखीं वाष्पाक्तनेत्रां विभुः ॥

किं ते पृष्टतले सरोजवदने सर्प्पः समुत्सर्प्पतीत्याख्यानेन चमत्कृतामवतु वः संदर्श्य वेणीं हसन् ॥ १ ॥

अपि च ॥

मुखं लक्ष्म्याः पश्यन् स्मितमधुरमुत्फुल्लनयनं त्रपासाचि प्राचीपतिरिपुनिहंता मुररिपुः ॥

वदन्नित्थं पायाच्छशिमुखि पुरः पश्य विलसत्करश्चंद्रः प्रांशुं गगनमधिरोढुं व्यवसितः ॥ २ ॥

नांद्यंते सूत्रधारः ॥ अलमतिविस्तरेण । पुरोवलोक्य । सविस्मयं । आः कथं मया ॥

गतं प्रांते पृथ्व्या विविधनगरीनागरवृते श्रुतं शास्त्रं तत्तन्नृपगणगुणग्रामसहितं ॥

श्रियोपीष्टा दृष्टा विबुधनृपनागाधिपसदःसमासीनाः पीनाः परमिह मुदं यामि सदसि ॥ ३ ॥

End: प्रद्यु ॥ भगवन् किमतः परमपि प्रियमस्ति । तथाप्येतदस्तु ॥

शासंतां वसुधाधिपा भुवममी भूमीसुरार्चापरा वाचः काव्यकृतां भवंतु सुरसा लोकाः सुखं प्राप्नुयुः ॥

लाभस्ताद्वणिजां क्रयव्यवहृतैर्दौर्जन्यहानिर्भवेत् दुष्टानां रसिका भवंतु सुखिनः श्री रागिणी स्ताद्गुणे ॥ ९ ॥

नारदः ॥ एवमस्तु ॥ * ॥

इति निःष्क्रांताः सर्वे ॥ * ॥ इति श्रीवैष्णवाग्रगण्यभगवतीदासोत्तेजि[जि]तरामकृष्णसूरिसूचिते प्रभावतीप्रद्युम्ननाम्नि नाटके पंचमोंकः ॥ ॥ श्रीरस्तु ॥ ॥

अथ हालाद्गते काले खबाणरसभूमिते सिताश्विनद्वितीयायां कृष्णानंदोऽलिखत्सुधीः ॥ ॥

शुभमस्तु ॥ ॥ श्रीः.

१५१६.

३२१. रत्नावलीटीका रत्नावलीद्युतिः । गोविन्दः.

RATNÂVALÎDYUTI, a commentary on HARSHADEVA'S RATNÂVALÎ, by GOVINDA.

Beginning: श्रीगणेशाय नमः ।

गणाग्रगण्यः स ददात्वगण्यकल्याणपक्ष्माणगणं नृणां ना ।

नाभ्यस्तजज्ञानसमानमानं तुष्टे पते विघ्नतमोतमोहा १

गोविंदेन विदा विद्वदामोदाय सदा मुदा । **रत्नावली** नृरत्नेन द्योत्यते नाटिकाधिका २

प्रारिप्सितपरिसमाप्तिस्वेष्टदेवतास्मृत्याशीरुपमंगलमनुचरति नांदीचतुष्केन । पादात्रस्थितयेत्यादि । विश्लिष्यन् शिथिलीभवन् पुष्पांजलिः पात्विति शिवशिवास्मृतिर्मंगलमिति सूचितं । शेषं स्पष्टं १.

End: इति निष्क्रांताः सर्वे चतुर्थोंकः ॥ इति **गोविंदकृतरत्नावलीद्युतिः** समाप्तः ॥ ॥ शुभमस्तुः ॥ श्रीकृष्णाय नमः ॥

१५२९.

९. भूर्ज०. **कादम्बरी** । बाणभट्टः तत्पुत्रः पुलिनश्च.

Bâṇa's Kâdambarî, with the Uttarabhâga supplied by his son Bhaṭṭa Pulina.

The MS. is a carefully written and well preserved Bhûrja Codex in S'âradâ characters, dated S'aka 1569 (A. D. 1647). Size 8 in. by 8½ in.; the binding is modern.

In the colophon at the end the completion of the work is ascribed to Bâṇa's son *Pulina*. The name of this son is elsewhere given as *Bhûshaṇabhaṭṭa* (see Prof Bühler, *Two Lists of Sanskrit MSS.*, in German Oriental Society's Journal, xlii., p. 541).

The text agrees on the whole with that found in Prof. Peterson's Edition. At the end of the Pûrvabhâga a considerable supplement is found in the Jammu MS. (foll. 181-182) resembling in its composition that quoted by Prof. Peterson from his MS. B. on p. 173 sqq.

This supplement which follows upon the concluding words of the Pûrvabhâga as given at p. 237 of the Edition, consists of: (1) the first sentence of the *Uttarabhâga* (p. 240 of the Edition); (2) the passage of the *Uttarabhâga*, p. 242, ll. 6-15, followed by the words इत्येतदभिधाय तूष्णीमभूत्; (3) the passage in the *Uttarabhâga*, pp. 243, l. 3—244, l. 12, omitting p. 243, l. 21 from तथावस्थितां to मामवलोक्य p. 244, l. 2; (4) the verse:

हारो जलार्द्रवसनं नलिनीदलानि प्रालेयशीकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसान्यपि चन्दनानि निर्वाणमेष्यति कथं स मनोभवाग्निः ॥

following upon the words न्यपीदद्गवीच of the preceding passage.—This verse occurs also in the *Amarus'ataka* (see O. von Böhtlingk, Ind. Sprüche ², 7385)

The passages (2) and (3) of the above supplement are not repeated in the Uttarabhâga of the Jammu Ms.

The Pûrvabhâga is concluded (fol. 182) by the colophon: बाणखण्डस्समाप्तः ; then follow (fol. 183) the verses of the introduction to the Uttarabhâga, as in Prof. Peterson's Edition.

The colophon to the Uttarabhâga (fol. 279) reads:

End: समाप्तेयं महाकवेर्भट्टबाणस्य कृति× कथा **कादम्बरी** सम्पादिता तत्सूनुना **भट्टपुलिनेन** ॥ लिखिता च **भट्टदामोदरकेण भट्टशङ्करानन्दाय** ॥ सं २३ ज्ये वति १३ रवौ ॥ श्रीशाकाः १५६९ ॥

कादम्बरीरसं पीत्वा कर्णशुक्तिपुटेन च जनस्सुखेन निद्राति मत्तमत्त× पदे पदे ॥

आदर्शप्रतिबिंबत्रिगुणभाग्रत्पतिमध्यात्ययं कुर्वन्निर्विकृतीप्रतीतममलैः सत्वेन यद्योगिभिः ॥
आस्ते सन्निहितं खवत् श्रुतिसुधीवाचामगम्यं सदा ॥ ज्योतिस्तत्परमं नमामि करणव्यापारपारे स्थितं ॥ २ ॥
नत्वा गुरुनिष्टदेवान्व्रज्यासारं करोम्यहं ॥ रसकल्पद्रुमं नाम ग्रंथं ग्रंथविदां वरं ॥ ३ ॥
यद्यपि बुधाः पराभिव्रज्याभिर्नाम तृप्तिमापन्नाः ॥ आस्वादयंतु चैनं ग्रंथं तांबूलमिव तथापि ॥ ४ ॥
आद्यः सर्वमहीभुजां प्रतिभटध्वांतैकधर्मद्युती । राज्यश्रीनववल्लिवेष्टितभुजस्तंभद्वयः सद्दयः ॥
अष्टाशाकरिकर्णतालजमरुन्मूछत्प्रतापानलः क्ष्माभृन्मौलिसुलालितांघ्रिरितमाद्दौलेति नामाभवत् ॥ ५ ॥
त्रिभुवनजनगीतोद्दामचायप्रतापश्चरणकमलनम्रोत्सारितानेकतापः ॥
अजनि करवरोच्चैर्मांसलस्कंधपीठः सुततुरसकपानः सूतुरस्मान् क्षतारिः ॥ ६ ॥

Fol. 3: अथान्योक्तिरलंकारो बुधैरिह विभाव्यतां । एवं प्रस्तावसंख्या तु पंचषष्टिप्रमाणिकाः ॥ २८ ॥
श्लोकैः सहस्रसंख्याकैर्जातो ग्रंथोदयः शुभः ॥ वाणसार्षिशसीकांके वैशाखे पौर्णमाग्गुरौ ॥ २९ ॥
अथ मंगलाचरणं ॥

End: इति श्रीमत् शायस्ताखानकारिते चतुर्भुजमिश्रविरचिते रसकल्पद्रुमे व्रज्याग्रंथे समस्तरसविषयान्योक्तिपरिछेदः ॥ समाप्तोयं रसकल्पद्रुमो नाम ग्रंथः ॥ मिती भादवासुदी । १४ ॥ संवत् ॥ १९ ॥ ४१ ॥ का ॥ लि० ॥ खरातीराम अलवरमध्ये ॥ श्री श्री श्री श्री श्री श्री ॥

Fly-leaf: अल्वरदेशभूपसवाइमङ्गलसिंहेन श्रीरणवीरसिंहवर्मणो जंबूराजस्योपायनतया प्रेरितोयं ग्रंथः.

१४००.

५४२. राघवनैषधीयं सटीकम् । हरदत्तसूरिः.

RÂGHAVANAISHADHÎYA, by HARADATTA, with a commentary of the author.

The author gives *Haradatta* as his name (see commentary to verse 1 of Sarga i. and verse 21 of Sarga ii.); the colophons have *Haridatta*.

Beginning: Comm. श्रीगणेशाय नमः

अभिवंद्य परात्मानं गुगिरं च गुरूनपि विवर्वरीमि श्रीरामनैषधीयं निजं हरः १

विशिष्टशिष्टाचारपरंपराप्राप्तश्रुतिमूलकशिष्यशिक्षादक्षमांगलिक्योद्दामसमुच्चयवीजकश्यपावतारभगवपितृचरणोच्चरणरूपमंगलाचरणं पौरस्त्यपुण्यश्लोकस्तवनद्रढिम ग्रंथकारः पर्यगुंफीत् । दशरथेति ननु मंगलस्य कियद्धात्वं भवतीत्यपेक्षायामाह आशीर्नमस्क्रिया वस्तुनिर्देश इति त्रिधा अत्र वस्तुनिर्देशात्मकं मंगलं वितायते अत्र पद्ये मालिनीवृत्तम् मनौ मित्रे इति नगणस्य मित्रत्वं नाम्नः परमसौख्यकृत् अतो नद्वयप्रक्षेपः दोधः सौख्यमिति श्रीनारायणभट्टारिकायां दकारस्य पूर्वन्यासः पैंगलादाहृत्य व्याचष्टे सः अवर्णात्संपत्तिर्भवतीति अकारव्यामिश्रदकारपाठः किमेतावता प्रयासेनेति चेत् अक्षरे परिशुद्धे तु नायको भूतिमृछति इति ग्रंथकृत्परमफलप्राप्तिः आनुषंगित्वेन श्रोतॄणां पाठकर्तॄणां च फलातिशायनं वोभवतीति ।

Text. दशरथ इति नाम्ना वीरसेनः क्षितीशः क्षितितलविबुधानां वंदथुः प्राग्बभूव
गुरुकविबुधजोषः सामृतो नारदाढ्यः सति नरपतिरत्ने मर्त्यलोकोप्यनाकीत् १

Fol. 35: इति श्रीहरिदत्तसूरिकृते महाकाव्ये राघवनैषधीये प्रथमः सर्गः ॥

१५४५.

२९१. बृहत्कथा । क्षेमेन्द्रः.

BṚIHATKATHÂ, by KSHEMENDRA.

The MS. begins with fol. 51 in the *Ahalyâkhyâyikâ* of the iii. or *Lâvânaka* Lambaka:

Fol. 51: सुकृतैरेव सुकृतैरीदृशी प्राप्यते स्थितिः । शापदुःखभयक्लेशोः सह्यंते तु विपर्यये ।
पुरा मार्जाररूपेण प्रियां शक्रेण धर्षितां । **अहल्यां गौतमो** ज्ञात्वा प्रोवाच ज्ञानलोचनः ।
आश्रमं कः प्रविष्टो मे श्रुत्वेति प्राह तद्वधूः । मार्जार इत्यपशंसगिरा जंलारिरागिणी ।
इत्युक्तिकुपितस्याथ तस्य शापेन वृत्रहा । अभूद्भतसहस्रांकः शिला च मुनिकामिनी ।
तिलोत्तमां सहस्राक्षो दृष्ट्वाहल्या च राघवं । अवाप्स्यतः शापशांतिमित्याह मुनिपुंगवः ।
इत्यापदो भवंत्येव महतामपि दुःकृतैः । **वसंतकस्ये**ति वचः श्रुत्वा देव्यौ ननंदतुः ।

अहल्याख्यायिका ।

Fol. 64: इति **क्षेमेंद्र**विरचितायां **बृहत्कथायां लावानको** नाम तृतीयो लंवकः ॥

Fol. 371: इति **क्षेमेंद्र**विरचितायां **बृहत्कथायां महाभिषेको** नाम सप्तदशो लंभकः समाप्तः ॥ ॥

अतः परं **सुरतमंजरी** भविष्यति ॥ ॥ This last (xviii.) Lambaka breaks off after the *Dhîvarâkhyâyikâ*:

Fol. 380: पुरायोध्याधिनाथेन भूभुजा **वीरवाहुना** । वीरचर्याप्रयत्नेन प्राप्तश्चोरो महार्थहृत् ।
एकांयारी स निहितः शूले नगरे शूलहृत् । दृष्ट्वा पूर्वं वणिक्पुत्र्या **रोमादत्ता**ख्यया युवा ।
तन्निवद्ध दृढं हस्ते ह दृष्टिरागानुरागिणी । दुग्नेपि हारमात्मानं तं विना कर्तुमुद्ययौ
प्रयत्नवेत्सलां देवी प्राह तामथ पार्वती । मा कृथाः साहसं पुत्रि सा चौरौ गुलिकाधरः ।
विद्याधरी पूर्वभार्या तस्य त्वं हृदयप्रिया । शापः क्षीणाद्य युवयोर्तेज विद्यां….

The following stories from the extract of the *Pañchatantra*, contained in the *S'aktiyas'as* (xvi.) Lambaka, are given here for comparison with the text published by Dr. L. von Mankowski in his "Auszug aus dem Pañchatantra in Kshemendra's Bṛihatkathâ" (Leipzig, 1892).

Fol. 348: दाक्षिणात्ये जनपदे विबुधव्रातसेवितं । **महिलोरूप्य**तेनामास्ति पुरं सुरपुरोपमं ।
वर्द्धमानकनामाभूत्तत्रावतिधनादा वणिक् प्रस्थितो देवयात्रायां स विवेश महावमं ।
तत्रास्य विषमे माग्नविदीर्णपदविक्तवः । धुर्याविषणो वृषभो वृषांकवृषसन्निभः ।
याते वणिग्वरे त्युक्तस्तन्नियुक्तः स रक्षिभिः । वानोषधिचयाहारः । कालेन स्वास्थ्यमायायो ।
पीनदर्प्पाकृतिवलो जातः **संजीवका**भिधः । निर्ज्जनापांतसाम्येपु स्वच्छंदसुखचारिगि ।
उदकार्थं समभ्यात्**पिंगला**ख्यो मृगाधिपः । वनं यत्केसरिकरैः साट्टहासमिवाभवत् ।
स शुश्राव वृषस्योग्रशृंगाघ्राछटं तटे । टंकारनादमुहुंखरे हुंकारनिविध्वनिं ।
श्रुत्वा तदुग्रनिनदं विमर्शस्थगितक्रमः । स तस्थौ फुल्लरोमांकः पीनलांगूलपल्लवः ।

करटो मदनश्चैव सविवौ तस्य जंबुकौ दूरतश्चित्तसंक्षोभं विलोक्य स्वैरमूचतुः ।
पूर्वसंस्कारयोगेन सत्वात् मुनिवारणवा । स्फुरत्येव रतिप्रायः पश्वूनामतिभारती
तेत्राब्रवीद्दमनकः । सखे किमयमीश्वरः । अदृष्टशव्दमात्रेण क्षोभाकुल इवेक्ष्यते ।
तत् श्रुत्वा धीतां धुर्या हसत्करटकोब्रवीत् । निरर्थचिंता वोशन किं प्रायोजनमावयोः ।
स्युः प्रयोजनकर्त्तारः सर्वदुःखस्य भोजनं । अकार्यदुग्रदग्रस्तः कीलोत्पाटीव वानरः ।
न श्रूयते नगरान्यासे नवनिर्म्माणकारिणः । अर्द्धपाटितकाष्टाराः । पुरा स्थपतयो ययुः
गतेषु तेषु विपुलः । कपिसार्थः समाययौ चलितानेकविन्यस्तस्तंभादिनवानामितः ।
तत्रैकश्चायालात्कीलां पाटिस्तंभमस्तकान कर्षतुवाच केनायमास्थाने विनिवेशितः ।
तस्मिन्नभ्युद्धृते यंत्रकीलके घुष्कपीडनात् । समुद्घाटितरंध्राग्रे सहसा निधन ययौ ।

वानराख्यायिका ॥ ॥ (See von Mankowski, i. 1-17, p. 1).

Fol. 364: जाते सुते सते विप्र कदाचिन्निर्गतो गृहात् । रक्षार्यै नकुलं धृत्वा पुत्रस्य गृहयोषितः ।
अस्य सर्प्पे महाभोगं वालहिंसार्थमुछितं ॥ नकुलः खंडशः कृत्वा रक्ताक्तो निर्ययौ गृहात् ।
तमभ्येत्य द्विजो दृष्ट्वा शिशुं मत्वा हतं सुतं । प्रविश्यैव च कोपांधो जघान मकुलं क्षणात् ।
गृहं प्रविश्य निहतं वीक्ष्य सर्प्पं भयंकर । स्थितं च वालकं स्वस्थं शुशोचानुशयाकुलः ।
तमेत्य प्राह दयिता धिक् त्वां माहसकारिणं । हितकृन्नकुलो येन क्रोधांधेन निपातितः ।
असम्यगक्षे तं दृष्टां पडितो नानुवर्त्तते । अनुकारात्परिभवं याति नापितवन्नरः ।
वणिक् क्षीणधनोपश्यत् स्वप्ने भिकुचयं पुरा । तेश्वसव्याकृतः स्वप्नेस्मांस्त्वं द्रविणमाप्स्यसि
स प्रवुद्धो वणिक् प्रातः दृष्ट्वा भिक्षुत्रयं पुरः । अताडयत्ताडितास्ते वभूवुर्ध्दनराशयः ।
तच्चित्रं नापितो दृष्ट्वा वणिग्वेश्मनि दुर्म्मतिः । धनार्थी स्वगृहं गत्वा जघान किल भिक्षुकं ।
तं भिक्षुकवधाद्राजा निजग्राहेति नापितं । इत्येनालोच्य कार्येषु प्रवृत्तिर्दुःखदा नृणां ।

नापिताख्यायिका ॥ ॥ (Comp. von Mankowski, v. 9-18, p. 31sq.)

१५७६.

४१३८.क. **आचारतत्त्वम्** । हरिप्रसादः.

ÂCHÂRATATTVA, by HARIPRASÂDA.

Beginning: ॥ श्रीगणेशाय नमः ॥

नत्वा हेरंवमातुः पदकमलयुगं प्रातरुत्थाय पुण्य । श्लोकान्स्मृत्वाथ रक्षोदिशि पटपिहितं कं विधायेषुमात्रम् ॥
गत्वा ग्रामादयज्ञैस्तृणदलनिचयैरावृतायामभस्मक्षेत्रांभःपर्वतायां भुवि विगतवचाः कर्म मैत्रं विदद्यात् ॥ १ ॥
वल्मीके फालकृष्टे चितिसुरसदने दर्भपुष्पे सघासे सेव्यच्छायेषु वृक्षेष्वपि पथ दहने तीर्थतीरेषु गोष्टे ॥
न प्रत्यर्काग्निसंध्याद्विजनलसुरभीस्त्रीद्विजर्क्षे न गच्छन्नोत्तिष्ठन्नैकवासा न च जनसविधे मैत्रमिच्छंति संतः ॥ २ ॥

End: **मकरंदः** प्रथमोभून्माथुरकुलपुंडरीकमकरंदः देवपुरोहितमपि यो पुरोहितेनात्मना जहास सुखं ॥ ६३ ॥
नित्यं पद्मनि यमजस्य मधुरालापैर्यदभ्यस्यते वाग्देवीकरवर्त्तिपंजरशुकैस्तन्नाम दिव्यं यशः ।
तच्चौदार्यमखंडितं द्विजकुलं यत्राप्तकामं प्रियो नाम्नैवाभिमतः सतां द्विजवरस्सोयं कथं कथ्यते ॥ ६४ ॥

आवासो वदनाम्बुजं गुणगणो यत्रानिशं सेवकः ॥ शीतांशुद्युतिसोदरा सहचरी कीर्त्तिर्विभूषायणः ॥
इत्यालोच्य विहाय नाकिनिलयान् ॥ वाग्देवता सादरं यस्मिन्वासमरोचयद्विजयतां सोयं गुरुर्नः सदा ॥ ६५ ॥
पांडवा इव तस्यासन् पंच पुत्रा महौजसः प्रकाशंते धरावेद्यां तेष्वग्रय इव त्रयः ॥ ६६ ॥
श्रीविद्यानंदरूपेशश्रीगंगेशेन सा त्रयं ॥ मुख्येन राजते भूमौ रुद्रेणेव सुरत्रयी ॥ ६७ ॥
हरिप्रसादेन कृतं तत्पुत्रेणदमाह्निकं ॥ आकल्पमाकल्पमिव कंठे धार्यं द्विजातिभिः ॥ ६८ ॥
इति हरिप्रसादकृत आचारतत्व समाप्तं ॥ संवत् १९४१ का चैत्र ॥

१५९३.

२५३०. आशौचीयदशश्लोकीविवृतिः । विश्वेश्वरः.

ÂS'AUCHÎYADAS'AS'LOKÎVIVṚITI, by VIS'VES'VARA.

Beginning: श्रीगणेशाय नमः ॥ ॥

नमस्कृत्येश्वरं नानाधर्मशास्त्रानुसारिणी ॥ आशौचीयदशश्लोकीविवृतिः क्रियते मया ॥
श्रीलक्ष्मीधरसूरींद्रचरणाब्जरजःकणम् ॥ उद्वहन् शिरसा शुद्धिं शुद्धिन्नेतुमिहोत्सहे ॥ २ ॥

तत्राशौचनिमित्तं तावन्निरूप्यते अत्र विज्ञानेश्वरवाचस्पतिमिश्रादयः जननादिज्ञानमेवाशौचनिमित्तं श्रुत्वापुत्रस्यजन्मवेत्या-दिवचनात् । विगतं तु विदेशस्थं श्रृणुयाद्यो ह्यनिर्दशं यच्छेष दशरात्रस्य तावतैवाशुचिर्भवेदितिमनुवाक्याच्च.

End: यं शास्त्रसार्थपरमार्थविचारचारुर्लक्ष्मीधराभिधबुधः समसूत तेन ॥
विश्वेश्वरेण बहुमूलनिबंधजातव्यामर्शनादरचि शुद्धिरहस्यमेतत् ॥ ॥
पूर्वैर्निबंधकारैर्यद्यपि सर्वोपि विशदितोऽस्त्यर्थः
तदपि मयानायासाद्वेत्तुमुपायोयमारचितः ॥ ॥
स्वबुद्धेरानुरूप्येण सदसद्वेह यत्कृतं कल्पतां तदनल्पायै प्रीतये परमात्मनः ॥

इति दशश्लोकीविवरणं संपूर्णम् ॥ ॥ श्रीः ॥ ॥ १६३८ ॥

१५९८.

४४०२. उपाकृतितत्त्वम् । बालकृष्णपायगुण्डः.

UPÂKṚITITATTVA, by BÂLAKṚISHṆA PÂYAGUṆḌA.

Beginning: ॥ श्रीगणेशाय नमः ॥ श्रीसूर्याय नमः ॥

श्रीम्हालसापतिं नत्वा खंडेरायं कपर्दिनं ॥ पायगुंडो बालकृष्णः प्राह तत्वमुपाकृतौ ॥ १ ॥

तत्र तावत् विश्वरूपेंद्रस्वामिनः तत्र आपस्तंबसूत्रं श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासप्रदोषे नाधीयीत तैष्यां पौर्णमा-स्यां रोहिण्या वा विरमेदर्धपंचमांश्चतुरो मासानित्येके इति । पौर्णिमा च द्विधा । चतुर्दशीयुक्ता अयुक्ता च । तत्र चतुर्दशीयुक्ता-यामुपाकर्म न कर्त्तव्यं । तदुक्तं कालिकापुराणे ।

End: इति श्रीमत् पायगुंडोपाख्यबालंभट्टोन्नीतमुपाकृतितत्वं परिपूर्णम् ॥ सं १८४८ मिति मार्गशिर शुक्लपक्षौ ग्रंथ संपूर्णं ॥ सुभं भवतु ॥ ग्रंथसंख्या २९७०.

१६११.

५६८. कामधेनुः । यतीशः.

KÂMADHENU, by YATÎS'A.

The *Dharma* and *Artha* sections of an encyclopædic work, composed by *Yatîs'a* under the patronage of *Vijayapâla*.

Beginning: ॐ श्रीगणेशाय नमः ॥

ॐ यत्सत्तामवलंब्य कापि परमा शक्तिर्नरीनृत्यते ब्रह्मोपेन्द्रमहेन्द्रशेषदिविषत्पुंरूपवेशैर्मुदा ॥
वाणीश्रीगिरिजादियोषिदुदया सर्गादिलीलारसैस्तद्ब्रह्माद्वयमाश्रये सुखनिधिं स्वात्मानमत्यद्भुतं ॥ १ ॥
शाब्दं ब्रह्म नमामि संततमहं ब्रह्माम्बरादुद्गतं संविद्वह्निविवृद्धिकारि मरुतं मोहान्धकारारुणम् ॥
नानापङ्ककलङ्कशोधनविधौ गाङ्गं जलं निर्मलं शास्त्राणामवनिं विनाशरहितं ब्रह्मादिवन्द्यं सदा ॥ २ ॥
वेदांतप्रतिपाद्यतत्त्वपदवी कालेन लीना भुवि श्रीकृष्णेन दयावता मतिमते भक्तार्जुनायाऽर्पिता ॥
लोकानां हितकाम्ययेंदुधवलं संतन्वतेन्दोर्यशो वंशस्याप्रतिमस्य वेगवशतो दिष्टस्य नष्टा पुनः ॥ ३ ॥
श्रीमच्छ्रीयतिराजवन्दितपदश्रीमद्यतीशाभिधस्वांशेन प्रतिपादिता विधुकुलाम्भोधीन्दवे सूरये ॥
श्रीराजामृतपालनामविलसद्भक्ताय युक्ताय सा बाह्यांतः प्रतिपक्षपक्षतिमिरादित्याय धीशालिने ॥ ४ ॥

Fol. 3: तस्यात्मजो **विजयपाल**नृपोतिकीर्तिर्धर्मार्थकामपरमार्थचतुःस्तनाढ्याम् ॥
वाक्यामृतैर्विरचितावयवां विमथ्य शास्त्रार्णवादुदहरत्किल **कामधेनुम्** ॥ ११ ॥

Fol. 35: श्रीमन्महा**विजयपाल**नृपार्जिताया धर्मार्थकामपरमार्थचतुःस्तनायाः ॥
शास्त्रोदधिप्रकटितातुल**कामधेनोर्धर्मस्तनः** सुकृतदुग्धधरः समाप्तः ॥ २८३ ॥

The MS. breaks off in the *Arthastana* after verse 206:

Fol. 62: शुचि भूषयते श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया ॥
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ २०६ ॥
केयूरा न विभूष···.

१६३१.

३६४१. काशीतत्त्वप्रकाशिका.

KÂS'ÎTATTVAPRAKÂS'IKÂ.

The title of this compilation is given indifferently in the colophons as *Kâs'îtattvaprakâsikâ* and *Kâs'îsâroddhâra*.

Beginning: श्रीगणेशाय नमः भवानीशंकराभ्यां नमः

नमः परमदेवाय संसाराभावहेतवे स्थितिसंरोधसर्गाणां कर्त्रे हर्त्रे प्रसारिणे
मंजुसिंजितमंजीरं वाममर्द्धं महेशितुः आश्रयामि जगन्मूलं यन्मूलं वचसामपि

काशीयात्राकृते मुक्तिः प्राणिनां निश्चिता समा पापिनामथ शुद्धानां जन्म काशीमृते मृते
प्रवृत्तिः प्राणिमात्रस्य दुःखहत्यै सुखाय च उभयेप्सितदा काशी तां सत्संगादिनाश्रयेत्

तत्रादौ सत्संगः कर्तव्यस्तेन दोषत्यागः सन्मतिरवाप्तिश्च तत्तु न संगातिरिक्तो दोषः यथोक्तं गीतायां.

Fol. 11: इति काशीतत्त्वप्रकाशिकायां प्रथमोल्लासः; fol. 59 इति काशीसारोद्धारे षोडशोल्लासः.

The MS. breaks off in the middle of a description of the several kinds of *Liṅgas*:

Fol. 107: तस्मादेकांतचित्तेन समाराधय शंकरं । अंबिकापतिमीशानं खंडचंद्रावतंसकं ।
त्रिनेत्रं शूलपाणिं तु भुक्तिमुक्तिप्रदं शिवं । अहं विष्णुश्च रुद्रश्च सर्वशक्तिसमन्विताः ।
मूर्तामूर्ता महेशस्य बाणलिंगे व्यवस्थिताः ।

नारदः ।

वद विश्वगुरो विश्वकृ बाणलिंगस्य लक्षणं । यत् ज्ञात्वा सकलां सिद्धिं प्राप्नुयाच्छिवपूजनात् ।

ब्रह्मा ।

ॐकारतीर्थाद्उद्भूतो रसराजमयः···.

१६४८.

४५९८. कृष्णभट्टी । कृष्णभट्टः.

KṚISHṆABHAṬṬĪ (?), by KṚISHṆABHAṬṬA.

Fol. 3: च रात्रौ चेद्दक्षिणामुखः ॥

मनुः ॥

छायायामंधकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ।
फालकृष्टे जले चित्यां वल्मीके गिरिमस्तके । देवालय नदीतीरे दर्भे पुष्पेषु शाद्वले ।
सेव्यछायासु वृक्षेषु – – गोष्ठांबुभस्मसु । अग्नौ च तिष्ठं गछं च विष्ठामूत्रं च नोत्सृजेत् ॥
वायव्यग्न्यर्कगोसोमेमेध्यांबुस्त्रीद्विजन्मनः । पश्य – – मुखश्चैतान् विष्ठामूत्रं च नोत्सृजेत् ॥

मनुः ॥

अरण्येनुदके रात्रौ चोरव्यालाकुले पथि । कृत्वा मूत्रपुरीषं च द्रव्यहस्तो न दुष्यति ।
क – दिनात्वपानस्थममेध्यनिर्मृजीवि च कंदमूलफलांगारैर्ना – – निर्मृजीत वै ॥

इति मूत्रपुरीषोत्सर्गविधिः ॥

Fol. 4: इति शौचविधिः ॥ इति पादशौचविधिः ॥ इति गंडूषविधिः ॥

Similar colophons elsewhere.

End: इति संध्याव्याख्यानं ॥ ॥ इति श्रीमहोपाध्यायकृष्णभटविरचितायां कृष्णभट्टी समाप्त ॥

इदं पुस्तकं हिरण्ये – ॥ शके १५०१। बहुधान्यसंवत्सरे उदगयने फाल्गुणशुद्धनवमी – भृगौ – रा – द्रानक्षत्रे मिथुनस्थिते चंद्रे मीनस्थिते रवौ तुलास्थिते – – गुरौ हेडलवाडाग्रामे नृसींहदे – इदं पुस्तकं संपूर्णं ॥ छ ॥ छ ॥

१६५४.

४४६९. **क्षेमप्रकाशः ।** क्षेमवर्मा.

KSHEMAPRAKÂS'A, by KSHEMAVARMAN.

Beginning: सिद्धिः ॥ गणेशाय नमः ॥ ॥ ॐ श्रीनारायणाय नमः ॥ ॥

ॐकारविघ्नेशगुरून्सरस्वतीं ब्रह्माणमीशं च हरिं गुहं च ।
प्रणम्य देवान्कुरुते निवध्यं **श्रीक्षेमवर्म्मा** जगतो हिताय ॥ १ ॥
लक्ष्मीकान्तं प्रकान्तं प्रणतभवहरं सर्व्वसंसारसारं त्रैलोक्यस्यैकनाथं सकलगुणमयं निर्गुणं चित्स्वरूपं ।
आराध्य **क्षेमवर्म्मा** मुनिगणविधिना तत्प्रसादात्करोति । ग्रंथं **क्षेमप्रकाशं** स भवतु भुवने धर्म्मशास्त्रप्रदीपः ॥ २ ॥
अमूलवाक्यानि विहाय सम्यक् सारोधृतिं **क्षेमकृती** विधत्ते ।
विष्णवर्च्चनं दानशिवार्चने च उत्सर्गधर्म्मव्रतनिर्ण्णयं च ॥ ३ ॥
गृह्णाति गोपी नवनीतमात्रं निर्म्मन्थनेऽसारमपास्य यद्वत् ।
वेदात्पुराणात्स्मृतितश्च तद्वत् **क्षेमो**त्र सिद्धांतविधिं विधत्ते ॥ ४ ॥
संगृह्य सर्व्वस्य मतं पुराणं सिद्धान्तवाक्यं मुनिभिः प्रणीतं ।
लोकोपकाराय कृतो निवंधः **क्षेमप्रकाशः** सुधियां मुदे स्यात् ॥ ५ ॥
मीमांसायुग्मभास्वत्कमलदिनकरास्तर्क्ककान्तारसिंहाः भाष्यक्षीराब्धिचन्द्रा विवदिषुकरिणां घोरकंठीरवा ये ।
साहित्ये सांख्यशास्त्रे पटुतरमतयः पीतपातंजलान्ये । सोढव्यो मेपराधो जितसुरगुरुभिः प्राज्ञयातैर्म्महद्भिः ॥ ६ ॥

Similar colophons elsewhere.

Fol. 2: इति **श्रीक्षेमप्रकाशे** आचारप्रशंसाविधिः ॥

End: इति **श्रीक्षेमप्रकाशे** शालग्रामविधिः समाप्तः ॥
क्षेमप्रकाशेन विचार्य ------------ पूजनम्
विमानया[नैः] सुरसंहसेवितैर्यदृच्छया विष्णुपुरं प्रयाति ॥ १ ॥
संवत्सरे वसुरसाशुग -------------- गुरुपुष्ययोगे ।
तद्वीरसिंहपुरपौरजनप्रशास्ता क्षेमोधिकारनिरतस्त्वकरोन्निवंधं ॥ ॥
--------------- पत्रछायासमेधितश्रीक्षेमवर्म्मविरचितः **क्षेमप्रकाशः** समाप्तः ॥ ॥
शुभमस्तु ॥ ॥ ---------------- ध्वजः । मंगलं पुंडरीकाक्षो मंगलायतनो हरिः ॥ १ ॥
मंगलं लेखकानां च पाठकानां च मंगलं । -------------- मंगलम् ॥ २ ॥ ॥

संवत् १५८२ समये पौषसुदि ११ चंद्रवासरे ॥ **विरसिंघपुरशुभस्थाने** ॥ --------- राजश्री **वीरसिंहदेवरा**-ज्ये तस्मिन्काले वर्त्तमाने ॥ पुस्तकमिदमलेखि । लिखितं **पंडितश्रीपूरनवास्तव्येन** ॥ ॥

-------- ष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ ॥

इत्थी पुत्थी षडि आपरहत्थ देइ ------- वाहुलयानठावठा विनठाम् ॥ ॥ रामचंद्राय नमः ॥ ॥ सरस्वत्यै नमः ॥ ॥ शिवमस्तु ॥ ॥

१७१४.

२४४७. **तिथिनिर्णयसारः** । मदनपालः.

TITHINIRṆAYASÂRA, attributed to Râja MADANAPÂLA.

The first fourteen verses are identical with those found at the beginning of the *Madanapârijâta* of *Vis'ves'vara* (comp. Oxf. 274 b). Then follows:

अस्यानुजः **श्रीमदनो**रुनाम्ना धाम्ना च रूपेण च संगतार्थः ॥
रोषारुणे चक्षुषि यद्विपक्ष्यो नितान्तकांत्तारसमाश्रितोभूत् ॥ १५ ॥
विश्राणनैरेककलाकलापं विविधानेन च भूरिशः प्रबंधान् ॥ ॥
मदनेन महीभृताथ येन प्रथिताथ येन पृथिता नूतन**भोजराज**कीर्त्ति ॥ १७ ॥
यः सूपालारा---तना सन्निबद्धाश्च कृत्वा स्वकीर्त्तिमहानदी द्विशन्मूर्त्तिभेदेन ॥ १८ ॥
एतस्मिन्नवन्नीतले कलियुगे येना---बृद्धिं प्राप्य समस्तलोकसहितैदानादिभिः कर्म्मभिः ॥
धर्म्मो विस्मृतवान्कृतादिविरहं भूमीभुजामग्रणीः ॥ स श्रीमान्म(?)**दन**स्तनोति प्रीत्यै सदा निर्णयं ॥ १९ ॥

End: इति **तिथिनिर्णयसारे** संक्रांतिनिर्णयसारे-----ग्रंथकथा----वेदार्कैगुणप्रकर्षहृदयेन सम्यक्कालं विनिर्णेतुमभिरसयश्चेत् (!) ॥

श्रीविश्वनाथसुधिया स्मृतितत्वमार्गे(?)पांथेन शास्त्रविलसन्मतिपट्येण ॥
अस्मिन्व्यधायि **तिथिनिर्णयसार**नाम्नि ग्रंथे कियानखिललोकहिते प्रयासः ॥ ॥

इति श्री**केदारमल्ला**दित्यादिविरुदावलीविराजमानश्री**मदनपाल**विरचितस्ति**थिनिर्णयसारः** स्मातः ॥ संवत् १७४६ वर्षे माघवद ७ रविवासरे **श्रीतिथिनिर्णयसार**ग्रंथ स्मातः ॥ **बभणोटी**ग्रांममध्ये ग्रंथ संपूर्णं । लीषनीयं लाला आत्मपठनार्थे वा पुत्रपौत्रपठनार्थे वा लिखितमिदं ॥ श्रीरस्तु ॥ ॥ शुभमस्तु ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ रस्तु ॥

१७२२.

३७४८. **त्रिस्थलीसेतुः** । काशीनाथः.

TRISTHALÎSETU, by KÂS'ÎNÂTHA.

Beginning: ॥ श्रीगणेशाय नमः ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॥ अथ **त्रिस्थलीसेतु**ग्रंथस्य प्रारंभमाह ॥ ॥

ॐ नमः ॥ ॥ अनाद्याखिलाद्याय मायिने गतमायिने ॥ अरूपाय सरूपाय **दक्षिणामूर्त्तये** नमः ॥ १ ॥
ध्यायन् ध्यायन् शिवम्ब्रह्म स्मारंस्मारं गुरोर्गिरः ॥ रच्यते **त्रिस्थलीसेतुः** शिष्यप्रेरितमेधया ॥ २ ॥

तत्रादौ **काशीप्रकरणं** ॥ ॥ **काश्य**पि **प्रयागा**दिसमा विशिष्टो वा इति विप्रतिपत्तिः ॥ **प्रयागे** वा भवेन् मोक्षो **महाकाले**-थवा प्रिये ॥ इत्यादि ॥ ॥ **अयोध्या मथुरा माया काशी कांची अवंतिका** ॥ पुरी **द्वारवती** चैत्र सप्तैता मोक्षदायका ॥ १ ॥ इत्यादिवचनबलात्समैवेति पूर्वपक्षः ॥ ॥ सिद्धांतस्तु ॥ ॥ सर्वतो विशिष्टैवेति ॥ ॥

End: श्रीदुर्गे जगदंबिकेति सहसा ध्यायंति ये मानवास्ते सर्वे न पतंति मोहसलिले स्यातिस्त्वियं वर्त्तते ॥
श्रुत्वैवं विविधा तवात्र महिमा श्रुत्यर्थसंसेविता नाना चागमतादिभिः प्रकथिता यातोस्म्यहं पाहि मां ॥ ॥

इति श्रीभट्टोनामजयरामभट्टसुतवाराणसीगर्भसंभवकाशीनाथविरचितं त्रिस्थलीसेत्वंतर्गतं काश्यादिसर्वतीर्थयात्राक्रमप्रकरणं समाप्तम् ॥ ॥ श्रीरस्तु ॥ ॥ ॥ संवत् १८६४ मिति चैत्रशुद्धत्रयोदश्यां १३ चंद्रे काश्यां नागेश्वरसन्निधौ लिखितं त्रिपाठी नाथुरामेण भट्टोपनामाय------पठनाय ॥ ॐ नमः ॥ ॥ श्लोकसंख्या पत्रे ४१ पत्र १६ ६५५.

१७२९.

२४६०. दत्तपुत्रतत्त्वविवेकः । वासुदेवभट्टः.

DATTAPUTRATATTVAVIVEKA, by VÂSUDEVA BHAṬṬA.

The MS. has lost the first two leaves and the conclusion. It begins:

Fol. 3: मंत्रहोमवर्जं प्रतिग्रहस्य चासंभवात् उभयोः समानधर्मत्वात् शूद्रस्य च पुत्रप्रतिग्रहानधिकारे क्षत्रियाणां क्षत्रजातौ गुरुगोत्रसमेपि वा वैश्यानां वैश्यजातौ च शूद्राणां शूद्रजातिषु इति शौनकवचनविरोध इति किं च स्त्रियः पुत्रप्रतिग्रहानधिकारे न स्त्री पुत्रं दद्यात्प्रति—गृह्णीयाद्वा अन्यत्रानुज्ञाना भर्तुरिति वशिष्ठेन स्त्रियोपि पुत्रप्रतिग्रहस्य दानस्य च भर्तुरनुज्ञया प्रतिपादनविरोध इति न लिंगं विवक्षितंमिति युक्तः स्त्रियोपि पुत्रदानप्रतिग्रहयोरधिकार इति.

Fol. 12: इति भट्टवासुदेवकृते द[पु]त्तपुत्रतत्वविवेके विधवायाः जीवनदशायां भर्त्रानुज्ञाताया स्वातंत्र्येन पुत्रदाननिराकरणं ॥

Fol. 43: यदापि द्यामुष्यायणका ये सुद्दत्तकक्रीतकादयः गोत्रद्वयप्यनुद्वाह शुंगशैषिरयोर्येति गोत्रद्वयसंबधिकन्यापरिणयनमिति प्रतिप्रतिभाति तदपि याज्ञवल्क्यादिवचनैकवावाक्यतारोधादपत्यं पुत्रपौत्रभृगोत्रमिति अनुशानात् गोत्रशब्दस्य पुत्रपौत्रप्रभृतिसंततौ मुख्यत्वात्सर्वे येषा च मुख्ये संप्रत्ययति जनकप्रतिगृहीसुतृख्यसंततावेव परिणयनप्रतिशोधकमिति दिक् ॥

१७४९.

२६७९. देशव्यवस्था.

DES'AVYAVASTHÂ.

A list of fifty-six countries with brief indication of their positions.

Beginning: ॐ श्रीगणेशाय नमः

ॐ देशव्यवस्था देवेशि कथ्यते शृणु यत्नतः वैद्यनाथं समारभ्य भुवनेशांतगं शिवे १
तावदंगाभिधो देशो यात्रायां न हि दुष्यति वज्राकारं समारभ्य ब्रह्मपुत्रांतगं प्रिये २
वंगदेशो मया प्रोक्तः सर्वसिद्धिप्रदायकः जगन्नाथात्पूर्वभागे कृष्णातीरांतगं शिवे ३
कलिंगदेशः स प्रोक्तो वाममार्गपरायणः कलिंगदेशमारभ्य पंचाष्टयोजनं शिवे ४
दक्षिणे स्यान्महेशानि कालिंगः परिकीर्तितः सुब्रह्मण्यं समारभ्य यावद्देवो जनार्दनः ५
तावत्केरलदेश स्यात्तन्मध्ये सिद्धकेरलं रामेश्वरो विकुंठेशो हंसकेरलवोधकः ६
अनंतसेनमारभ्य यावत्स्याद्गुद्रपः प्रिये तावत्सर्वे समानास्तु केरलाः परिकीर्त्तिताः ७
शारदामठमारभ्य कुंकुमाद्रितटांतकम् तावत्काश्मीरदेशः स्यात्पंचाशद्योजनावधिः ८

To **कुंकुमाद्रि॰** in verse 8 is written the interlinear gloss **कष्टवाड** (Kishtwâr of the maps). To *S'âradâmaṭha* (at *Shardi* in the Kishangangâ Valley) compare my notes in the Proceedings of the Philosophical–Historical Class of the Imperial Academy, Vienna, for December 1892.—Verse 8 is quoted "from Tantras" in V. S. Apte's "Practical Sanskrit–English Dictionary", *s. v. Kas'mîra.*

End: लाटदेशस्समाख्यातो **वर्वरं** श्रुणु पार्वती **मायापुरं** समारभ्य **सप्तश्रृंगा**त्तथोत्तरे ५४
वर्वराख्यो महादेशः **सैंधवं** श्रुणु सादरं **लंकाप्रदेश**मारभ्य **मक्कातः** (!).पश्चिमे स्थले ५६
सैंधवाख्यो महादेशः पर्वते तिष्ठति प्रिये एते षट्पंचाशद्देशाः मया प्रोक्ताद्य भक्तितः ५७
शुभम् **वासुदेवेन** लिखितं स्वार्थे परार्थे च संवत् १९०९ शाकः १७७४.

१७५९.

४३६९. नारदपञ्चरात्रम्.

NÂRADAPAÑCHARÂTRA.

The MS. contains on foll. 1-9 Adhyâyas xvii.—xix. of the *Charyâpâda,* on foll. 10-32 Adhy. xxiii.—xxxii. of the *Kriyâpâda,* and on the remaining foll. 34-40 again the first three Adhyâyas of the *Charyâpâda,* both Pâdas being described as belonging to the *Pâdmya Tantra* (or Padmasaṁhitâ) of the Vaishṇava Nâradapañcharâtra. The confusion in the arrangement of chapters is probably due to the last copyist.

Beginning: श्रीमते रामानुजाय नमः ब्रह्मोवाच
प्रतिमानां तथा धाम्नां जीणानां भगवन्नहं उद्धारं श्रोतुमिछामि तन्मे ब्रूहि यथातथं ॥ १ ॥
श्रीभगवानुवाच
स्वयंभुवार्षदिव्येषु मानुषेषु चतुर्ष्वपि अंगहानौ रत्नजेषु तत्तज्जांबूनदैः पुनः ॥ २ ॥
समासातव्यमेवांगं न त्याज्यं शैलजेष्वपि तद्वदेव समाधानं दारुजादिषु पंचसु ॥ ३ ॥
हीनांगानि तु विंवानि हित्वा तानि पुनः सृजेत् अंगमात्रसमाधाने सृष्टौ सर्वात्मनापि च ॥ ४ ॥

Fol. 2: इति **श्रीनारदपंचरात्रे** महोपनिषदि **पाद्मे** तंत्रे **चर्यापादे जीर्णोद्धारसंप्रोक्षणविधिर्नाम** सप्तदशोध्यायः १७

End: इति **श्रीनारदपंचरात्रे** महोपनिषदि **पाद्म्ये** तंत्रे **चर्यापादे नित्ययागविधिर्नाम** तृतीयोध्यायः ३ ॥
श्रीशुभसंवत् १९३५ वैशाखशुदि पंचम्यां वुधवासरे लिपितं यादशं पुस्तकं कल्यानमस्तुः रामाय नमः ॥

१७६४.

२४९२. निर्णयचिन्तामणिः । विष्णुशर्मा महायाज्ञिकः.

NIRṆAYACHINTÂMAṆI, by VISHṆUS'ARMAN MAHÂYÂJÑIKA.

The MS. contains the Chapter on the *Malamâsa.*

Beginning: ॥ श्रीगणेशाय नमः ॥ अथ **मलमासनिर्णयः** ॥ ॥ **मलमासश्व(स्व)रूप**माह हारीतः ।

इंद्राग्नी यत्र हूयेते मासादि स प्रवार्त्तितः । अमीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ ।
तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन । आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृत ।

यद्यपि चांद्रो मासो द्विविधो दर्शांत्तः पौर्णमासांताश्चेति । पौर्णमासांते श्रुतिः प्रमाणं ।

End: इति श्रीमद्वैश्यकुलावतंसगोभिलगोत्रसहारणवंशप्रदीपविदुरसुपुत्रश्रीरायजालभदासप्रयुक्तस्वराट्सम्राडग्निरधयतिमहायाज्ञिकश्रीविष्णुशर्मकृतौ निर्णयचिंतामणौ मलमासनिर्णयः ॥ ॥

श्रीसाम्वाय नमः ॥ ॥

१८११.

२४५४. पराशरस्मृतिव्याख्यानं माधवीसारोद्धारः । रामकृष्णदीक्षितः.

MÂDHAVÎSÂRODDHÂRA, an abstract from MÂDHAVÂCHÂRYA's commentary on the PARÂS'ARASMṚITI, by RÂMAKṚISHṆA DÎKSHITA.

Beginning: श्रीढुंढिराजाय नमः ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

अंतर्लीनं शमयति तमस्तोममंतः स्मृतं सत् सद्यस्तापत्रितयमपि यत्सेवितं वीक्षितं तु ॥
नान्यत् किंचित्प्रकटयति तद्विघ्नविध्वंसनाय ज्योतिर्नीलं किमपि परमं रामनाम स्मरामि ॥ १ ॥
श्रीलक्ष्मणेन्दुर्जयति क्षितींदुर्दानेन संतर्पितसर्वविंदुः ॥
वीर्याब्धुविंबं रविरस्ति यस्य यशोब्धुविंबं वियतींदुबिंबं ॥ ॥ २ ॥
कलौ युगे तेन किलैकपादो म्लेछैः पृथिव्या परिपीडितः सन् ॥
धर्मोंद्रिमूर्द्धन्यधिवासितोस्ति करावलंबं ददता दयातः ॥ ३ ॥
शास्त्रं प्रणीतं करुणाकरेण पराशरेणांत्ययुगोचितस्य ॥
धर्मस्य बोधाय धराधिपेण संरक्षितस्याद्रिशिरस्यनेन ॥ ४ ॥
श्रीमाधवाचार्यबुधेन बुध्वा व्याख्यातमेतद्बहुविस्तरेण ॥
तदेव संक्षिप्य मया समस्तं व्याख्यायते तस्य मुदे नृपस्य ॥ ५ ॥

व्यासशिष्यः कश्चित्प्रश्नोत्तररूपधर्मशास्त्रविषयके श्लोकैः प्रारिप्सिते ग्रंथे श्रोतृबुद्धिसमाधानाय संबंधाधिकारिविषयप्रयोजनरूपमनुबंधचतुष्टयमादौ श्लोकद्वयेन निबध्नाति ॥

अथातो हिमशैलाग्रे देवदारुवनालये ॥ व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥ १ ॥

End: श्रीमाधवागाधनिबंधसिंधोर्मयोद्धृतं साधु न साधु वा यत् ।
यद्या — — वद्विबुधैर्भवेत्तत्साध्वेव सांकोपि विधुर्हि साधुः ॥ १ ॥
श्रीमाननेन मम वाङ्मयसेवनेन स्वामी कुलस्य सकृदेतु मुदं स देवः ।
यस्मिन्प्रसादसुमुखेऽभिमुखीभवंति कर्माणि साधुफलजन्मन एव सद्यः ॥ २ ॥
अस्यां वाङ्मयपूजायां दोषोऽज्ञानकृतो भवेत् । स सद्यो विलयं यायाद्रामपादसमर्पणात् ॥ ३ ॥ ६५ ॥

इति श्रीमहाराजाधिराजश्रीलक्ष्मणचंद्रदेवमुदे तदेकाश्रितपंडितनारायणभट्टसुतरामकृष्णदीक्षितकृते माधवीसारोद्धारे पराशरस्मृतिशास्त्रव्याख्याने प्रायश्चित्तकांडे द्वादशोध्यायः समाप्तः ॥

समाप्तं च **प्रायश्चित्तकांडं** । समाप्तश्च **माधवीसाराख्यो** ग्रंथः ॥ ७ ॥ श्रीमद्विश्वेश्वराय नमः ॥ श्री । सीतारामचंद्राभ्यां नमः ॥ ७ ॥ शिवमस्तु ॥ ७ ॥

१८२०.

६९६. पितृभक्तितरङ्गिणी । वाचस्पतिमिश्रः.

PITṚIBHAKTITARAṂGIṆÎ, by VÂCHASPATIMIS'RA.

Beginning: ॥ श्रीकृष्णाय नमः ॥ ॥

प्रणम्य वासुदेवाय तन्यते स्वर्गरंगिणी ॥ **श्रीवाचस्पतिधीरेण पितृभक्तितरंगिणी** ।

वराहपुराणे

कंठस्थानगतो जीवो भीतो विभ्रांतमानसः ॥ ज्ञात्वा तु विकलं तत्र शीघ्रं निःसार्यते गृहात् ॥

कुशास्तरणशायी स दिशः सर्वास्तु पश्यति

मूमूर्षविसंज्ञो भगवन् गृहाद्बहिः कृत्य शुचौ देशे अनावृते आस्तृतदर्भे शायितव्यः अथ वैद्यपरिछिन्नः गंगाप्रवाहे आनाभि जलयोगं कारयितव्यः ततः पुरुषसूक्तयादिकमुच्चैः श्रावयितव्यस्तावद्यावत्प्राणांस्त्यजति ततो वाससाछाद्य दंडद्वयं स्थापयितव्यः **ततश्छंदोगपरिशिष्टं**

घृतेनाभ्यक्तमाप्लाव्य शुद्धवस्त्रोपवीतिनं चन्दनोक्षितसर्वांगं सुमनोभिर्विभूषयेत् ॥

End: श्रुतीः स्मृतीरर्थगतीश्च तासां गुरूपदेशादवधार्य सम्यक्

श्रीश्राद्धकल्पाख्यमिमं निबंधं **वाचस्पति**र्विश्वजनीनमूचे

समस्तेत्यादिमहाराजाधिराजश्री**हरिनारायन**नात्मजसमस्तेत्यादिमहाराजाधिराज**श्रीरुपनारायण**पदवीसमलंकृत**मिथिलामंडला-खंडश्रीमदामभद्रदेव**चरणादिष्टेन तत्परिषदा **श्रीवाचस्पति**शर्मुणा विरचितोयं **श्राद्धकल्पः** परिपूर्ण इति

पदवाक्यमाननिपुणाः करतलकुवलायमानविश्वदृशः अवलोकयत् कृतिमां करुणा वरुणा वरुणालयेन हृदयेन

शास्त्रे दश स्मृतौ त्रिंशन्निबंधा येन यौवने निर्मितास्तेन चरम वेयस्येष विनिर्मम

ॐ नमो भगवते वासुदेवाय शुभमस्तु ॥ संवत् १९२९ मीतिमार्गश्वरशुध ५ गुरुवासरे इठल **सीतारामभारद्वाज** ॥ लेखक ॥ ॥

१८३८.

२५४२. प्रायश्चित्तप्रकरणम्.

PRÂYAS'CHITTAPRAKARAṆA.

This appears to be the chapter on *Prâyas'chittas* of some work not yet identified.

Beginning: श्रीगणेशाय नमः ॥ अथ **प्रायश्चित्तप्रकरणं** ॥ प्रायश्चित्तशब्दश्च पापनिवर्त्तनक्षमधर्म्मविशेषे योगरूढः ॥ प्रायस्य पापस्य चित्तं शोधनमिति व्युत्पत्तेः । प्रायस्य चित्तिचित्तयोरिति **पारस्करादिगणे** पाठात् सुट् । उक्तं च ॥

प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनमिति ॥ मूले ॥

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपोनिश्चयसंयोगात् प्रायश्चित्तं प्रकीर्त्तितमिति ॥ पापं चाऽष्टधा । महापातकं । अनुपातकं । उपपातकं । जातिभ्रंशकरं । संकरीकरणं । अपात्रीकरणं । मलिनीकरणं । प्रकीर्णकं चेति ॥ तत्र महापातकान्याहुर्मूले ॥

ब्रह्महत्या सुरापानं स्तेयं गुर्व्वंगनागमः ॥ महांति पातकान्याहुस्तत्संसर्गश्च पंचम इति ॥

End: यद्यपि व्यभिचारिण्याः स्त्रिया वधेऽल्पं प्रायश्चित्तं तथापि तत्परिग्रहवाचनिकोयं निषेधः ॥ नास्ति वचनस्यातिभार इतिन्यायादित्याहुः ।

द्विजस्याब्धौ तु निर्यातुः शोधितस्यापि संग्रहः । असवर्णागनादुष्टैः संसर्गः शोधितैरपीति आदि कलिनिषिद्धमध्ये प्रागेवोक्तं ॥ ॥ इति प्रायश्चित्तप्रकरणं ॥ श्रीराम जय राम ॥

१८४४.

६५९. प्रायश्चित्तशतद्वयीव्याख्यानम् । वेङ्कटेशवाजपेययाजी.

PRÂYAS'CHITTAS'ATADVAYÎVYÂKHYÂNA, by VEÑKAṬES'A VÂJAPEYAYÂJIN.

Beginning: श्रीगणेशाय नमः ॥

आपस्तंबमुनिं नत्वा प्रायश्चित्तशतद्वयीं ॥ मंदानां सुखबोधाय व्याकरिष्ये यथामति ॥

तत्र तावत्प्रारिप्सितस्य ग्रन्थस्य विषयप्रयोजनादिकं दर्शयति

केषु श्रुतिलक्षणेषु सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यवृत्त्यादनुसृत्य सम्यक् सुखावबोधाय विविच्यते तत् ॥ १ ॥

हविर्यज्ञप्रायश्चित्तेषु मंदबुद्धीनां सूत्रे यदस्पष्टमिव प्रतीयते ॥ तदेव प्रायश्चित्तं तेषां स्पष्टावबोधार्थं स्वरूपतो विषयतश्च विविच्य प्रदर्शते ॥

End: इति श्रीवत्सकुलभूषणश्रीवेंकटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने तुरीयं प्रकरणं समाप्तं ॥

विंदुदुर्लिपिविसर्गबाधारणपंक्तिभेदपदभेदभूषणं ।
हस्तवेगजमबुद्धिपूर्वकं क्षंतुमर्हति समीक्ष्य सज्जनः ।

हरिः ॐ । संवत ॥ १६४१ समयवदि अगहण लीषी द्वारिकादास । श्रीरस्तुम वासुदेवान्मः ॥

१८४५.

२४६१. प्रायश्चित्तोद्धारः । दिवाकरः.

PRÂYAS'CHITTODDHÂRA, by DIVÂKARA.

Beginning: ॥ श्रीगणेशाय नमः ॥ अथ स्मार्त्तप्रायश्चित्तानि तन्यते ॥ तत्रादौ आवश्यकविशेषो नित्यप्रायश्चित्तानि वक्ष्यंते । तत्रादौ शौचमाह ॥ मनुः ॥

शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः शौचाचारविहीनस्य समस्ता निष्फलाः क्रिया इति ॥ तदेतद्विविधं ॥ स्मृत्यर्थसारे ॥

शौचं च द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भूत(भाव v.l.)शुद्धिस्तथापरं । तद्वदंतःशुद्धिं च कुर्यात् । इति **याज्ञवल्क्यः** ।

End: इति श्रीमत्कालोपनामक**भट्टरामेश्वरा**त्मजभट्टमहादेवद्विजवर्यसूनु**दिवाकर**विरचितप्रायश्चित्तो**द्धारे** संक्षिप्तप्रयोगरूपेण नित्यनैमित्तिकप्रायश्चित्ताकारिकाद्युक्तानि निरूपितानि ॥ ॥ संवत् १८३१ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

१८८०.

२१२१. क. मठाम्नायादिविचारः । [शंकराचार्यः].

MAṬHÂMNÂYÂDIVICHÂRA, ascribed to S'AṀKARÂCHÂRYA.

Beginning: प्रथमः पश्चिमाम्नायः **शारदामठः** कीटचारी संप्रदायः तीर्थाश्रमपदं द्वारिकाक्षेत्रं सिद्धेश्वरो देवता भद्रकाली देवी ब्रह्मस्वरूपाचार्यः गंगा गोमती तीर्थम् स्वरूपब्रह्मचारी सामवेदप्रपठनं तत्वमस्यादिवाक्यविचारः नित्यानित्यविवेकेनात्मोपास्तिः आत्मा तीर्थं आत्मोद्धारार्थमपरोक्षसाक्षात्कारार्थं संन्यासग्रहणं करिष्ये ॐ नमो नारायणायेति ॥ द्वितीयः सर्वाम्नायः **भोगवर्द्धनमठः**.

End: सप्तमो **जंबूद्वीपः** सम्यग्ज्ञनम् शिलासूत्रे वेद्यवेदकः अर्द्धमात्रा पवित्रं श्रद्धानदी विमलतीर्थम् आत्मलिंगं शांतिर्गतिः अहमेवाहं जुहोमि स्वाहेत्यादिवाक्यविचारः नित्योहं निरंजनोहं शुद्धोहमित्यादिरात्माऽऽत्मोपास्तिः आत्मा तीर्थम् आत्मोद्धारार्थं जगत्स्फूर्त्तिसंन्यासग्रहणं करिष्ये ॐ कुरु ॐ नमो नारायणायेति इति **मठाम्नायादिविचारः शंकराचार्य**कृतः ॥ ॥

१८८७.

२४४८. मध्ववाक्यार्थविवृतिः । आर्यान्नृहरिः.

MADHVAVÂKYÂRTHAVIVṚITI, by ÂRYÂNṚIHARI.

The author of the verses expounded here is apparently *Madhva, i. e., Ânandatîrtha*; comp. Catalogus Catalogorum *s. v.*

Beginning: श्रीनिवासो जयति ॥ श्रीवेदव्यासाय नमः ॥ श्रीगुरुभ्यो नमः ॥ ॥

ध्यायन् श्रीशं मूलगुरुमादिं च परमं गुरुं ॥ देवतां वासुदेवं च व्याकुर्वे **मध्ववाक्ततिं** ॥ १ ॥

इह सज्जनवर्गमुद्दिधीर्षुः कृपया वेद**भारता**दिशास्त्राणां मुख्यतात्पर्यस्य प्रतिपादकग्रंथान् विधाय सदाचारं स्मृत्युक्तं संक्षेपेण विजिज्ञापयिषुस्तस्येति कर्तव्यतां सूचयन् अधिकार्यादिकं च ध्वनयन्नाचार्यः शिष्यशिक्षार्थं स्वेष्टदेवतास्तुतिरूपं मंगलं कृत्वा ग्रंथादौ निबध्नाति ॥

यस्मिन्सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो याति परं जयति सोच्युतः ॥ १ ॥

End: **आर्यान्नृहरिणा मध्ववाक्यार्थविवृतिः** कृता ॥ प्रीयतां भगवांस्तेन **मध्वाचार्य**गतो हरिः ॥ ॥ ७ ॥

स्वस्ति श्रीनृपशालिवाहनशके १७५९ वर्षे पिंगलनामसंवत्सरे तद्दिनी समाप्तं ॥ इदं पुस्तकं **वरखेडकर** इत्युपनामक**नृसिंहाचार्यस्ये**दं ॥ श्रीरस्तु । शुभं भवतु ॥ पूर्वनिबंधमथितमन्वादिमतं तदेतत् सर्वं मनसि कृत्वाह ॥

प्रायश्चित्तं गुरूक्तं गुरुणि लघु लघून्येनसि स्मार्त्तमेतत् पौराणं त्वेनसश्चेद्‌गुतपति तदा सर्वपापक्षयार्थं ॥

कुर्याच्छ्रीमन्मुरारे स्मरणमनुदिनं तद्व्रतं वा विदध्यादेकादश्यादिषूक्तं तिथिषु परमिदं मंगलं सर्वगुह्यं ॥
स्मृत्यंतरे ॥
एकादशेंद्रियै पापं यत्कृतं भवति प्रभो ॥ येकादश्युपवासेन तत्सर्वं प्रविलीयते ॥
पातकेषु यदल्पेषु महत्स तु विशेषतः ॥ विद्वेषी विष्णुपादांभ कस्तं मूर्ध्नि न धारयेदिति ॥
॥ श्रीः ॥

१८९३.

२५४०. मनुस्मृतिटीका सुखबोधिनी । दीक्षितमणिरामः.

SUKHABODHINÎ, a commentary on the MANUSMṚITI, by DÎKSHITA MAṆIRÂMA.

The MS. has lost foll. 1-38 and 162-165. It begins:

Fol. 39: गृहीतवेदा इत्यर्थः । प्रवचनेषु वेदांगेषु च ॥ १८४ ॥ त्रिणाचिकेतः॰ अयजुर्वेदभागः तद्व्रतं च॰ तदधीते॰ तत्करोति च यः स पुरुषोपि त्रिणाचिकेतः । एवं त्रिसुपर्णोपि त्रिसुपर्णः ऋग्वेदैकभागः॰ तद्व्रतं च । षडंगवित्॰ तदर्थव्याख्याता । ब्रह्मदेयात्मसंतानः॰ ब्राह्मोढापुत्रः । ज्येष्ठसामगः । ज्येष्ठसामानि आरण्यके गीयंते॰ तेषां गाता ॥ १८५ ॥

Fol. 44: इति श्रीमिश्रगंगारामात्मजदीक्षितमणिरामकृतायां सुखबोधिन्यां मनुटीकायां तृतीयोध्यायः ॥ ७ ॥

The MS. breaks off in the comments on xii. 17:

Fol. 175: तौ॰ महत्परमात्मानौ । अतंद्रितौ॰ अनलसौ । तस्य॰ जीवस्य । धर्मं पापं च सह पश्यतः । याभ्यां॰ धर्मपापाभ्यां संपृक्तः॰ युक्तः जीवः॰ प्रेत्येह च सुखाऽसुखं प्राप्नोति ॥ १९ ॥ तैरेव भूतैः॰ पृथिव्यादिभूतैः स्थूलशरीरतया·····.

१९२७.

२६८७. मिताक्षराविवृतिः । पायगुण्डोपाख्यवैद्यनाथपत्नी लक्ष्मीदेवी.

COMMENTARY on the Âchâra section of VIJÑÂNES'VARA'S MITÂKSHARÂ, by LAKSHMÎDEVÎ, wife of VAIDYANÂTHA PÂYAGUṆDE.

Beginning: श्रीगणेशाय नमः ।
श्रीलक्ष्मीरमणं नत्वा लक्ष्मीर्लक्ष्मीं शिशुप्रसूः । खेरडामुद्गलापत्यगणेशापत्यकृष्णकः । १ ।
महादेवः सुतस्तस्य वेदमूर्तिर्जटांतवित् ॥ श्रौतस्मार्त्तार्थनिपुणो दीक्षितो राजपूजितः ॥ २ ॥
पत्नी यस्य ह्युमारूपा साध्युमा तस्य कन्यका ॥ पायगुंडोपाख्यवैद्यनाथपत्नी पतिव्रता ॥
मिताक्षराया विवृतिं तनुते सर्वसंविदे । ३ ।

Fol. 15: *iti s'ivaproktâ shashṭikâpûjâ*; fol. 23 *iti krântajâtakarmâdikarmaṇâm prayogaḥ*; fol. 48 *iti pâpapurushanirasanam.*

The MS. breaks off with:

Fol. 63: धीप्रेरकत्वेभ[न] शक्तिमयत्वं तदित्यनेन परमार्थदशायामभेद एव सूचितः अप्रतिहतप्रेरणया तत्सत्व सूचितं प्रकाशकस्येत्यनेन सूर्यादिप्रकाशोपि मत इति सू[चि]तं क्रीडमानेस्येत्यनेन प्रपंचो यस्य लीलामात्रं न तु तत्र सकलप्रवृत्तिरिति सूचितं मोदमानस्येत्यनेन सच्चिदानंदरूपत्वं सूचितं धीमहीत्यनेन……

१९८२.

२०३८. वार्तिकसारः । यतीशः.

VÂRTIKASÂRA, by YATÎS'A.

Composed under the patronage of Râja *Vijayapâla* Saṁvat 1841 (comp. above extracts from the same author's *Kâmadhenu*, No. 1611).

Beginning: ॐ नमो भगवत्यै ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ ॐ नमो नारायणाय ।
ॐ गायत्री सर्वमंत्राणां शिरोमणितया स्थिता विद्यानामपि तेनैतां साधयेत्सर्वसिद्धये
त्रिव्याहृतियुतां देवीमोङ्कारयुगसम्पुटाम् उपास्य चतुरो वर्गान्साधयेद्यो न सोन्धधीः
देव्या द्विजत्वमासाद्य श्रेयसेन्यरतास्तु ये ते रत्नमभिवाञ्छन्ति हित्वा चिन्तामणिं करात्.

End: ग्रंथे **वार्त्तिकसारे**स्मिञ्श्रुतिस्मृत्याश्रयं विना पदं नैकमपि प्रोक्तमिति सम्यगवेक्ष्यताम्
गुणैः ख्याता लोके **लवपुरगताः** शिष्यनिवहैः करैः शुभ्रं कृत्वा जगदपि तथा **कह्लणकुलम्**
गतेषु **श्रीटेकाग्रगसमाख्येष्वजपदं यतीशस्तत्सूनुर्विधुयुगवसुक्ष्माब्दमिलिते** १
दिने दीपावल्या अकृत सकलं **वार्त्तिकमयं** शुभं **सारं** बालार्थकृतनिखिलस्वांगवितितिम्
जगद्गीतस्योद्यन्निखिलगुणवेलाधरपतेर्मृतस्यायं **काश्यां स्फुटममृतपालस्य** नृपतेः २
सुतः श्लाघ्यो भूपेष्विह **विजयपालः** पठतु तं तथा सर्वे लोका इति निजरुचिः प्रार्थयति च
यदल्पप्रज्ञोयं विकृतमकृताशेषमनघा विशोध्यं विद्वांसस्तदिह कृपया नापवदत ३ ॥
इति **श्रीमट्टेकचन्द्रमिश्रात्मजयतीरितः** भूयाद्वार्त्तिकसारोयं जगदानन्दहेतवे १ ॥

१९८९.

४५६. वीररत्नशेखरशिखा । साहिब्रामः.

VÎRARATNAS'EKHARAS'IKHÂ, by SÂHIBRÂMA.

This translation of the *Akhlâq-i Mohsinî* was prepared by Paṇḍit Sâhibrâm, father of Paṇḍit Dâmodar, under the orders of His late Highness Mahârâja Ranbîr Singh, together with a commentary called *Padasaṁketa*. No. 1991-92 contain the text and commentary of the whole work in 40 Ratnas.

Beginning: ॐ स्वस्ति श्रीगणेशाय नमः ॥
ॐ जयति जगति सैकः सर्वकारी स्वतन्त्रः परमविमलबोधः स्वप्रकाशस्वरूपः
अकलितमहिमा यः सर्वमिच्छाविलासं प्रभुपशुजडरूपं स्वात्ममात्रं विधत्ते ॥

य एष परमाद्भुतः प्रभुरशेषहृद्बोधकः परं जगति राजते स्वतनुभिश्च रामादिभिः
अनुग्रहलवास्पदं वयमपीह धूतामया भवाम इह यस्य तं प्रभुमनन्तमीडे हरिम् ॥
जीयाच्च तस्यामलभावगम्या सर्वार्थसंदर्शनबद्धकक्ष्या
सदक्षरैकप्रवणार्थदात्री वाक्छोधनी सा च क्रिया सुशीला ॥

End: इत्येवमुक्तं **विनया**भिधानं रत्नं सुमृष्टं भुवि भूषणं यत्
यदादृताः कीर्त्तिमिहाधिगम्य स्थानं परं यान्ति परत्र शुद्धाः ॥
इति **श्रीरत्नशेखरशिखायां** विनयरत्नं दशमम् समाप्तोयं प्रथमः खण्डः ॥

२००६.

४१३५. **व्यवहारसर्वस्वम्** । आहिताग्निदीक्षितसर्वेश्वरः.

VYAVAHÂRASARVASVA, by ÂHITÂGNIDÎKSHITA SARVES'VARA.

A recent copy from a MS. in the Library of His Highness the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥
यो वावहीति पंथानं निर्भयं लोकवेदयोः ॥ शब्दः स किंकरो यस्यास्तां नमामी सरस्वतीं ॥
हरनपि धनं राजा प्रजानां यत्प्रसादतः ॥ साधुवादमवाप्नोति तं धर्मं व्याहरामहे ॥

प्रथमं राज्ञोत्साहवता प्रियंवदेन वहुप्रदेन शूरेण सत्यवादिना ॥ द्यूतमृगयादिवास्वप्ननिंदास्त्रीसेवनमद्यपानगीतवाद्यनृत्यवृथाभ्रमणदुर्जनत्वं ॥ साहसहिंसेर्ष्यासूयावृथाव्ययवाग्दंडपारुष्यरूपाऽष्टादशव्यसनाऽनासक्तेन ॥ हिताहितविवेकुशलान् शुचीन् परंपरायातान्संप्राप्तौ मंत्रिणः कृत्वा ॥ सह कार्यं विचार्यानंतरं स्वयं विचार्य ॥ प्रत्यहं व्यवहारांश्च धर्म्मशास्त्रानुसारेण ब्राह्मणैः सह स्वयं पश्येत् ॥

End: इति **श्रीविशालनागर**ज्ञातीयभूधृत्यवंशोत्पन्न**आहिताग्निदीक्षितभूतेश्वर** तस्यात्मज**आहिताग्निदीक्षितविश्वेश्वर** तस्यात्मज**आहिताग्निदीक्षितसर्वेश्वर**विरचिते व्यरचिते **व्यवहारसर्वस्वे** द्वितियोध्यायः समाप्तं संवत् १९४१ का जेष्टकृष्णा ५ गुरुवे *.

२०२१.

२६१८. **शुक्रनीतिसारः.**

S'UKRANÎTISÂRA.

The MS. apparently contains the i. *Prakaraṇa* of the work described L. 1828.

Beginning: श्रीगणेशाय नमः अथ **शुक्रनीति**प्रारंभः
प्रणम्य जगदाधारं सर्गस्थित्यंतकारिणं संपूज्य भार्गवः पृष्टो वंदितः पूजितः स्तुतः १
पूर्वदेवैर्यथान्यायं **नीति**सारमुवाच तान्

भार्गव उवाच
शतलक्षश्लोकमितं नीतिशास्त्रमथोक्तवान् २

स्वयंभूर्भगवाँल्लोकहितार्थं संग्रहेण वै तत्सारं तु वसिष्ठाद्यैरस्माभिर्वृद्धिहेतवे ३
अल्पायुर्भूभृदाद्यर्थं संक्षिप्तं तर्कविस्तृतं क्रियैकदेशबोधीनि शास्त्राण्यन्यानि संति हि ४
सर्वोपजीवकं लोकस्थितिकृन्नीतिशास्त्रकं धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं यतः ५
अतः सदा नीतिशास्त्रमभ्यसेद्यत्नतो नृपः यद्विज्ञानान्नृपाद्याश्च शत्रुजिल्लोकरंजकाः ६.

Fol. 19: इति राजप्रकरणाध्यायः १

End: संहरेद्धनिकात्सर्वं मिथ्याचारात् धनं नृपः यदा चतुर्गुणा वृद्धिर्गृहीता धनिकेन च ९३
अधमर्णान्न दातव्यं धनिने तु धनं तदा ९४

इति **शुक्रनीतिसारे** खिले प्रथमप्रकरण समाप्तम् ॥ १ ॥ शुभमस्तु श्रीरस्तु ग्रंथसंख्या ॥ २५५० ॥

After this colophon follow some detached verses containing prescriptions for the preparation of betel, rules of polity, &c.

२०२९.

४५६६. श्राद्धकल्पसारविवृतिः । भट्टशंकरः.

S'RÂDDHAKALPASÂRAVIVṚITI, by BHAṬṬA S'AṀKARA.

Beginning: ॥ श्रीगणेशाय नमः ॥

सर्वधर्मप्रवक्तारं विबुधानंददायिनं । बृहतामुपदेष्टारं नौमि **नारायणं** गुरुं ॥ १ ॥
इह भावावबोधोन्यग्रंथेन्यस्यातियत्नतः । **विवृतिं** स्वनिबंधेतस्तनुते **भट्टशंकरः** ॥ २ ॥

वह्वनेहोनिर्वाह्ये महति निबंधे प्रविततरविघ्नसंभावनया भूयांसि मंगलान्यारिरचयिषुर्विघ्नेशं तावत्स्तौति ।

द्युतियुतं मणिभिः फणिभिर्वृतं शिवसुतं वरदं द्विरदं नुमः ।
धृतसुधाकरमुन्मुखपुष्करं विहतविभ्रमविघ्नसमाप्तये ॥ १ ॥

Fol. 5: इति **श्रीभट्टनारायणसुतभट्टशंकरकृतश्राद्धकल्पसारविवृतौ** श्राद्धविधिफलप्रशंसाप्रकरणं ॥

A similar colophon fol. 89 at the conclusion of the *Dravyanirûpaṇaprakaraṇa.*

The MS. breaks off with:

Fol. 101: भ्राजमानः स हि स्वर्गे विमास्थितः । रमते भुवने दिव्ये रत्नालोकसमाकुले
अभ्यर्च्य यः पितृणां वै कुर्यादारात्रिकं बुधः स हि नीराज्यते नाके दिव्यैरप्सरसां गणैः ।
धात्वादिनिर्मितां रम्यां दापिकां श्राद्धकर्मणि । पितृनुद्दिश्य यो दद्यात्स भवेद्भाजनं श्रियः ।
यो धूपदहनं·······.

२०३२.

४५६७. श्राद्धपद्धतिः । हेमाद्रिः.

S'RÂDDHAPADDHATI, by HEMÂDRI.

Beginning: ५ ॐ नमः श्रीगणेशाय ॥ ॐ नमो श्रीगुरुभ्यो नमः ॥

यत्पादपंकेरुहपांसुपूते दत्तैर्गयामूर्द्धनि सक्तुपिंडैः ॥
मुक्तिं महापातकिनो लभंते गदाधरं तं शरणं प्रपद्ये ॥ १ ॥
प्रणेता शास्त्राणां सपदि सुहृदामुन्नमयिता । क्रतूनामाहर्त्ता समरभुवि जेता क्षितिभृतां ॥
विनेता साधूनांमभिलषितदाता गुणवतां ॥ मनीषी **हेमाद्रिर्जयति** जगतीभूषणमणिः ॥ २ ॥
ऋणत्रयापाकरणातिरिक्तैर्मुदां निदानैरपि यस्य दानैः ।
देवादयः प्रत्युत धारयंति चिंतामनंतामधमर्णतायाः ॥ ३ ॥
सृजतः सततं दिगंगनानां श्रवणाभोगविभूषणं यशः ।
चरितं कथमस्य कथ्यते जगति जंगमकल्पशाखिनः ॥ ४ ॥
निश्चित्य पित्र्याण्यखिलस्मृतिभ्यः कृत्यानि **कात्यायन**सम्मतानि ।
निबध्यते श्राद्धविधिः क्रमेण **हेमाद्रिणा** श्रीकरणाधिपेन ॥ ५ ॥
यश्चकार **चतुर्वर्गचिंतामणि**मनल्पधीः । **हेमाद्रिसूरिणा** तेन क्रियते **श्राद्धपद्धति** ॥ ६ ॥

The MS. breaks off with:

Fol. 24: अथ श्राद्धार्हद्रव्याणि । कृष्णस्तिला मखे मुमुद्रा अकृष्ण निष्पावा व्रीहियवनीवारप्रियंगुगोधूमश्यामाकसर्षपाश्चेति.

२०४८.

४५१७. संस्काररत्नावली । नृसिंहभट्टः.

SAMSKÂRARATNÂVALÎ, by NRISIMHA BHAṬṬA.

Beginning: श्रीगणेशाय नमः । अथावसथ्याधाने पूर्वोक्ताधानकालस्य दैववशादतिक्रमे प्रायश्चित्त कुर्यात् ।
तत्र **कात्यायनः**

कृतदारो गृहं ज्येष्ठो यो नादध्यादुपासनं । चांद्रायणं चरेद्वर्षे प्रतिमासमहोपि वा ।

तथा

काले त्वाधाय कर्माणि कुर्याद्विप्रो ह्यनापदि । तदकुर्वंस्त्रिरात्रेण मासि मासि विशुध्यति ।

Fol. 10: इति **श्रीमद्गोविंदचरणद्वंद्वकमलमधुव्रतकाणवशाखिप्रतिष्टानपुरवासिसिद्धभट्टात्मजश्रीनृसिंहभट्टविरचितायां संस्काररत्नावल्यां** आवसत्थ्याधानप्रयोगः समाप्तः ॥

End: इति प्रवासविधिः ।

श्रीकृष्णचरणद्वंद्वमादाय हृदयांबुजे । **सिद्धभट्टतनूजेन काशीपुनिवासिनां**
रचितः **श्रीनृसिंहेन प्रवासविधिनिर्णयः** ॥ ग्रंथः १५००.

२०५३.

२६५१. सदाचाररहस्यम् । अनन्तभट्टः.

SADÂCHÂRARAHASYA, by ANANTABHAṬṬA.

Composed under the patronage of Râja *Samgrâmasimha.*

Beginning: ॥ श्रीगणपतिर्जयति ॥ श्रीमद्गुरुभ्यो नमः ॥ श्रीमातापितृभ्यां नमः ॥

ब्रह्मादयः सुरगणा यन्नत्या हृतविघ्नका कार्यसिद्धिं परामापुस्तन्नमामि गजाननं ।
समस्तजगदाधारं पार्वतीप्राणवल्लभं **त्रिकूटाचल**मध्यस्थमेकलिंगं नमाम्यहं ॥
सूर्यवंशोद्भवः श्रीमा**ञ्जयसिंहो** महीपतिः । तस्यात्मजो महानासीद**मरेशः** प्रतापवान् ।
यत्प्रतापेन सामंतभूपालाः करदीकृताः । भूदेवास्तोषिता येन धराहेमादिदानतः ।
तस्यात्मजोसौ क्षितिपालमौलिः **संग्रामसिंहो** रमणीयमूर्त्तिः
येन स्वराज्ये विदुषां जनानां स्थित्यर्थमुर्वी बहुशः प्रदत्ता ॥
यत्कोदंडविमुक्तमार्गणगणप्रोत्सारितारिप्रियानेत्रोद्भूतजलौघकल्पितनदीपुरोभवद्भूतले ।
तत्र स्नातसुरांगनाकुचतटव्याधूतकाश्मीरकारक्ते वारिणि संप्लुतोषसि दिनाधीशोरुणो दृश्यते ॥
यस्मिन्महीं शासति वीरवर्ये भयस्य वार्त्ता न बभूव भूमौ ।
रामे यथा कुर्वति राज्यमादौ लोकास्तथासन्सुखिनः समग्राः ।
क्षमया पृथिवीतुल्यो धैर्ये मेरुरिवापरः **संग्रामेशः** प्रभुर्जीयान्मूर्त्या पंचशरोपमः ।
प्रजाः संस्थापिता धर्मे तेन भूपालमौलिना । धर्मराजमतो लोका व्याहरंतीह सर्वतः ।
पाखंडप्रचुरं लोकं समीक्ष्य धरणीश्वरः प्रजानां धर्मगुप्तर्थं बुद्धिं समकरोद्बुधः
तदादिशद्भूपतिरुग्रतेजाः **संग्रामसिंहो** द्विजदेवगोप्ता
अनंतनामानमनंतबुद्धिं **वाराणसी**स्थं द्विजवर्यसेवकं ॥
लोकः पाखंडमार्गेण भ्रष्टबुद्धिरभूत् क्षितौ । ग्रंथस्तस्मात्त्वया कार्यः सदाचारर---
लब्ध्वा ततो भूमिपतेरनुज्ञा**मनंतभट्टो**ध्वरशास्त्रवेत्ता ।
लोके **सदाचाररहस्य**संज्ञं ग्रंथं विधत्ते खलु धर्मशास्त्रे ।

End: इति **विधानपारिजाते** रुद्रविधानं समाप्तं ॥ इति श्रीमन्महाराजाधिराज**महाराणाश्रीसंग्रामसिंह**स्याज्ञया मीमांसाशास्त्रपारीण**दाइभट्ट**सूना **अनंतभट्टेन** कृते **सदाचाररहस्ये** यमादिलक्षणकथनपूर्वकं रुद्रविधानप्रकरणं ॥

सदाचारइ[र]हस्येन ग्रंथेनानेन विन्नाहा । प्रीयतां देवदेवेशो भक्तानुग्रहकारकः ॥

इदं पुस्तकं समाप्तं श्रीरस्तु शुभमस्तु संवत् १७८१ समये भाद्रपदे मांसे कृष्णे पक्षे चतुर्द्दश्यां भौमे वारे लीखीतं **कास्यां** मध्ये **मनीकर्णिका**समीपे ७ राम राम राम राम कायेस्थलीखीतं ॥ ॥ राम राम ॥

२०५५.

२५३८. **संन्यासपद्धतिः** । आनन्दतीर्थः.

SAṀNYÂSAPADDHATI, by ÂNANDATÎRTHA.

Beginning: ॐकाराय नमः ॥ श्रीराम कृष्ण वरद ॥ अथ **संन्यासपद्धतिः** ॥

सच्चिदानंदरूपाय प्रणवाख्याय विष्णवे ॥ नमस्तस्मै परानंदगुरवे बुद्धिसाक्षिणे ॥ १ ॥
जीवत्वं तु यदज्ञानाद्यज्ज्ञानात्तु परात्मता ॥ प्राप्यते तं गुरुं वंदे परमानंदमाधवं ॥ २ ॥
बंधो मोक्ष इति ज्ञानं यस्याज्ञानाद्विभाति वै ॥ यज्ज्ञानान्नैव किंचिरस्यात्तं वंदे मुरलीधरं ॥ ३ ॥

तत्रादौ **संन्यासे** लिख्यते ॥ श्रुतयः स्मृतयश्च ॥ **आरुण्युपनिषदि** ॥ **आरुणिः** प्रजापतिर्लोकं जगाम तं गत्वोवाच ॥ केन भगवन्कर्माण्यशेषतो विसृजामीति । तं होवाच प्रजापतिः स्वान्पुत्रान्भ्रातॄन्बंधादीन् शिखा यज्ञोपवीतं त्यागं स्वाध्यायं च भूर्लोकं जनोलोकं तपोलोकं सत्यलोकं च ॥ अतलवितलसुतलतलातलरसातलमहातलपातालब्रह्मांड च विसृजेत् ॥ दंडमाच्छादनं कौपीनं परिग्रहेत् ॥ शेषं च विसृजेदिति । **काठके** यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिरिति विद्वत्संन्यासपराः । श्रुतयः ॥

Fol. 49: *Prâṇayâtrâprakaraṇa* concluded; 103 *samâdhipra°*; 130 *vidvadvivekapra°*; 138 *nididhyâsanapra°*; 139 *s'ravaṇapra°*; 146 *karapâtrodarapûrtipra°*; 147 *madhukarapra°*.

End: इति **आह्निकप्रकरणं** समाप्तं ॥ ७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य**श्रीमदानंदानंदतीर्थ**सांप्रदायिकप्रकरणविरचित**संन्यासप्रकरणं** समाप्तं ॥ ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ १ ॥

मासोत्तमे मासे पौषमासे शुक्लपक्षे एकादश्यां गुरुवारे । संवत्सरे ॥ १८५८ ॥ शुभं भवतु ॥ मंगलं ददातु ॥ ७ ॥ ७ ॥ ७ ॥

२०६६.

४५८९. सूतकनिर्णयः.

SÛTAKANIRṆAYA.

Another title of this brief treatise, *Ashṭakâs'auchabhâshya,* is found on the margin of the leaves.

Beginning: अथ **सूतकनिर्णयः** ।

नाम्नः प्राग्दंतजातेरुपनयनविधेराप्लवोहस्त्रिरात्रं ज्ञातेरूर्ध्वं दशैतत्सहभुवि तु कृते नाम्नि पित्रोः सदैव ।
स्त्रीषु क्षौराद्यमाब्दादुपनयनविधेः पूर्ववत्संनिधौ स्यान्मातुस्तन्मासंख्यासमदिनमुभयोरुद्भवे गर्भनाशे । १ ।

नामकरणप्राक्प्रभृतश्चेदत्विग्दीक्षितब्रह्मचारिवर्जितानां ज्ञातीनामाप्लवः । स्नानमित्यर्थः । तेनाप्लवेन शुद्धिः स्यात् । ज्ञातयः सपिंडाः सप्तमपुरुषादर्वाचीनाः पंचमपुरुषाद्वा ।

End: इति **अष्टकआशौचव्याख्यानं** समाप्तं ॥ संवत् १४६६ वर्षे **श्रीनंदपद्रे महाराणश्रीउदसिंहविजराज्ये** । महं श्री अर्जुदेव प्रतिपतौ । द्वि० **मुरारिसुतधनेश्वरेणा**त्मपठनार्थं लिखितं ॥

२११२–२३.

४०२४–३४. हरिभक्तिभास्करः (सद्वैष्णवसारसर्वस्वम्) । भुवनेश्वरः.

HARIBHAKTIBHÂSKARA, by BHUVANES'VARA.

No. 2112 containing the first of the twelve *Prakâs'as* begins:

ॐ श्रीगणेशाय नमः

श्रीमन्नारायणं वंदे सच्चिदानंदमंदिरं ब्रह्मविष्ण्महेशाद्यैर्यदंशांशैश्रितं जगत् १

गीर्वाणेशं गुणेशं गजवरगतिदं गोगणेशं गणेशं गोपेशं गोपिकेशं गगनविमलभं मुंजकेशं महेशं
विश्वेशं द्वारिकेशं वरगरुडगतिं केशवं क्लेशनाशं श्रीशं गोपालवेशं प्रणमत सततं श्रीहृषीकेशमीशं २
केलिपरौ सुकिशोरौ कुंजकुटीरतटीकृतसुखवासौ विद्युज्जलधरभासौ श्रीराधामाधवौ वंदे ३

In No. 2123 *Prakâs'a* xii. ends:

वेदाष्टद्विपचंद्रसंमितशके श्रीविक्रमार्काद्गते राधे मासि च मेखगे दिनमणौ चंद्रे वृषस्थे तथा
ब्रह्मर्क्षे गिरिजातिथौ रविदिने योगेऽतिगंडाभिधे प्रातः **श्रीहरिभक्तिभास्कर** इति ग्रंथः समाप्तिं गतः ॥

इति श्रीकाशीनाथात्मजश्रीभीमानंदसुतश्रीभुवनेश्वरदेवविरचिते **श्रीहरिभक्तिभा[स्क]रे सद्वैष्णवसारसर्वस्वे** प्रकीर्णकाख्यो द्वादशः प्रकाशः संपूर्णः १२ ॥ संपूर्णश्चायं **श्रीहरिभक्तिभास्कराख्यो** ग्रंथः ॥ शुभमस्तु ॥

२१३१.

४३२२. तन्त्रचूडामणिः.

TANTRACHÛDÂMAṆI.

Beginning: ॥ ॥ श्रीगणेशाय नमः ॥ ॥ श्रीकुमारिलाय नमः ॥ ॥
वेदोनादिर्यस्य निश्वासभूतः पंचात्माग्निर्वक्रतो यस्य जातः ॥
धर्मः शर्मोद्भूतिभूर्यस्य हृत्तः सिंहास्योसौ वाचि मे स्तात् कृपातः ॥ १ ॥
निगमाय विलासिकर्मणे मुनये **जैमिनये** च सूत्रिणे ॥
शबराय च **भाष्यकारिणे** नम ईशाय **कुमारिलात्मने** ॥ २ ॥
वंदे पूर्वोत्तरोदंचन्मीमांसासंगमेश्वरं ॥ कोठीशर्मविमाचारसुरागारचरं गुरुं ॥ ३ ॥
श्रुतिस्मृतिसदाचारप्रमाणप्रमितात्मनः ॥ बोधाय धर्मतत्त्वस्य मीमांसार्थः प्रदर्श्यते ॥ ४ ॥

End: तदेवं
अज्ञानसंदेहविपर्ययाख्यं त्रेधाऽप्रमाणत्वमपास्य वेदे ॥
प्रमाण्यमस्थाप्युरुकारिकाख्ये सद्युक्तिसंवैरिह तर्कपादे ॥ ४ ॥

इति **श्रीतंत्रचूडामणौ प्रथमाध्यायस्य प्रथमः** पादः ॥ ॥ ७ ॥ ॥ श्रीरस्तु ॥ ॥

२१३२.

४२७९. धर्मविचारसंक्षेपः.

DHARMAVICHÂRASAṀKSHEPA.

Beginning: आराध्य श्रीपतिं बुद्धावाराध्यचरणानपि । धर्मद्वादशलक्षण्याः संक्षेपं वक्तुमारभे । १

अथातो धर्मजिज्ञासेत्यादिभिः सूत्रैः द्वादशलक्षण्या धर्मो निरूपितः । तत्र श्रेयःसाधनं धर्मः । तत्र प्रमाणं विधिवाक्यं यदुक्तं चोदनालक्षणोर्थो धर्म इति । विध्यर्थश्च शब्दव्यापारात्मिका शाब्दी भावना । तस्याः भाव्यपुंप्रवृत्तिलक्षणा आर्थी भावना ।

End: मध्ये तंत्रं यस्य येषां विधानं तेषु प्रोक्तो मुख्यतंत्रप्रसंगः ।
जिज्ञास्यो यो धर्म उक्तश्चतुर्द्धा स प्रज्ञातो लक्षणैर्द्वादशांतैः ॥

इति **धर्मविचारसंक्षेपः** ॥

२१३३.

४२८२. न्यायरत्नम् । चिन्तामणिशिष्यः.

NYÂYARATNA, by a pupil of CHINTÂMAṆI.

This copy is, perhaps, identical with the MS. described by Hall p. 182 as in possession of Paṇḍit Vaidyanâtha Pâṭhaka of Benares.

Beginning: श्रीमहागणपतये नमः ।

हिमाचलसुतानाथं तत्सुतं च तथांबिकां । सर्वज्ञं सद्गुरुं नत्वा लिख्यते **न्यायसंग्रहः** । १

ते विस्तृताः स्वशास्त्रेषु द्रुतं नैवावबोधनक्षमाः । संक्षिप्य संगृहीताश्च शास्त्रकारैस्ततस्ततः । २

न्यायरत्नाभिधानोयं ग्रंथः सर्वहितावहः । उधृतः स्वोपकाराय सागरादिव यत्नतः । ३

जगति कल्पतरोर्गलितं फलं ललितपुष्पभवं ललितामृतं ।

सकलशास्त्रविधौ परमं हितं बुधजनाः कलयंतु पुनः पुनः । ४

कल्पतरोः फलं दिव्यं गुणदं भुवि दुर्लभं । **चिंतामणि**प्रसादेन मया प्राप्तं स्वभीष्टदं । ५

पौर्वापर्य इति । षष्टे स्थितं ।

The MS. breaks off with:

Fol. 54: स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीति श्रूयते स्वधितिरुभयतोधारः क्षुरः एव. दानं चास्ति द्रवाणामाज्यादीनां संहतानां च मांसादीनां तत्राविशेषश्रवणादनियमे प्राप्ते राद्धांतः । अशक्यार्थविध्यसंभवात् विधिरेव यथासामर्थ्यं विधेयं व्यवस्थापयति । शक्तश्च स्रुवो द्रवस्यावदने स्वधितिर्मांसस्यावदाने हस्तश्च पुरोडाशस्य तस्मादर्थात्सामर्थ्याकल्पनाव्यवस्थासामर्थ्यस्य योग्यतारूपकबोधकदेशत्वादिति ॥

२१६२.

४३६३. मीमांसाद्वादशाध्यायसंग्रहः । अप्पदीक्षितः.

MÎMÂṀSÂDVÂDAS'ÂDHYÂYASAṀGRAHA, by APYADÎKSHITA.

The date given by the copyist in the colophon is uncertain. A year seems to be indicated which was the 16th of a century of the S'aka Era and the 52nd (*Pârthiva*) of the Juppiter cycle.

Beginning: ॥ श्रीमहागणपतये नमः ॥ ॥ ॐ अथातो धर्मजिज्ञासेति सूत्रे प्रमाणस्वरूपसाधनफलैर्धर्मस्य विचारं प्रतिज्ञाय प्रथमाध्याये तस्मिन्प्रमाणं निरूपितं । तत्र प्रथमे पादे साक्षाद्धर्मे प्रमाणभूतायाश्चोदनायाः पौरषेयत्वाद्यप्रामाण्यहेतुशंकानिराकरणपूर्वकं तत्र प्रामाण्यमुपपादितं ॥

End: ॥ ७ ॥ इति **श्रीमदैप्यदीक्षित**विरचितायां **पूर्वमीमांसायां द्वादशाध्यायासंग्रहः** समाप्तः श्रीकाशीविश्वेश्वराभ्यां नमः ॥

शाकाख्ये षोडशे माने पार्थिवे वत्सरे तथा ॥ आषाढ्या शुक्लपक्षे तु दशम्यां बुधवासरे ॥ १ ॥

भायभट्टतनूजेन ह्यानंदवनवासिना ॥ लिखितं **विश्वनाथेन** विदुषां परितुष्टये ॥

श्रीरस्तु ॥ ७ ॥

अनंतं यत्प्राहुर्निरतिशयसच्चित्सुखवपुः पराभूतद्वैतप्रकरविशदं प्रत्यग्रुदितं ॥
अखंडार्थैर्वयं वचननिकरैरौपनिषदैर्महादेवज्योतिस्तदपि परमात्मेति विदितं ॥ १ ॥

२१८१.

४३४८. मीमांसारत्नम् । रघुनाथभट्टाचार्यः.

Mîmâṁsâratna, by Raghunâtha Bhaṭṭâchârya.

Beginning: श्रीगणेशाय नमः तदेतन्निरूपितमपि प्रमाणषट्कं स्वोचितं प्रमेयमंतरेणासदनिर्वचनीयमेव स्यादिति तदर्थं तदपि निरूप्यते तच्च संक्षेपतो द्विविधं भावोऽभावश्चेति तत्राद्यो द्रव्यगुणकर्म्मसामान्यविषयताशक्तिवैशिष्ट्यभेदेन स न-विध इति प्रांचः.

End: यस्य प्रमेयरत्नैरात्मानं भूषयितुमिच्छास्ते विद्यालंकृतिकृतिनः कृतिरेषा कल्प्यतां तेन १

किं च

रघुनाथस्य कृतिनः कृतिः कौशलशालिनी मीमांसातत्वजिज्ञासोर्मेवितानंददायिनी २ ॥ ॥

इति विद्यालंकारश्रीरघुनाथभट्टाचार्य्यकृतमीमांसारत्ने प्रमाणप्रमेयविधिरत्नात्मके प्रमेयरत्नाख्यो द्वितीयः परिछेदः संपूर्णः श्रीरामः श्रीसंवत् १९०४.

२२२५.

४२१६. सोमविहारकारिकाविवरणम्.

Somavihârakârikâvivaraṇa.

This is evidently the MS. described by Hall p. 191, then in possession of Paṇḍit Vaidyanâtha Pâṭhaka.

Beginning: Text. श्रीगणेशाय नमः ॥

प्राग्वंशः षोडशायामो द्वादशव्यास इष्यते ॥ प्राग्वंशात्पश्चिमे भागे [प]त्नीशाला चतुष्पदा ॥ १ ॥

Comm. श्रीगुरुचरणकमलेभ्यो नमः ॥ ॥ अथ कर्मकांडकलापे अतीव निष्णाततरः कश्चिदृष्टिकल्पः पुरुषः सर्वेषां सप्तर्तूनां प्रकृतिभूतज्योतिष्टोमसंबंधिविहारस्य प्रतिपादकानां मंडनकारिकाणां गूढार्थत्वात्सुखबोधलब्धये व्याख्यानमारभते ॥ तत्र तावत् सदोहविर्धनादिभ्यः पुरस्तात्प्राग्वंशनिर्माणं प्रथमतः प्रतिपाद्यतो यद्यपि स्वकीयशुल्वसूत्रे प्राग्वंशविधायकं सूत्रं न दृश्यते तथापि जरत्सूत्रे तद्विधायकसूत्रस्य विद्यमानत्वात्तदनुसारेणा न तु स्वकीयशुल्वसूत्रानुरोधेना कुतः तस्मिन्विषये स्वसूत्रस्यानुपलभ्यमानत्वात् । अत एव तत्सूत्रानुकरणं प्राग्वंशः षोडशायाम इति ॥

End: Text. इति मानत्रयपरिमिता सोमविहारकारिका समाप्ताः ॥ ॥

Comm. इति पदमानप्रतिपादकसोमविहारकारिकाविवरणं समाप्तं ॥ श्रीगुरुचरणकमलाभ्यां नमः ॥ ॥

२२३४.

१९१३. अनिर्वचनीयखण्डनम्.

ANIRVACHANÎYAKHAṆḌANA (?).

The first verse agrees with the beginning of Harsha's *Khaṇḍanakhaṇḍakhâdya*, Oxf. 246 a. A note on the fly-leaf by a different hand describes the MS. as "*S'rîharshakṛitânirvachanîyakhaṇḍanapustakam.*"

Beginning: ॥ श्रीगणेशाय नमः ॥ सरस्वत्यै नमः ॥

अविकल्पविषय एकः स्थाणुः पुरुषः श्रुतोस्ति यः श्रुतिषु ॥
ईश्वरमुमया न परं वंदेतुमयापितमधिगतं ॥ १ ॥
मानापनोदनविनोदनते गिरीशे भासेव संकुचितयोरुचितं तदिंदोः ॥
भेत्तुं भवानिशचितं दुरितं भवानि नम्रीभवानि घनमंघ्रिसरोजयोस्ते ॥ २ ॥
शब्दार्थ**निर्वचनखंडनया** नयंतः सर्वत्र निर्वचनभावमखर्वगर्वान् ॥
धीरा यथोक्तमपि कीरवदेतदुक्त्वा लोकेषु दिग्विजयकौतुकमातनध्वं ॥ ३ ॥

अथ कथायां वादिनोर्नियममेतादृशं मन्यंते ।

Fol. 33: The MS. breaks off with:

सहचरितदर्शनादिना सहकारिणा युक्तस्य संस्कारस्य तज्जनने नास्त्यतिप्रसंग इति चेत् न तेनैव सहकारिणा युक्तस्येंद्रियस्यापि तज्जननेतिप्रसंगाभावात् अननुभूतेन--प्रसंग इति....

२२३८.

२२७०. अर्थपञ्चकविवेकः । शठगोपदासः.

ARTHAPAÑCHAKAVIVEKA, by S'AṬHAGOPADÂSA (S'AṬHARIPU).

Beginning: श्रीमते रामानुजाय नमः ॥

लक्ष्मीशोखिललोकेशः कृपाब्धिः **वेंकटालयः** ॥ तनोतु मंगलं पुंसां **श्रीनिवासः** परात्परः ॥ १ ॥
श्रीरंगार्य्यं नमस्कृत्य वक्ष्ये पूर्वोक्तवर्त्मना ॥ संग्रहेणार्थकं पंच मुमुक्षुणां मुदावहम् ॥ २ ॥
मुमुक्षुभिः सदा ज्ञेयं परिज्ञा नादिसिद्धये ॥ प्रत्येकं पंचधा प्रोक्तं प्रवुद्धै**रर्थपंचकम्** ॥ ३ ॥
क्षेत्रज्ञ ईश्वरश्चैव तदुपायः फलं तथा ॥ तद्विरोधीति पंचार्था प्रत्येकं पंच पंचधा ॥ ४ ॥

End: श्री निखिलनिगमसारः सं[मसं]मतः सज्जनानां स्वपरविशदवोधी मोक्षसोपानभूतः
स भवतु परतुष्ट्यै वैष्णवानां मुदे च **शठरिपुरचितोयं पंचकानां विवेकः** ॥ ४५ ॥ ७ ॥

इति **श्रीमछठगोपदासस्य** कृति श्रीमद**र्थपंचकविवेक**विरोधी पंचकथनपूर्वकप्रपन्नस्य कालक्षेपकक्रमो नाम पंचमो विवेकः ॥ ५ ॥ समाप्तोयमर्थपंचकविवेकः ॥ ५ ॥ कार्त्तिकमासे शुभे शुक्लपक्षे दसम्यां सनिवासरे लिखितं **गोविंदरामानुजदासेन** स्वयं पठनार्थं ॥ संवत् १८४८ काः.

२२४४.

२२९२. अष्टादशार्थविषयभेदः.

ASHṬÂDAS'ÂRTHAVISHAYABHEDA (?).

Beginning: श्रीमते रामानुजाय नमः ॥

अष्टादशार्थविषये द्रविडप्रबंधव्याख्यात्रिभिर्गुरुभिरुक्तमिहार्थभेदं
श्रीभाष्यमुख्ययतिभूमिपतिप्रबंधव्याख्यातृभिश्च कथितं प्रविभज्य वक्ष्ये
द्रमिडाचार्यदृष्टार्थं पूर्वं वक्षे यथामति संस्कृताचार्यदृष्टार्थं पश्चात्सद्भिर्नियोजितं

अत्र पूर्वैः संगृहीतोयं श्लोकः

भेदस्वामिकृपाफलान्यगतिषु श्रीवाप्युपायत्वयोस्तद्वात्सल्यदयानियुक्तिवचसो न्यासे च तत्कर्तरि
धर्मत्यागविरोधयो स्ववहिते न्यासांगहेतुत्वयोः प्रायश्चित्तविधौ तदीयभजने न व्याप्तिकैवल्ययोरिति

अस्यार्थः.

End: ये तु शिष्टास्त्रयो भक्ता भक्तकामा हि ते मताः सर्वेच्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाग

इति च्यवनधर्मतोक्त्या कैवल्यस्य नश्वरत्वमुक्तमिति सर्वं समंजसं ॥ १८ ॥ शुभमस्तु ॥ श्रीमते रामानुजाय नमः ॥ ॥ श्रीमते वेदांतदेशिकाय नमः

प्रणतसुरकिरीटप्रांतमंदारमांलाविगलितमकरंदस्निग्धपादारविंदः
पशुपतिविधिपूज्यः पद्मपत्रायताक्षः पणिपतिपुरनाथः पातु मां देवनाथः ॥ १ ॥ ॥ ॥ ॥

२२६०.

२०५३. आत्मानन्दप्रकाशार्याः । दक्षिणामूर्तिः.

ÂTMÂNANDAPRAKÂS'ÂRYÂḤ, by DAKSHIṆÂMÛRTI.

The title as shown above is found in the colophon to the other MS., No. 2261, in which this work is ascribed to *S'aṁkarâchârya.*

Beginning: ॐ श्रीगणेशाय नमः

श्रीगुरुचरणद्वंद्वं वंदेहं मथितदुःसहद्वंद्वं भ्रांतिग्रहोपशांतिपांसुमयं यस्य भसितमातनुते १
दैशिकवरं दयालुं वंदेहं निहतसकलसंदेहं यच्चरणद्वयमद्वयमनुभवमुपदिशति तत्पदस्यार्थं २
संसारदावपावकसंतप्तः सकलसाधनोपेतः स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ३.

End: इत्यात्मबोधलाभंमुद्धरनुचिंत्य मोदमामेन प्रारब्धकर्मणोंते परमं प्राप्यते स्म कैवल्यं
मोहांधकारहरणं संसारोद्वेलसागरोत्तरणं स्वात्मनिरूपणमेतत्प्रकरणमकृत दक्षिणामूर्त्तिः ५४
अज्ञानांधविहंता विरचितविज्ञानपंकजोल्लासः मानसगगनतलं मे भासयति श्रीनिवासगुरुभानुः ५५

इत्यात्मानंदप्रकाशप्रकरणं पूर्णतामगात् ॥ श्रीः ॥

२३०९.

१९५८. पञ्चाध्यायोपदेशः । शंकराचार्यः.

PAÑCHÂDHYÂYOPADES'A, ascribed to S'AṀKARÂCHÂRYA.

Beginning: श्रीगणेशाय नमः **श्रीमच्छंकराचार्येणोक्तपंचाध्यायोपदेशप्रारंभः**
स्वात्मैकतत्वं परमं विशुद्धं सत्यं स्वबोधः स्वयमेव बोधं
चिदात्मबोधं विमलं विशुद्धं स्त्वं तत्वबोधं चिदस्वात्मबोधं १
सोहं देव इति श्रुतिर्निगदितो चिद्बोध एको हरिः पूर्णानंदमनंतमेवमखिलं सर्वात्मको सर्वगः
अज्ञातं शिवतत्वमूढभ्रमितो मृद्दारुचित्रे शिला व्योमातीतमखंडचिद्घनशिवं खंडः कृतो साध्यते २
अखंडं खंडयन्मूढो मृच्छिलादारुचित्रता भावयन् भिन्नबुद्धित्वादज्ञानी पातकी पुमान् ३.

End: सर्वे वासनया व्रतं शतद्दढं देहे तथा पार्थिवं तत्तद्ज्ञाति हि विश्वमेवमखिलं देहोस्ति हृत्पंचके
धातुः सप्त त्रयस्ततस्तु चिदित्त्वं प्राणादिवायुर्दशै स्वांतःकर्णचतुष्टयेंद्रियवशं विश्वं प्रकाशं कुरु ५

इति श्रीमत्परमहंस० **पंचाध्यायोपदेशं** संपूर्ण शुभंमस्तु ॥ ॥ छ ॥ ॥

२३१०.

१३. भूर्ज० पञ्चीकरणवार्तिकम् । अनन्तरामयतिः.

PAÑCHÎKARAṆAVÂRTIKA, by ANANTARÂMA YATI.

Beginning: अथ **पंचीकरणवार्तिकं** लिख्यते ॥ ॥ श्रीविष्णुपुराणे ॥
निर्व्यापारमताख्येयं व्याप्तिमात्रमनौपमम् आत्मसम्बोधविषयं सत्तामात्रमलक्षणम् ॥
प्रशान्तमभयं शुद्धं दुर्विभाव्यमसंशयम् विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम् ॥
देवमानुषपश्वादिस्वप्नेपि बहुधा विभुः स्थितः सर्वस्वरोनन्तो भूतमूर्तिरमूर्तिमान् ॥
ऋचो यजूंषि सामानि तथैवाथर्वणानि वै इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः ॥

End: इदं प्रकरणं यत्तज्ज्ञातव्यं भगवत्तमैः ॥ अमानित्वादनिलयैर्गुरुभक्तिप्रसादतः ॥
श्रीकृष्णरामपादानां शिष्येण रचितं मया ॥ **अनन्तरामयतिना** ब्रह्मवित्प्रणवेन तु ॥
वेदशास्त्रेषु निर्णीतं व्यासादिगुरुसम्मतम् ॥ निश्श्रेयसं मुमुक्षूणां समाधिप्रक्रियादरात् ॥
वाचकः प्रणवो यस्य लीलावस्त्वखिलं जगत् ॥ श्रुतिरात्मा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥

इति **पंचीकरणवार्तिकं** समाप्तम् ॥

२३१८.

१०७८. ब्रह्मचिन्तनिका । शंकराचार्यः.

BRAHMACHINTANIKÂ, ascribed to S'AṀKARÂCHÂRYA.

Beginning: श्रीगणेशाय नमः श्रीगुरुभ्यो नमः ॥ ब्रह्मचिंतनिका ॥

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं । यिति स्यां निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥ १ ॥
अहमेव परं ब्रह्म न चाहं ब्रह्म[णः] पृथक् ॥ यित्येवं समुपासी[त] ब्राह्मणो ब्रह्मनि स्थितः ॥ २ ॥
अहमेव परं ब्रह्म निश्चितं चित चिंतितां ॥ चिद्रूपत्वादसंगत्वादवध्यत्वात्प्रयत्नतः ॥ ३ ॥

End: इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिते **ब्रह्मचिंतनिका** समाप्ता ॥ ॥

श्रीगुरु अर्प्पणः ॥ श्रीमहाकालेश्वरार्प्पणमस्तु ॥ ॥

२३१९.

२३५३. ब्रह्मलक्षणवाक्यार्थसंग्रहः । शवकोपमुनिः.

BRAHMALAKSHAṆAVÂKYÂRTHASAMGRAHA, by S'AVAKOPA MUNI.

Paṇḍit Vaidyanâtha Pâṭhaka's MS., described by Hall, p. 96.

Beginning: श्रीमते रामानुजाय नमः

अव्याद्वोयमदृष्टपूर्वकरटप्रेक्षेक्षणाकंपितः स्वेदार्द्रीकृतकुंकुमारुणकुचामुद्वीक्ष्य संरंभतः
मत्वा ध्वांक्षविदारितां प्रणयिनीमस्त्रेण तार्णेन यो विव्याधारिदिशं प्रियाहसितसप्रज्ञोपि सत्यव्रतः १
प्रणम्य श्रीहयग्रीवं चरणांभोरुहद्वयं **ब्रह्मलक्षणवाक्यार्थः** संग्रहेण प्रकाश्यते २.

End: इति श्रीसर्वतंत्रस्वतंत्रभगवद्**रामानुजाचार्य**सिद्धांतधुरंधर**श्रीशठारिसूरि**चरणारविंदसेवासमधिगतवेदांतसुधारहस्य**श्रीशवकोपमुनेः** कृतिषु **वाक्यार्थसंग्रहः** समाप्तः

श्रीवृन्दावनसरसः श्रीराधारमणचरणपद्मनिधिः
श्री**पुरुषोत्तम**विबुधो विदधे वाक्यार्थसंग्रहं हृदये १

संवत् १८३८ माघा वदि १ **मधुसूदनपुरे कुंजभवने** गंगासमीपे आचार्याणां स्थानमध्ये ॥

२३२३.

२२९०. ब्रह्मसूत्रव्याख्या **न्यायसंग्रहः** । नित्यानन्दाश्रमः.

NYÂYASAMGRAHA, a commentary on the BRAHMASÛTRAS,
by NITYÂNANDÂS'RAMA.

The MS. which has lost foll. 1-18, begins in the comments on i. i. 7.

Fol. 19: नां तारामियं--दर्शयत्येवं दुर्विज्ञेयत्वादात्मतत्वस्यादौ प्रधानात्मत्ववचनस्य योग्यत्वात्तदेव सच्छब्दवाच्यमित्यत आह हेयत्वावचनाच्चेति ।

Fol. 108: The ii. Adhyâya is followed by the colophon: इति श्रीपरमहंसपरिव्राजकाचार्य**श्रीपुरुषोत्तमाश्रम**पूज्यपादशिष्य**नित्यानंदाश्रम**विरचितायां **शारीरकसूत्रव्याख्यायां न्यायसंग्रहाख्यायां** द्वितीयाध्यायस्य चतुर्थः पादः समाप्तश्चायं द्वितीयोध्यायः ॥ ढ ॥ ॥ ढ ॥ श्रीरामभद्राय नमः ॥ श्रीलक्ष्मीनृसिंह ।

इषुगुणरसभूमिः संमितेब्देष्वाशेषे शिशिरकिरणघस्ने **विश्वनाथस्य** पुर्या ।
नरहिरपरितोषेऽलेखयन्द्भूमिदासः प्रविदधदिह पाठं तस्य वेदांतशास्त्रं ॥ १ ॥

संवत् १६३५ वर्षे पौषपौर्णमास्यां वेदांतशास्त्रं **महीधरोऽलेखयत्** ।

Similar colophons at the end of Adhyâyas iii. and iv. The colophon of Adhy. iv. which has been partially effaced, gives the name of another copyist, *Vaishṇavânanda*, and the date *saṁvat* 1635 *mâghamâse s'uklapakshe' trayôdas'yâṁ tithau somavâsare.*

२३४९.

३९८९. ब्रह्मसूत्रवृत्तिः शास्त्रदर्पणः । अमलानन्दः.

S'ÂSTRADARPAṆA, a commentary on the BRAHMASÛTRAS, by AMALÂNANDA.

Beginning: ॐ श्रीढुंढिराजाय नमः श्रीसरस्वत्यै नमः
विद्यारत्नं मयावाप्तं यत्कृपापारवारिधेः तं वंदे**नुभवानंदं** गुणरत्नाकरं गुरुं
हरिहरलीलावपुषं परेश्वरं **व्यासशंकरौ** नत्वा **वाचस्पति**मतविविवितमादर्शं प्रारभेखिलं
ॐ अथातो ब्रह्मजिज्ञासा ब्रह्म विचार्यं नवेति संदेहः तद्विचारस्य विषयप्रयोजनासंभवसंभवाभ्यां तत्र
अहं धियात्मनः सिद्धेस्तस्यैव ब्रह्मभावतः तद्ज्ञानान्मुक्त्यभावाच्च जिज्ञासा नोपपद्यते.

End: इति श्रीपरमहंसपरिव्राजका**नुभवानंद**पूज्यपादशिष्यस्य भगवद**मलानंदस्य** कृतौ **शास्त्रदर्पणे** चतुर्थ्याध्यायस्य चतुर्थः पादः समाप्तं च शास्त्रं ॥ ॥ छ ॥ ॥ रामाय रामचन्द्राय वै नमो नमः ॥ छ ॥
मंगलं लेखकानां च पाठकानां च मंगलं मंगलं सर्वभूतानां भूपतीनां च मंगलं
श्रीरस्तु **शास्त्रदर्पणः** ॐ.

२३५५.

१२३३. भेदप्रकाशः । शंकरमिश्रः.

BHEDAPRAKÂS'A, by S'AṀKARAMIS'RA.

This MS. belonged previously to Paṇḍit Vaidyanâtha Pâṭhaka, of Benares; comp. Hall p. 85.

Beginning: ॐ नमो भगवते वासुदेवाय ॥
माया विद्या प्रकृतिरिति यद्गीयते दृष्टमेतत्साहित्येन त्रिभुवनमयीं सृष्टिमेतां वितन्वन् ॥
आनंदोहं चितिरहमिदं मन्मयं सर्वमित्थं यः संस्तौति श्रुतिमयगिरा तं नुमो भिन्नमीशं ॥
मोक्षाय स्पृहयालवः श्रुतिगिरां श्रद्धालवोर्थे ऋजौ तर्कोदर्कविभावनासु सुतरां व्याजेन निद्रालवः ।
भेदे दृक्पथमागतेपि सहसा तन्द्रालवश्छांदसाः कैवल्यात् पतयालवः श्टणुत सत् युक्तिं दयालोर्म्मम ॥
भेदरत्नपरित्राणे तार्किका एव यामिकाः । अतो वेदान्तिन स्तेनान्निरस्यत्येष शङ्करः ।
देहादेस्तात्विकाद्भेदं सत्यमात्मन्यजानतां । मुमुक्षूणां न भेदोस्तीत्यतो भेदो निरूप्यते ॥

End: इति महामहोपाध्यायसन्मिश्रश्रीशङ्करकृतौ भेदप्रकाशः समाप्तः ॥ ॥ ॥
संवत् १५१९ समये चैत्र शुदि १५ पूर्णिमा मंगलदिने ॥ श्रीमत्काइयाः ॥
लिखितं कायस्थसूर्यदासेन ॥ श्रीगंगायै नमः ॥ ॥ छ ॥

२३६१.

११९६. मकरन्दविवृतिः । चित्सुखमुनिः.

MAKARANDAVIVṚITI, a commentary on ÂNANDABODHA'S NYÂYAMAKARANDA, by CHITSUKHA MUNI.

This MS. belonged to Paṇḍit Vaidyanâtha Pâṭhaka, being the one described by Hall p. 155. .

Beginning: श्रीमहागणपतये नमः ॥ श्रीरेण्डकायै नमः ॥ प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगमनकामः शिष्टाचारपरिप्राप्ततया कृतमिष्टदेवतानमस्कारमाचरशिक्षार्थं ग्रंथतः संपादयन् प्रकरणस्याभिधेयसंबंधप्रयोजनानि च दर्शयति यद्वासेत्यादिना श्लोकेन तत्र जीवब्रह्मणोरेकत्वलक्षणं विषयं दर्शयितुं ब्रह्मणतटस्थलक्षणमाह यस्याहुर्भुवनोद्भवस्थितिलयानिति ॥

End: इति चित्सुखमुनिविरचिता मकरंदविवृत्तिः समाप्ता ॥ ॥ श्रीशके १५३८ नलसंवत्सरे मार्गशीर्षमासे भट्टदत्तात्रयात्मजेना पद्मनाभेना इदमलेखि पुस्तकं ॥

करकृतमपराधं क्षंतुमर्हंति संतः ॥

शुभं भवतु लेखकपाठकयोः ॥ ॥ छ ॥

२३६२.

५९१. यतिराजसप्ततिः सटीका । वेङ्कटनाथार्यः.

YATIRÂJASAPTATI, by VEÑKAṬANÂTHÂRYA, with the commentary of an unknown author.

Beginning: Text. ॐ श्रीमते रामानुजाय नमः श्रीमत्तिरुवेंकटगुरवे नमः ॥
कमप्याद्यं गुरुं वंदे कमलागृहमेधिनं प्रवक्ता छंदसां वक्ता पंचरात्रस्य यः स्वयं १

Comm. ॐ श्रीमते रामानुजाय नमः श्रीमत्तिरुवेंकटगुरवे नमः

श्रीमान्वेंकटनाथार्यः कवितार्किककेसरी वेदांताचार्यवर्यो मे संनिधत्तां सदा हृदि १
स जयति यतिकुलधुर्यः सनिगमांताचार्यदेशिकप्रवरः तेप्यस्मद्गुरुवर्य्याः हरिदासश्रीनिवासगुरुमुख्याः १
यतिराजसप्ततिनुतिं व्याख्यास्ये सद्बुधाज्ञया शक्त्या स्वयमेव विदंत्वस्या विबुधाः सार्थान्यटीकाभ्यः २

इह खलु भगवान् वेंकटनाथार्यः श्रीमद्रामानुजमुनिस्तुतिं चिकीर्षुरादौ गुरुपरंपरामनुसंधत्ते कमप्याद्यमित्यादिना.

End: Text. विश्वग्व्यापिन्यगाधे यतिनृपतियशःसंपदेकार्णवेस्मिंश्छन्नाशुद्धावगाहे शुभमतिभिरसौ वेंकटेशोभिषिक्तः
प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवृत्त्या सप्तत्या सारवत्या समतनुत सतां प्रीतिमेतां समेतां ७१

आशामतंगजगणानविसह्यवेगान्पादे यतिक्षितिभृतः प्रसभं निरुंधन्
कार्य्यैः कथाहवकुतूहलिभिः परेषां कर्णे स एष कवितार्किकसिंहनादः ७२ ॥

Comm. कविरिदानीं स्तुतिमुपसंहरन्नन्योक्तिमाश्रित्य यतिनृपतिकीर्तिसंतोषवद्भिर्वेदांतगुरुपदाभिषिक्तो वेंकटाचार्यस्तेषां यतिराजसप्ततिजनितप्रीतिमेव पारितोषिकं ददाविलाह विष्वगिति, &c.

The commentary closes after the explanation of verse 72 without a colophon.

२३७९.

२०५२. रत्नप्रकाशः (?).

RATNAPRAKÂS'A (?).

The name of this treatise is quite uncertain; the above has been conjectured from the letters र° प्र° on the margin of the leaves.

Beginning: ॐ श्रीगुरुभ्यो नमः । ॐ सरस्वत्यै नमः ।

ॐ सदद्वैतं ज्योतिर्द्वितयमिवयज्ज्ञातमयथानुवृत्तं व्यावृत्तेष्वविकृतमुदासीनमकलम्
यतो जन्माद्यस्य स्थिरचरनतोच्चस्य जगतो नमामस्तद्ब्रह्मापरमितसुखाब्धिं श्रुतिपदम् १
यत्सत्तया मरुमरीचिजलेन्द्रजालस्वप्नोरगभ्रमनिभा विषया विभान्ति
तं सच्चिदात्मकमनन्तमनन्यबुद्ध्या ध्यायाम आत्मरतिमोहनिवृत्तिसिद्ध्यै २
विद्या क्षान्तिर्विरागोपरतिशमदया दुर्लभा अप्यशेषाः पुंसां यत्सन्निधानान्निरुपहितदयापाङ्गतो हस्तलब्धाः
तं विद्वद्वन्द्यपादं सकलजनहितायेह निर्वृत्तदेहं स्वात्मानंदैकमग्नं मृगितयतिपदं श्रीयतीशं नमामि ३
श्रीसर्वार्चितविघ्नराजमनिशं प्रत्यूहपुञ्जापहं श्रीदेवीं वरदां शिवं शिवकरं विष्णुं च विश्वाश्रयम्
भास्वंतं परिभासयन्तमतुलं भासा जगच्चाव्ययं नत्वाब्देनलसिन्धुकुण्डलिविधौ कुर्वे प्रकाशं धियः ४.

Fol. 6. The MS. breaks off with:

न च विशेष्यासिद्धिः जगदधिष्ठानत्वेन तस्य सत्वात् जगदधिष्ठानत्वं च सच्चिदात्मतया सर्वसंबद्धत्वात् किञ्च य आत्मानमसन्तमसंतमभिदधाति स प्रष्टव्यः किं स्वात्मानं निराकरोषि किं वा परात्मानम् आद्ये निराकर्त्ता त्वमेवासन् न त्वयमात्मा निराकार्यः द्वितीये निराकर्तुस्तवैव परमार्थत्वात्कथमस....

२३८८.

१९५५. वाक्यार्थबोधः.

VÂKYÂRTHABODHA.

Beginning: श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीगुरवे नमः

नत्वात्मानं गुरुं कृष्णं सच्चिदानंदलक्षणं नित्याऽपरोक्ष्यागुह्यं यत् ब्रह्म सर्वात्मकं भजे

अथ महावाक्यार्थप्रबोधप्रकारं व्याख्यास्यामः ॥ अत्र ब्रह्मात्मैकत्वं विषयः ॥ १ ॥ अत्यंतदुःखनिवृत्तिनिरतिशयसुखावाप्तिः

प्रयोजनं ॥ २ ॥ बोध्यबोधकभावलक्षणः संबंधः ॥ साधनचतुष्टयसंपन्नप्रमाताऽधिकारी ॥ इत्यनुबंधचतुष्टयं ॥

End: आत्माऽद्वैतानंदं यत्तदद्वैतानंदब्रह्म वै । यत्साक्षादपरोक्षत्वात्पायात्स्तुत्यानयार्चकान् इति ॥ १ ॥ इति **वाक्यार्थबोधः** समाप्तम् ॥ श्रीराम राम.

२४०९.

१२. भूर्ज०. **वेदान्तसारः.**

VEDÂNTASÂRA.

Beginning: नमः शिवाय ॥ श्रीगुरवे शिवायों नमः ॥

यदज्ञानप्रभावेण दृश्यते सकलं जगत् ॥ यज्ज्ञानाच्छ्रेय आप्नोति तस्मै ज्ञानात्मने नमः ॥

साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय महावाक्यार्थं विचारयामः ॥ तत्त्वमसि । अहं ब्रह्मास्मि । अयमात्मा ब्रह्म । एष त आत्मान्तर्याम्यमृतः । स यश्चायं पुरुषे । यश्चायमादित्ये स एकस्स एवं वित् । प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म इत्येवमादिवाक्यानसकृच्छ्रुत्वापि शक्यार्थज्ञानं । नोपपद्यते । पुरुषस्य । तत्त्वंपदपदार्थपरिज्ञानाभावादिति । यतः परिशोधनपूर्वकं वाक्यार्थं चिन्तयेत् ।

End: व्यतिरेकपदार्थो ननु मुक्तिर्भवतीत्यात्मनो व्यतिरिक्तं न किञ्चित्संभवति यद्रूपं तत्तस्य स्थूलं यद्रूपं तत्तस्य सूक्ष्मं तत्तस्मान्मुक्तिरित्युक्तमेवेति विज्ञायते ॥ इति **वेदान्तसारस्समाप्तः** ॥

२४२२.

२००१. **शंकरसर्वस्वम्** । वेदान्तवागीशभट्टाचार्यः.

S'AṀKARASARVASVA, by VEDÂNTAVÂGÎS'A BHAṬṬÂCHÂRYA.

Beginning: ---शाय नमः ॥ ॥

श्रीमद्भैरवसाहाय्यं समवाप्य करोम्यहं ॥ ग्रंथं **शंकरसर्वस्वं** विशुद्धात्मप्रकाशकं ॥ १ ॥
अत्मा ज्ञानं पदार्थौ द्वौ मुख्यावूचुर्महर्षयः ॥ अन्यानर्थांश्च तद्भिन्नानोपाधिनिबंधानान् ॥ २ ॥
प्राहुः सत्वं त्रिधा भिन्नमद्वयज्ञाः पदार्थगं । विशुद्धात्मातिरिक्तं यत् ज्ञानबाध्यं द्वयं च तत् ॥ ३ ॥

End: ग्रंथं **वेदांतवागीशभट्टाचार्यो**ऽकरोत्सुधीः ॥ एतं **शंकरसर्वस्वं** व्यासकेशवभाषितं ॥ ११८ ॥

इति **श्रीमद्वेदांतवागीशभट्टाचार्यकृतः शंकरसर्वस्व**नामा वेदांतग्रंथः समाप्तः ॥ श्रीरस्तु ॥ शुभं भूयात् ॥ ॥ ७ ॥ ७ ॥

२४५२.

१९८८. **सिद्धान्तामृतम्** । वेङ्कटनाथः.

SIDDHÂNTÂMṚITA, by VEÑKAṬANÂTHA.

Beginning: ॥ श्रीगणेशाय नमः ॥

वाणी यस्य मुखोद्गता मुररिपोः पादाच्युतेवापगा पूर्वाचार्यगिरीनुपेत्य बहुधा भिन्नाप्यभिन्नार्थतः ॥

सत्यज्ञानसुखाब्धिपर्यवसिता संतापहृच्चिंतिता ब्रह्माद्वैतवदावदाय भगवत्पादाय तस्मै नमः ॥ १ ॥
राशेरशेषविद्यानां रामब्रह्मार्यतेगुरोः ॥ अद्वैतानंदमाध्वीकमंघ्रिपद्मं वतंसये ॥ २ ॥
सर्ववेदांतसिद्धांतसंक्षेपः सुखबुद्धये ॥ सिद्धांतामृतनामायं श्रीमान् ग्रंथो विरच्यते ॥ ३ ॥

End: इति श्रीमत्परमहंसपरिव्राजकाचार्यसार्वभौमश्रीमदद्वैतविद्याप्रतिष्ठापनाभिनवशंकराचार्यसर्वतंत्रस्वतंत्रश्रीमत्रामब्रह्मानंदतीर्थगुरुचरणपरिचरणमहिमसंपन्नसंपत्सारस्वतः स्वतः प्रवर्धमाना श्रीमत्त्रिपुरारिकुलजलधिकौस्तुभश्रीमद्व्यंकटाध्वरिवरसूनोर्व्यंकटनाथस्य कृतौ सिद्धांतामृते द्वितियः परिछेदः ॥ २ ॥

Then follow seven verses in praise of the spiritual benefits offered by this work. The MS. was transcribed by one *Mahâdeva S'ukla.*

२५२६.

१६२८. आख्यातविवेकः । कृष्णभट्टः.

ÂKHYÂTAVIVEKA, by KṚISHṆABHAṬṬA.

Beginning: ॐ श्रीगणेशाय नमः आख्यातस्याश्रयोर्थः संख्यावर्त्तमानादिरूपकालश्च तत्र समानपदोपात्तत्वरूपप्रत्यासत्या संख्याश्रयेन्वेति वर्तमानादिकन्तु धात्वर्थविशेष्ये व्यापारे न तु फले अत एव फलसत्वे व्यापारविगमे पचतीति न प्रयोगः अपि तु अपाक्षीदित्येव तत्रापि फलाश्रयव्यापाराश्रयबोधे यकृशवादिसमभिव्याहारः कारणं न तु पच्यते ओदनः स्वयमेवेत्यादौ यवसमभिव्याहारसत्वेपि कर्मबोधाभावेन व्यभिचारः इति चेन्न.

End: इति श्रीमन्मौलितिलकायमानगोवर्धनभट्टाचार्यात्मजरघुनाथभटसुतश्रीकृष्णभट्टविरचित आख्यातविवेकः समाप्तिमगमत् श्री शुभमस्तु.

२६५१.

१३९१. तत्त्वचिन्तामणिदीधितिटीका दीधितिप्रवेशः । विश्वेश्वरः.

DÎDHITIPRAVES'A, a commentary on RAGHUNÂTHA'S TATTVACHINTÂMAṆIDÎDHITI, by VIS'VES'VARA.

Beginning: ॐ श्रीगणेशाय नमः

ॐ नमः स्वप्रकाशाय सत्सिद्धसुखसिद्धये विशुद्धाय विवर्त्तानां निदानाय चिदात्मने १
जयति यथाजातानां वाग्जातपारिजातश्रीः श्रीलक्ष्मीधरविबुधावतंसचरणाब्जरेणुकरः २
अनतिश्रमयोगिनोपि भावं गहनं मथगतं बुभुत्समानाः
हृदि बिभ्रतु दीधितिप्रवेशं भुवि विश्वेश्वरनिर्मितं रसज्ञाः ३
विवेचिता यदपि रहस्यपारगैर्गिरो मणेरुपरि शिरोमणेरमूः
तथापि मे विषदतया विवृण्वतो गतार्थतागणनमसंगतं गिराम् ४

विघ्ननिवृत्तये कृतं मंगलं शिष्यशिक्षायै निवध्नाति ॐमिति.

End: तेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणहेतुसमानाधिकरणतत्तदभावीयप्रतियोगितासामान्यशून्यवृत्ति यद्यत् तत्तत्प्रतियोगिकभेदकूटवत्त्वं अवछेदकलक्षणं फलति

तत्तन्महीमहिततत्तदसीमधीमन्मूर्द्धन्यताकलतसंगतध्वन्यताकः
लक्ष्मीधरो यमुदसूत मुदं प्रसूतां विश्वेश्वरस्य कृतिरस्य चिरस्य लोके.

२७०८.

१५३७. तत्त्वचिन्तामणिमयूखः । शंकरः.

TATTVACHINTÂMAṆIMAYÛKHA, by S'AṀKARA.

An exposition of the *S'abdakhaṇḍa* of the *Tattvachintâmaṇi.*

Beginning: श्रीशारदायै नमः । श्रीशेषविष्णुगुरुभ्यो नमः ।
तातादधीत्याखिलतंत्रसारं महार्णवादीन्बहुशो निरूप्य ।
श्रीशंकरेणार्चितशंकरेण वितन्यते शब्दमणेर्मयूखः ।

अथ शब्देति । अथेत्यानंतर्ये । तथा च महाविषयता सूचीकटाहन्यायेन प्रमाणांतरेभ्यो ऽपकर्षः सूचितः सूत्रकारादभिप्रेत इति निरूपितानि प्रत्यक्षादीनि अथावसरप्राप्तः शब्दो निरूप्यत इत्यर्थः ।

End: पित्रा यद्भवनाथेन व्याहृतं तदिहाखिलं । व्याख्यानगुणदोषाभ्यां स बोधो मत्पितुर्न मे ।
चिंतामणाविह गंभीरतरेंबुराशावाशापि कस्य तरणाय गतत्रपस्य ।
तीर्णो मया परमयं भवनाथसूक्तिपोताधिरोहणतिरस्कृतसाध्वसेन ॥ ॥
न्यायार्णवसहाकृष्टो मणिरन्यस्य दुर्लभः । वयं तु पोतवणिजो निजं मन्यामहे मणिं

इति महामहोपाध्यायसन्मिश्रश्रीभवानाथात्मजेन श्रीशंकरेण कृतोयं चिंतामणिमयुखः समाप्तः ॥ ॥ हयग्रीवाय नमः ॥

२७१७.

१४२६. तत्त्वचिन्तामण्यालोकटीका सारमञ्जरी । भवानन्दसिद्धान्तवागीशः.

SÂRAMAÑJARÎ, a commentary on JAYADEVAMIS'RA'S TATTVACHINTÂMAṆYÂLOKA, by BHAVÂNANDA SIDDHÂNTAVÂGÎS'A.

This MS. is evidently identical with the one described by Hall, p. 39, then in possession of P. Vaidyanâtha Pâṭhaka.

Beginning: ॥ श्रीगणपतये नमः ॥ वक्राणीति । कुचयोः प्रतिविंवितानि वक्राणि दृष्ट्रेत्यन्वयः । प्रतिहतचक्षुर्माद्यत्वमत्र प्रतिविंवनं । प्रतिघात एव च कुचयोरिति संबंधित्वेनान्वेति । पदार्थैकदेशेप्याकांक्षावैचित्र्यात् । दृष्ट्रेत्यत्रैव वा तदन्वयः । शुक्तौ रजतत्वं पश्यतीतिवत् ।

End: श्रीभवानन्दसिद्धांतवागीशेन विनिर्म्मिता । अलं करोतु कंसारेश्वरणौ सारमंजरी ।
मयि नव्यधि कृतिं मंदीयां यां विवुधा नैव सुधावमानयतु ।

न हि जातु विहातुमुत्सहंते प्रतिपच्चंद्रमसो रुचिं चकोराः ॥ ॥

इति श्रीभवानन्दसिद्धांतवागीशभट्टाचार्यविनिर्मिता प्रत्यक्षालोकसारमंजरी संपूर्णाः ॥ ॥ शुभ भवतु ॥ ॥ ९०००.

२७२०.

१६३३. तर्ककुतूहलम् । विश्वेश्वरः.

TARKAKUTÛHALA, by VIS'VES'VARA.

Beginning: ॥ श्रीगणेशाय नमः ॥

फलमाकलयत्यपव्यलीकं पिषये स्याद्विषमेपि यः प्रयासः
पणितश्वरणारविंदरेणुत्रसरेणुर्यदि सर्वमेगलायाः ॥ १ ॥
लोकस्वांतघनांधकारपटलप्रध्वंसदीपांकुरा वियाकल्पलताप्रतामजनने वीजं निजामगिनां
मध्ये मौलिनमासतां सुविमला मालायमानाश्चिरं श्रीलक्ष्मीधरविद्वदंघ्रिनलिनोदीताः परागाणवः ॥ २ ॥
अथ प्रतिपश्चितामपि निवेशभूलान्बहूनपोहितुमुपन्नानमलवस्तुसत्वस्थले
तिरोहितपुरोहितस्थितिं करोति विश्वेश्वरोक्तिभिरकर्कशं किमपि तर्ककौस्तुहलं ॥ ३ ॥

End: यत्तु तत्वमसीति वाक्योपदेशादेव ब्रह्मसाक्षात्कार इति वेदांतिनः तत्र नक्ष्यामः
वेदाविरुद्धयुक्तीनामर्के तर्ककूतूहले वाचारंभेत्यादितत्वमस्यंतश्रुतिरूपणं
बृहदारण्यके समामनंति तद्धेदतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियताऽसौ नामायमिदमप्यैतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिदं रूप इति स एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानो हि ॥ ७ ॥····.

२७२१.

६३०. तर्ककुतूहलम् । विश्वेश्वरसूरिः.

TARKAKUTÛHALA (?), by VIS'VES'VARA SÛRI.

The name of this work which is a novel and should accordingly have been entered in Class xii., is very doubtful. It is written on the back of the first leaf by a different hand; the letters त॰ कु॰ are found on the margin of the leaves. The MS. is written in a modern Kashmirian hand; it shows no signs of having been copied from a S'âradâ original.

Beginning: ॐ श्रीगणेशाय नमः

आंदोलदिंदिंदिरतुंदिलानां कुंदस्रजां सुंदरतां जयंतः
अमंदमानंदमिहेंदिरायास्स्वछंदलोला ददतां दृगंताः
आदौ भिधानं कुतुकोपधाननिबंधनं नेति बुधैर्न हेयं
प्रकाशहीनादपि रत्नखंडात्कुतूहलं गोः पदसंभवात्स्यात्
दिव्याववोधैरपि दुर्गमेस्मिन्नास्मद्विधाना स्खलनं निकर्षः

नानौचिती नागभुजोप्यगम्यं यद्दुःशकं स्यान्मशकेन गंतुं
अस्मिन्पुनर्वस्तुनि वस्कृतो नो समंजसाः श्रौतशिरोगिरोपि
प्रत्यंचमर्थं मनसः प्रपंचो वाचां समाचामति कोपि किं वा
स्वीयाववोधावधि तद्विलासावधानमद्यानुमतं बुधानां
इतीममर्थं तु समर्थ्य निज्ञा वाक्सार्थमर्थापयितुं घटंते ५
भवप्रवाहार्जितपुण्यलब्धसदुक्तिमुक्ताफलमालिकानाम्
रूपांतरापन्नतनिजमुंडाकेशिभावाय पाराशर्याय नमो मुनये कुनयेत हीनाय ७
नेत्रीकृताग्निमित्रा कुमारसूर्जनितमेघरघुभावा कवितामिषेण काली वश गंता कालिदासस्य ८
भवभूतेर्वाच्छन्ति व्यभिचारमुचो गिरां गुंफाः विधिनापि दुर्निवारं तेषां खलु भावभूतत्वं ९
यः शब्दराशिशेवधिरवभाति सुवंशलक्षणान्वयतः गुणमात्रग्राह्यरसः स सुबंधुर्वेधुरनिबंधः १०
परिशीलितैव सरसं कविराजैर्बहुभिरत्र वाग्देवी बाणेन तु वैजात्यात्कथयति नामैव वाणीति ११
जयति यथाजातानी वाग्जातसुजातपरिजातश्रीः श्रीलक्ष्मीधरविबुधावतंसचरणाब्जरेणुकणः १२
नैसर्गिकी खलस्य ब्रह्मण इव दुर्गमात्मनो माया जीवहृदस्य पुनः साऽनुश्छेत्तथा च तत्त्वधिया १३
आरोपितत्वनियमं सत्तायाः पिशुनससदि विलोक्य प्रतिपन्नमौपनिषदैर्नूनं भावांतरेपि तथा १४
तादात्म्येन जगत्स्वपि जनकास्तेषामुपादेयाः सत्तास्फूर्त्येकपदं ब्रह्मानंदात्मका विबुधा १५
मिथ्याभावविहीना वहंत्यनिर्वाच्यतामनिशं अज्ञानानुपधेया महाकवीनां जयति सृष्टिः १६
न निरूपयितुं शक्यः केवलमध्याससंबद्धः शुद्धं सचैतन्यं खलप्रपंचो न मलिनयति १७
विषमदृशो विबुधानां यातु चिदिष्टावनुपयुक्तं कुकवय उग्रनिसर्गा दुर्वर्णमुदीरयंत्यपि रुदित्वा १८
विशकलितैः परकीयैः पदार्थजातैः स्वकाव्यविन्यस्तैः याचितकमंडनैरिव न भवति शोभा विजातीया १९
खलहृदयदर्पणतेल मालिन्यं जायते विजातीयां गुणसंक्रमणविरुद्धं दोषोद्ग्राहानुकूलं च २०
काव्यमयी विबुधानामंतःकरणस्य वृत्तिरमलेयं अर्थश्चैतन्यमपि प्रतिफलति यथार्थतो यत्र २१

अस्ति भगवतोऽनेककरज्वलननिर्दग्धमहांधकारकांतारस्य त्रिभुवनभुवनांतरैकप्रदीपस्य समस्तचेतनचैतन्यागमनिदानस्य श्रौतस्मार्ताशेषक्रियाविशेषप्रवृत्तिजनकस्य भास्वतोभ्युदयभूमिः भागीरथीप्रवाहमयबालव्यजनवीज्यमाना राकारजनिकरमंडलसितातपत्रचिह्निता सर्वासां दिशामाधिपत्यमिवानुभवंती ईश्वरीव स्वाभिमुखानां सर्वकर्मफलप्रदायिनी तपस्विनीव स्थितैकपदा हरिमूर्तिरिव वाजिमुखान्विता सेनेव वर्द्धमानसूर्पकर्णापेता कैलासभूमिरिव वृषभध्वजाश्रिता लंकेव पुरुषापूर्णोत्कटा पलाशकुसुमसंपदिव सलौहित्या हल्लीलेव किराताश्रिता रात्रिरिव प्राग्ज्योतिषोल्लसिता मुमुक्षुरिवाश्रितकाशिः नर्मदेव मेकलाश्रिता युवतिदृगिव सांजना नृसिंहतनुरिव व्याघ्रमुखाधिगता सीतेव मिथिलोत्पत्तिभूः अमरावतीव पुरंदराधिष्ठिता प्राची दिक्.

End: अपि च परस्परसंबंधिनि कपोलफलके प्रतिफलकैतवेन दर्पणोदरविशदतया प्रविशंतौ ततोपरामविरहेच्छया कंटकमयैः शंकुभिः कीलिताविव विभावयां बभूवाते आभरणरत्नांतरप्रतिबिंबितौ च तन्मयूखगुणवागुरानिवद्धाविवादर्शिषाताम् रसोद्रेकप्रादुर्भवद्बाष्पपूषज्जालजटिलपरस्परलोचनसंयोगादिवावयवजातमार्द्रीभवद्भिभरां बभूवतुः ॥ एतावदेव रचितं श्रीविश्वेश्वरसूरिभिः ॥

२७४५.

१५०८. **तर्कसंग्रहदीपिका**विवरणं **प्रभा** । हनुमान्.

PRABHÂ, a commentary on Annambhaṭṭa's TARKASAMGRAHADÎPIKÂ, by HANUMAT.

Beginning: ॥ श्रीगणेशाय नमः

लक्ष्मीशगौरीशविधींद्रवंदितं जगन्निदानं जगतामभीष्टदं
साखतं शैशवमंगणे वपुस्तद्रिंगमाणं दिशतु प्रियं शिवं १
व्यासार्यं पितरं सुधाकरमिव **श्रीकाश्यपा**त्मान्वयक्षीराब्धौ गुरुवीरराघवपदं विद्वत्कुलाखंडलं
दुर्वादिद्विरदेंद्रकुंभपटलीविच्छेदकंठीरवं स्वातप्रांतगतांधकरदिनपं वंदारुरत्नं स्तुमः २
अहं च **हनुमान्** ज्ञात्वा तंत्रं सर्वं विशेषतः विवृणोमि कृतेऽन्येषां **तर्कसंग्रहदीपिकां** ३

End: मम मानसनीरजालयं दितिजेशाद्भुतं मुडमं०
अमरावलिचिंतितप्रभं प्रियतां किंचिदनेन तद्द्वयः १
पूर्वाचार्यनिबंधासागरमहागंभीरगर्भग्रहस्थानस्थान खलु युक्तिरत्ननिकरान्संगृह्य बुध्या मया
निर्दोषैकक्लान्विभाव्य रचितो ग्रंथः कलादायकस्सर्वेषां विदुषां तनोतु हि मुदं सोयं निबंधो मम २
नारायणस्सर्वनिबंधभावं वेता च मत्प्रीतियुतोस्त्वनेन
बुधेद्रवृंदैककृतप्रणामा लक्ष्मीकरद्वंद्वकृतात्मभावः ३

इति श्रीविद्वद्द्विहशिरा[रो]मणि**श्रीमद्व्यासाचाय[र्य]**सुतेन कुरुते पड्[गोडो]पनामक**हनुम**त्संख्यावता विरचितायां **तर्कसंग्रहदीपिकाप्रभायां** ध[च]रमः परिछेदः समाप्तः ॥ ॥ छ ॥ ॥ ॥

The readings shown in brackets have been restored with reference to the colophons of the other Parichchhedas.

२७७७.

१२५६. **नवीननिर्माणम्** (?) । रघुदेवशर्मा.

NAVÎNANIRMÂṆA (?), by RAGHUDEVAS'ARMAN.

The name of this fragmentary treatise which appears to be a brief exposition of the *anumâna* chapter of some Nyâya work, is not certain. The letters shown on the margin of the leaves are **नि० प्र० श०**. The title *Navînanirmâṇa* is given to a work of Raghudeva also in Prof. Kielhorn's Catalogue of Sanskrit MSS. in the Deccan, p. 150.

Beginning: श्रीगणेशाय नमः श्रीसूर्यगणेशमहालक्ष्मीशिवविष्णुभ्यो नमः । श्रीसरस्वत्यै नमः ।
भोक्तुं नवनवनीतं विनीतमिव यांतमंकमंबायाः ।
वेदाविदितगुणांतं नंदसुतं तं नमस्यामः १
अयत्नतः पंडितमंडलीनां गूढार्थतत्वप्रतिपत्तिहेतोः ।

संक्षेपतः श्रीरघुदेवशर्मा नवीननिर्माणमिदं तनोति २

प्रत्यक्षप्रमाणोपजीवकत्वात्प्रत्यक्षानंतरमनुमानं निरूप्यते । प्रत्यक्षप्रमित्युपजीवकत्वात्प्रत्यक्षप्रमित्यनंतरं अनुमितिर्निरूप्यते ।

Fol. 47. The MS. breaks off with:

यदि च लक्षणे साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यत्र तार्ण–तार्णवह्न्यु–याभावमादायाव्याप्तिरित्युपदर्शितोभयाभावविशिष्टसाध्यनिष्टप्रतियोगिताकाभाव ····.

२७९६.

१५६६. न्यायतिलकम् । वराहाचार्यः.

NYÂYATILAKA, by VARÂHÂCHÂRYA.

Beginning: ॐ श्रीगणेशाय नमः

नत्वा तुरंगवदनं वराहार्य्यः कृपानिधिः करोति न्यायतिलकं बालव्युत्पत्तिसिद्धये

गुणवद्रव्यं द्रव्यकर्म्मान्यसामान्यवान्गुणः कर्म्मत्वजातिमत्कर्म्म नित्यमनेकसमवेतं सामान्यं स्वतो व्यावृत्ता विशेषाः नित्यसंबंधः समवायः एते भावाः अन्येऽभावाः उभये पदार्थाः सहकारिसमवधानं शक्ति.

End: अत्रिगोत्रसमुत्थे वराहार्येण धीमता रचितं न्यायतिलकं बालवक्रेषु शोभितं ॥

इति श्रीमद्वाराहाचार्यरचनं न्यायतिलकं संपूर्णम् ॥ ॥

२८४०.

१२३०. भाषापरिच्छेदटीका न्यायचन्द्रिका । नारायणतीर्थः.

NYÂYACHANDRIKÂ, a commentary on VIS'VANÂTHA PAÑCHÂNANA'S BHÂSHÂPARICHCHHEDA, by NÂRÂYAṆATÎRTHA.

The first leaf is lost. The commentary begins with an exposition of verse 2 of the text:

Fol. 2: साक्षात्परंपरया वा पदार्थज्ञानस्य परमपुमर्थहेतुत्वादुद्देशतो लक्षणतश्च पदार्थानाह ॥ द्रव्यं गुणा इति ॥ उद्देशोयं अत्र पदार्थाः सप्त के ते द्रव्यादय इत्यर्थः । पदार्थत्वमखण्डोपाधिः पदस्यार्थाः पदार्था इति योगादरेण पदाभिधेयत्वं च तच्च पदशक्यत्वं इदमेव सामान्यलक्षणमखण्डधर्मेणोपस्थितानां तेषां तेन लक्षणमकृत्वा कथं विभाग इति न न्यूनतापि.

End: इति श्रीनारायणतीर्थकृता भाषापरिछेदज्ञापिका न्यायचंद्रिका समाप्ता ॥ १ ॥ श्री उमोमारमणौ जयतः.

२८५१.

१६३४. न्यायसिद्धान्तमुक्तावलीप्रकाशतरंगिणी । रामरुद्रभट्टाचार्यः.

TARAṄGIṆÎ, a commentary on MAHÂDEVA DINAKARA'S NYÂYASIDDHÂNTAMUKTÂVALÎPRAKÂS'A, by RÂMARUDRA BHAṬṬÂCHÂRYA.

The MS. contains also the text of the ground work, the *Nyâyasiddhântamuktâvalî* of *Vis'vanâtha,* with his *Bhâshâparichcheda.*

Beginning: ॐ श्रीगणेशाय नमः

ॐ तातस्य तर्कसरसीरुहकाननेषु **रामेश्वरस्य** तरणेश्वरणे प्रणम्य
श्रीरामरुद्रसुकृती कृतिनां हिताय लीलावशात्किमपि कौतुकमातनोति १
जाने कदाचिदपि नैव शिवस्वरूपात्तातात्पुनः परमदैवतमन्यदत्र
तस्मादिमां कृतिमिहायतरङ्गिणीत्वात्पाद्याय तच्चरणयोः परिकल्पयामि २
तरङ्गिणीयं सफलोक्तिवाचो मुदे बुधानां तरसा विदेव
भूयात्सदालं निखिलाण्डभाण्डकीर्तिप्रभाजातविभूतितानाम् ३

सिद्धांतमुक्तावलीव्याख्याचिकीर्षुर्महादेवः प्रारिप्सितग्रन्थविघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति लक्ष्मीति.

End: इति श्रीम**द्दिनकरभट्ट**विरचिता **न्यायसिद्धान्तमुक्तावलीदीपिका** समाप्ता ॥ अथ निरूपक्रमः.

Then follows a brief *Anukramaṇikâ* of the whole work, with a note giving the date of the transcript as *saṁvat* 1943 *mâga s'udi 11.*

२९३८.

४१३०. कर्ममञ्जरी । द्विवेदवंशीधरः.

KARMAMAÑJARÎ, by DVIVEDA VAṀS'ÎDHARA.

A recent copy from a MS. in the Library of this Highness the Mahârâja of Alwar.

Beginning: श्रीगणेशाय नमः ॥

नत्वा गणपतिं रामं सिद्धिरूपां महेश्वरीम् ॥ लिख्यते बालबोधार्थं **कर्म्मषोडशमंजरी** ॥

शौनकः ॥

गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा ॥ जातकर्म्म तथा नाम गृहानिष्क्रमणं ततः ॥ २ ॥
तथान्नप्राशनं चौलं व्रतबंधस्तथैव च ॥ गोदानं च ततः प्रोक्तं वेदव्रतमहाव्रते ॥ ३ ॥
समावर्तनकं चैव विवाहो वास्तुलक्षणम् ॥ अग्न्याधानमिति प्रोक्तं कर्म्म षोडशसंज्ञकम् ॥ ४ ॥

End: इति देवप्रतिष्ठा ॥

श्री**गोविंद**विलाससागररसासेकस्फुरत्पल्लवा शश्वत्**केशव**मानसोज्ज्वलवलत्संजातभव्याशया ॥
चंचद्भूसुरमानसालिचतुरैरास्वाद्यमानारसा ॥ राशीनामुदया मुदे हि सुधियां भूयादियं **मंजरी** ॥

इति श्री**द्विवेदवंशीधर**कृतौ **कर्म्ममंजरी**निबंधे षोडशं कर्म समाप्तम् ॥ ह॰ **तनसुख**

अल्वर**नरेश**पुस्तकशालाध्यक्षो हि **रामगोपालः**
ज्योतिर्विदुपाख्योसौ पुस्तकमेतत् सुशोधितवान् १

२९३९.

४००२. कल्पवल्लीपद्धतिटीका आनन्दकन्दः । देवकीनन्दनः.

ÂNANDAKANDA, a commentary on VIṬṬHALA's KALPAVALLÎPADDHATI, by DEVAKÎNANDANA.

Beginning: ॐ श्रीगणेशाय नमः ॐ विघ्नहर्त्रे नमः श्रीगुरुभ्यो नमः

ॐ वाणी यच्छतु शारदेंदुसकलस्वच्छाकृतिर्नः शिवं संसारार्णवतारिणी भजनकृज्जाड्यौघसंहारिणी
सत्पंकेरुहकोमला हि विमला वंद्याद्द्वितीया सतां तंत्रज्ञाननिदानदाथ च तथा पादद्वयी सद्गुरोः १

अनेकार्थवाची

नीलेंदीवरलोचनोज्वलतनुः कारुण्यपाथोनिधिर्भक्ताभीष्टवरप्रदानपटुताज्ञानावधिर्नोपि च
उद्यद्वसहस्रकांति[:]विलसद्योगींद्रराजन्महामूर्तिः स्वीकृतसन्मुनिकृतिरथो मेषो गिरो यच्छतु २

अर्थत्रयवाची

समीचीनो दीनोत्तमजनविलीनोत्तमरतं समासीनोहीनोदितपदवुरीणोत्र च जनः
विहीनोदासीनो रसिकजनपीनो हिमगिरेः समासन्नासीनो मदनसदनं कूर्म्मकुधरः ३
इहासीद्दिस्वासी सुनिगमविदां दुर्मतिभिदां शिवायाः सेवायाः परमविधिविज्ञानसुनिधिः
विधिज्ञानां चूडामणिसरणिमाहेयतरणिप्रफुलत्पादाब्जः प्रवरतरलक्ष्मीसुरबुधः ४
ऽशेषाशेषार्थवेत्ता कलुषितमनसां चित्तभेत्ता रिपूणां मध्येतारो यदीयंघ्रिसरसिरुह — मर्च्यो वलाना महांतः
यद्गीर्ज्योतिर्विवादे सकलविधिविदां निर्विवादो हि वेदो जीवानंदः सुतोस्याजनि विमलधियां सर्वदानंदमूर्तिः ५
तेषां पादांभोजलांघ्रिप्रसादो नत्वैवैतान् देवकीमातरं च
सत्पद्धत्याष्टिप्पणं कल्पवल्याः कुर्वे होराकोविदानंदकंदं ६

अथ पूर्वश्लोकद्वयार्थः संक्षेपेण मयोच्यते वाणीमिति.

End: Text. शकेष्टवेदेषुमहीप्रमाणे सहोदशम्यां गुरुसंयुतायां
कृष्णात्रिगोत्रे सुतरां पवित्रे पवित्रकर्माजनि वृवशर्मा
तत्सूनुना विट्ठलदीक्षितेन चक्रे लघुः पद्धतिकल्पवल्ली

The Commentary follows up the explanation of the above with the following verses:

निहत्य यस्य त्रिपुरासुरं हरोंतिके पिनाकीश इति प्रसिद्धः
धनाधिनाथस्य दिशां विभूषयन् विराजते भक्तजनेष्टदाता १
याम्यां दिशं यस्य समाश्रितोतें ख्यातो गिरीशो गणनाथनाम्ना
छंदोविदो यं विधितोभिषिच्य नानाप्रयोगान् रचयंति सिद्धान् २
यस्य प्रतीच्यां दिशि नातिदूरे संपूजितः केन च सोमयागे
अद्यापि लोकस्य मनोभिलाषं यछन् प्रसिद्धः खलु सोमनाथः ३
निहत्य मल्लाभिधमुग्रदैन्यं विभूषयंती शतमन्युकाष्टां
अत्यंतिके यस्य च मल्लिकेति नाम्ना प्रसिद्धा गृहणी हरस्य ४

ग्रामे तस्मिन्मल्लिकाख्यां दधाने कूर्माख्याद्रेरुत्तरे देशभागे
संस्थे नानाशास्त्रचर्चाप्रवीण आसीद्दैवज्ञो हि लक्ष्मीधराख्यः ५
ज्योतिःशास्त्रे सर्वगर्वापहारी ख्यातः पृथ्व्यां सर्वसिद्धांतवेत्ता
शेषोक्तीनां चापि सारस्य वेत्ता जीवानंदाख्योस्य पुत्रो बभूव ६
पुत्रस्तेषां गोयमाद्रींदुशाके तत्पादाब्जध्यानसंप्राप्तबोधः
ग्रंथं होराकोविदानंदकंदं चक्रे पूर्णं देवकीनंदनाख्यः ॥ ७ ॥

इति श्रीदैवज्ञान्वयालंकारश्रीजीवानंददैवज्ञात्मजदेवकीनंदनदैवज्ञविरचितायां कल्पवल्लीटीकाया आनंदकंदाभिधायां अंतर्दशासाधनं समाप्तम् समाप्तश्चायं ग्रंथः श्लोकसंख्या ४१०० श्रीशंभवे नमः ॥ ॥

२९६३.

८६३. ग्रहणादर्शटीका प्रबोधिनी । बुधसिंहशर्मा.

GRAHAṆÂDARS'A, by BUDHASIṀHAS'ARMAN, with the author's commentary PRABODHINÎ.

Beginning: Text. हेरंबं नत्वादौ भास्करमुख्यान्गुरूंश्च निजपूज्यान्
ग्रंथरचनमतिलब्ध्यै ग्रहणं ज्ञातुं मयोद्यमः क्रियते ॥ १ ॥

Comm. ॥ श्रीगणेशाय नमः ॥
ग्रहणादर्शाख्यस्य क्रियते बुधसिंहशर्मणा वृत्तिः
अर्थोदाहरणाढ्या नत्वेभास्यांबिकेशसूर्यगुरून् १

अथ तावत् शिष्यशिक्षायै नमनरूपं मंगलं निबध्नन्ग्रंथकारो गणेशमर्कादिग्रहान् गुरूंश्च भास्कराचार्याद्यान्वार्याभेदगीतिसंज्ञकवृत्तेन प्रणमति ।

End: Text. श्रीलाललब्धविद्योभूच्छ्रीजसवंतरायदैवज्ञः मुलताननामनगरे तस्य तनूजो द्विजोरुसखः १७
बुधसिंहो बुधवारे जाग्रद्दीपावलीचमत्कारे ग्रहणादर्शं दर्शेपूरि धराहस्तहस्तिकुमितेब्दे १८.

Comm. मुलताननामनगरे कांगांगीकृत्य शिष्यवर्गार्थम् । ग्रहणादर्शाख्यस्य प्रशोधनी शीघ्रबोधनी नृणां १
गुणनभजनविद्विदुषां वृत्ती रचितोचितोरुमतिभाजां गोपालजजसवंतजतनुमतिबुधसिंहशर्मणाल्पगिरा २
नगगजरसभू १६८७ प्रमिते शाके मासे मधौ सिते पक्षे मकरध्वजस्य तिथ्यां प्रातः समये बृहस्पतेर्वारे ३

त्रिभिरन्वयः ॥ इति श्रीबुधसिंहशर्मणा विरचितायां स्वकृतग्रहणादर्शग्रंथटीकायां प्रबोधन्यां परिलेखाभासः पंचमः सं॰ १८५९ चै॰ व॰ ३ शुक्रे शुभम् ॥

संवद्गोसरनागचंद्रमितके मासे माधौ चासिते पक्षे शुक्रदिनेपराह्नसमये शंभो प्रियायास्तिथौ ।
नाभानामपुरे बहुद्विजजने विद्यालसत्कीर्त्तने मूलेन प्रविशोधनीं सह सभाचंद्रोलिखद्गौर्जरः ॥ १ ॥

२९९८.

८२९. जन्मप्रदीपः.

JANMAPRADÎPA.

Beginning: ॐ श्रीगणेशाय नमः

ॐ प्रणिपत्य परं ज्योतिः सर्वज्ञं सर्वगोचरम् ततः प्रशमनं वक्ष्ये जन्मशास्त्रप्रदीपकम् ।
लग्नाधिपतिर्लग्ने नीरोगं दीर्घजीविनं कुरुते । अतिबलमवनिपतिं वा भूलाभसमन्वितं जातम् १
लग्नपतिर्धनभवने धनवंतं विपुलजीविनं स्थूलम् स्थानप्रदानमनिशं सत्कर्मरतं नरं कुरुते २
सहजगतो लग्नपतिः सद्बंधुप्रवरमित्रपरिकलितम् धर्मरतं दातारं शूरं सबलं करो नरम् ३.

End: इति व्ययेशफलम् । इति जन्मप्रदीपः समाप्तः ॥

Then follows on fol. 8 an example for preparing a *janmapattra* on the date of the *garbhâdhâna*, to be calculated for *samvat 90 mârgas'uti* 4, &c.

३००३.

२८८५. जातकपद्धतिः । धर्मेश्वरः.

JÂTAKAPADDHATI, by DHARMES'VARA.

Beginning: ॐ श्रीगणेशाय नमः ॥ ॥

श्रीधरं नीलकंठं च नत्वा गुरुतरं गुरुं तत्प्रसादात्प्रवक्ष्यामि जातके कर्मपद्धतिं १
मध्याह्नसूर्ययोर्मध्ये कालो यः स नताह्वयः अर्धरात्रार्कयोरेवमुन्नताख्यः प्रकीर्तितः
दिनार्धं दिनयातोनं दिने पूर्वनतं मतं यातं दिनदलेनोनंमपरं च नतं दिने
रात्रिशेषं गते वापि दिनार्धेन युतं नतं प्राक् पश्चाच्च नतं त्यक्त्वा त्रिंशतः शेषमुन्नतं ४

इति नतोन्नतसाधनाध्यायः प्रथमः ॥ १.

End: श्रीमन्मालवदेशजो द्विजवरः श्रीदेवदत्तात्मभूः सर्वज्ञो बलभद्र अस्य तनयो रत्नाकरोस्यात्मजः
योभूद्वेदनिधिः प्रभाकर इति श्रीरामचंद्रांगभूर्यस्याद्यापि सुतश्चकार मतिमां धर्मेश्वरः पद्धतिं ३८ ॥

इति धर्मेश्वरविरचिता जातकपद्धतिः समाप्तः ॥

३०४२.

२७८०. ज्योतिर्विदाभरणटीका सुखबोधिका । भावरत्नः.

SUKHABODHIKÂ, a commentary on KÂLIDÂSA'S JYOTIRVIDÂBHARAṆA, by BHÂVARATNA.

Beginning: ॐ श्रीगणेशाय नमः ॥

श्रीमान्पार्श्वजिनोतिशेषकगणं प्राप्तः प्रभुः पूर्णगीर्द्रोकुक्षिप्रपचलत्कुयोगकमवप्रौढिः प्रा[प्र]जानां पुरः

सत्कीर्त्यानकनादपूरितजगत्साकल्य इष्टार्थदो गीर्वाणेश्वरसेवितो विजयते विश्वैकचिंतामणिः १

नत्वा गुरुं गिरमपीभमुखं च खेटान् **श्रीकालिदास**कविशक्रविनिर्मितस्य

ज्योतिर्विदाभरणनामवरागमस्य संतन्यते गुरुकृपं **सुखबोधिके**यम् २

श्रीपत्तने प्रवरपौर्णिमिकाह्वगछे ढंढेरपाठकशुभाश्रयसंश्रितानाम्

श्रीयुक्तपूज्य**महिमाप्रभसूरि**राज्ञां शिष्येण **भावमुनिना** मयका यथाचित् ३

अथ ग्रंथारंभे ग्रंथकृत् **श्रीकालिदासकविशक्रो** वसंततिलकावृते[त्ते]न समुचितेष्टदेवतानमस्काररूपमंगलमाचरन्ननुबंधचतुष्टय-माह रैम्येति.

End: Text. इति **श्रीकविकालिदासो**दिते **ज्योतिर्विदाभरण**नामग्रंथ ग्रंथाध्यायनिरूपणकमं नृप**विक्रम**वीरवर्णनं नाम द्वाविं-शतमोध्यायः समाप्तोयं **ज्योतिर्विदाभरणं** नाम ग्रंथः ॥

Comm. श्रीविक्रमार्कादहिषड्हयोर्वामिते १८६८ गतेऽब्दे खलु---

--तृतीये[थ] तिथौ गभस्तिवारे समाप्ता **सुखबोधिकेयं** १६

इति **श्रीपौर्णिमीयगच्छाधिराजभट्टारकपुरंदरश्रीश्रीश्रीमहिमाप्रभसूरीश्वर**चरणसरोरुहचंचरीकायमानशिष्य**भावरत्न**विरचि-तायां **श्रीकालिदास**कृत**ज्योतिर्विदाभरणस्य सुखबोधिकायां** ग्रंथाध्यायनिरूपणं[ण]क्रम**श्रीविक्रमार्क**नृपवर्णनो नाम द्वाविंश-तितमोध्यायः संपूर्णः ॥

शुभमस्तु सर्वजगतां परहतनिरतां भवंतु भूतगणा दोषा प्रयातु शांतिं सर्वत्र सुखे भवंतु लोकः ॥

शुभं ॥ भद्रं ॥ कल्याणं ॥ आरोग्यं ॥ संवत् १९१० ॥ आषाढ वति प्रदि १। पति ॥ ॥

३०८२.

२९७८. दैवज्ञवल्लभः । धृतिकरः द्विवेदी.

DAIVAJÑAVALLABHA, by DHṚITIKARA DVIVEDIN.

Beginning: ॐ सिद्धिः श्रीगणेशाय नमः

यः सृष्टिस्थितिसंहारकर्त्ता कालस्य रूपभृत् त महेशमहं वंदे राशिरूपस्थितं दिवि १

भास्वंतं प्रणिपत्य वालगणकज्ञानार्थसंसाधनं बुद्धा **गर्ग्गवराह**लल्लविहितं शास्त्रं तथान्यैः कृतम्

विद्वत्पूर्वपद कृती **धृतिकरो** ग्रंथं स्वमाम्चलं संगृह्यातिमहाफलं तमनिशं धीराः कुरुध्वं करे २.

End: अथ **राहुचक्रं**

राहुभादौ सप्त ७ दक्षिणे च करे युगं ४ तथा वामकरे तुर्य ४ शिरत्रय ३ मुखद्वयं २

हृदि पंचस्य ५ नाभिंदु १ गुह्येकैक प्रदापयेत् पादौ च धनहानिं च शोकं च करदक्षिणे

वामे च निधनं प्राप्ते षड्घातं शिरं भवेत् १ मुखं च रिपुनाशाय हृदये सौख्यवित्तदा

नाभौ गुह्यकरं मृत्यु राहुचक्रं वरानने १

इति **राहुचक्रम्** इति **श्रीद्विवेदीधृतिकर**विरचितायां **दैवज्ञवल्लभो** नाम संपूर्ण समाप्तः शुभं भवतुः कल्यणमस्तुः ॥

३१४०.

२८०५. [बालबोधिनी । रणाङ्घ्रिदत्तः].

[BÂLABODHINÎ, by RAṆÂÑGHRIDATTA].

The MS. contains an anonymous compilation of passages taken from different works and arranged under several heads of Jyotish topics. On fol. 23-26 the Bâlabodhinî is given *in toto*.

Beginning: श्रीगणेशाय नमः ॥

प्रभवो विभवः शुक्लः प्रमोदोथ प्रजापतिः ॥ अंगिरा श्रीमुखो भावो युवा धाता तथैव च ॥
ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ॥ चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ॥ नंदनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलंबी विलंबी च विकारी शर्वरी प्लवः ॥ शुभकृच्छोभकृत्क्रोधी विश्वावसुपराभवौ ॥
प्लवंगः किलुकः सौम्यः साधारणविरोधकृत् ॥ परिधावी प्रमादी च आनंदो राक्षसो नलः ॥

इति संवत्सराः । ६ ।

Fol. 30. The MS. breaks off with:

इति संक्रांतिफलं ॥ ॥

ग्रस्तोदितावस्तमितौ नृपधान्यविनाशनौ ॥ सर्वग्रस्ताविनेंदू तौ क्षुध्याध्यग्निभयप्रदौ ॥ ॥
चतुर्दशी या शशिन प्रहीने तस्या विभागे शकुनद्वितीये ॥
दर्शार्धयोस्तश्चतुरंघ्रिनागे किंस्तुघ्नमाद्यप्रतिपद्दले च ॥

३१५४.

८४२. भार्गवमुहूर्तः । [वररुचिः].

BHÂRGAVAMUHÛRTA, by VARARUCHI (?).

Beginning: ॥ श्रीगणेशाय नमः ॥

नमस्कृत्य प्रवक्ष्यामि देवं देवं जनार्दनं । अहं वररुचिर्नाम तत्त्वं भार्गवभाषितं १
याणि वाक्यानि शुक्रेण पृच्छते वृत्रवैरिणे उक्तानि तानि लिख्यंते ग्रंथादाहृत्य भार्गवात् २

अथ महेंद्र सुधर्मया कस्मिन् दिने भार्गवमाहूय पप्रछ भो भार्गव मदीयं वनं वह्निर्दहति इति गिरं देवहूतमुखादाकर्ण्य गुरुमामंत्र्य इदमवोचत्.

End: ज्योत्स्नायां कर्मकृते मृत्युः २८ मैत्र्यां कर्मकृते क्रोधोपशमः २९ संध्यायां तडागादिकार्ये सिद्धिः ३० एवं रात्रावपि ज्ञेयम् इति श्रीमद्वररुचिविरचितायां भार्गवमुहूर्तोऽयं समाप्तम् शुभं भवतुतरां.

३२१९.

२९७०. मुहूर्तालंकारः । गङ्गाधरदैवज्ञः.

MUHÛRTÂLAMKÂRA, by GAÑGÂDHARA DAIVAJÑA.

Beginning: श्रीगणेशाय नमः श्रीकृष्णाय नमः

चंचत्कर्णाघातसंजातवातोद्भूतैर्गंडालेपसिंदूरपूरैः
अभ्रं रक्तं योजयन्नाखिवायं संध्याकालः पातु बावं गणेशः १
धरासुरामर्त्यसमूहवद्धभुजांजलिस्तौतविभातभानुः
स्वर्भानुसंवर्धितशीतभानुर्मतिं मम त्रातु सदैव भानुः २
वीणाप्रवीणा सततं यदीया करद्वयी कातिमयी विभाति
सा शुद्धवेशा कुमुदप्रकाशा भाषा समाऽशापरिपूरणेस्तु ३

End: अथ ग्रंथालंकारः

श्रीमन्माहुरभूधराद्यमककुपभागे करैर्योजनैः ख्यातं पत्तनमाविलं द्विजवरैः सद्वोढनं **बाढनं**
पूर्वं तच्च हरिद्रया युतमदो नाम्नाथ तस्मिन् महद्भारद्वाजकुलाब्जवोधनरविः **श्रीरेणकायः** स्थितः १
मेदिन्यां मेदिनीशप्रकटितमहिमा सागरस्नातकीर्त्तिस्स्वाचारप्राप्तधर्माचरणरतमतिर्मेदिनीदेवमुख्यः
वेदांतातिप्रवीणः श्रुतिपठनहठो दैवविच्चक्रवर्त्ती श्रीमान् **गोविंदशर्मा** स्थित इह धरणीपृष्ठके तस्य सूनुः २
जातास्तस्य युगप्रभाः सुतनया आद्यो हि **नारायणस्**साचा[क्षा]द्वेदततनुस्ततः पृथुयशाः **श्रीवासुदेवो**ऽजनि
श्रीरामस्तदनु स्फुटावनिभुजां मौलिस्थहारांशुभिर्नित्यं संजितपादपद्मयुगलो भूदेवसंघाग्रणीः ३
न्यायक्षीरनिधौ च भाष्यलवणांभोधौ ससांख्यार्णवे मीमांसेक्षुरसार्णवे च निगमश्रीभाष्यदध्यर्णवे
श्रीधर्मौघविवेकसर्पिजलधौ साहित्यमध्वर्णवे स्नातोच्चैर्भुवि संगतस्तदनुजः **श्रीकृष्णनामा** वुधः ४
यस्य श्रीमुखशीतनुकिरणश्रीभारतीभूतिमन्नैवं श्रीतटिसभास्थविवुधांभोजानि दृष्ट्वाचिरात्
म्लानानि प्रभवंति भूपकुमुदप्रीत्यै सदा शीतगु सोय भूपरिमंडले विजयते **श्रीकृष्णजो भैरवः** ५
तस्य स्युस्तनया विदो **गिरीधरस्**त्वाद्योथ **गंगाधरो गोविंदस्**तदनु प्रसिद्धविभवस्तेषां च **गंगाधरः** ॥
श्रीमत्तातपदप्रसादजनितज्ञानोच्चयः पुस्तकं पद्यैर्यद्रचितं समाप्तिमगमत्सच्छ्रीगुरुप्राप्तधीः ६
ज्योतिर्विद्द्विजचक्रमुख्यगणकः **श्रीभैरवो** भूसुरस्तज्जातेन **दिवाकरा**प्तमतिना **गंगाधरेणा**चिरात्
वद्धे नूतनवीर्णपद्यनिचयैर्मौहूर्त्तसंज्ञे वरेलंकारेण युते समाप्तिमगमच्चालंकेर्भूषणं ७
शाके नीरधिपंचपंचकुमिते १५५४ मासे तु माघाह्वये तारानायकनायकेह्नि १५ वसुधासंजातवारेज्यभे
यत्पूणत्वमगान्मयोक्तमखिलं वृत्तादिदोषैर्युतं तत्संतः शुकवाक्यवद्दहिहरं कुर्वेतु नित्यं हृदि ८
मुनिवरकृततंत्रैः संमुहूर्त्ताभिधाना ललितपदसुपूर्णालंकृतिः साधु वध्वा
त्रिपुरहरनगर्यां **भैरव**स्यात्मजेन सुजनवतुरकंठेलंकृतिः सास्तु नित्यं ९ ६९

इति श्रीसकलागमाचार्य**श्रीकृष्ण**दैवज्ञात्मजसकलदैवज्ञचक्रचूडामणि**श्रीभैरव**दैवज्ञात्मजदैवज्ञ**गंगाधर**रचितः सकलसंहितासारमुहूर्त्तालंकारव्यवहारभूषण समाप्तः शुभमस्तु सन १९३० मार्गषीर्ष ८ शुक्र १५ लिप्यकृतं ली०.

३२६८.

४०६५. **लोमशसंहिता.**

LOMAS'ASAṀHITÂ.

Copied recently from a MS. in the Library of His Highness the Mahârâja of Alwar.

Beginning: ॥ श्रीगणेशाय नमः ॥ मुनिरुवाचः ॥

शत्रुक्षेत्रं समक्षेत्रं मित्रक्षेत्रं तथैव च स्वगृहं च तथा स्वोच्चं वलं चैव तथोत्तरम् ॥ १ ॥
सर्वोत्तरवली खेटः स्वायुर्दायं ददाति सः ग्रह एकाधिकार स्यातदा चाद्योदयी ग्रहः ॥ २ ॥
भुक्तांशं तस्य वेदघ्नं वक्री चेदव्धिना हरेत् ॥ तथाष्टमपतेः काय्यं शुक्लकृष्णविभेदतः ॥ ३ ॥

End: इति **श्रीलोमशसंहितायां** षष्टिसाहस्र्यां प्रथमोत्थाने **लोमशसुमतिजन्मासंवादे** सुखदुःखादिकथनं नाम नवमोध्यायः ॥ संवत् १९४१ ॥ मीति फाल्गुनकृ॰ ७ शनि॰ ॥

३२७७.

८३३. **वीरावलिः** । श्रीधरः (?).

VÎRÂVALI, by S'RÎDHARA (?).

Vîrabhadra or Vîrarudra to whom this abstract of the "Precepts of Maṇittha (Manetho)" is attributed in the colophons of the two MSS., seems to have been the patron of *S'rîdhara*. The readings shown in brackets are from the MS. No. 3278.

Beginning: ॐ श्रीगुरवे नमः ॐ श्रीगणेशाय नमः

ॐ चिन्ताचक्रिणि हन्त चक्रिणि भिया कुव्ज[व्जा]सनेव्ज[व्जा]सने नश्यद्धामनि तिग्मधामनि भृ[धृ]ताशंके शशांके पुनः
भ्य[भ्र]श्यच्चेतसि च प्रचेतसि शुचा तान्ते कृतान्ते भृशं व्यग्रोभूत्पङ[ट्ट]कालकु[कू]ङ[ट]कवलीकाराय पायात्स वः
शुद्धा[चूडा]रत्नमरीचिरञ्जितभुवा देवेन जंभद्विषा यस्त्रैलोक्यमणिस्त्रिसन्ध्यममरैस्साकं समं स्तूयते [समभ्यर्च्यते]
मत्तैरावणकुम्भपीठविलुठत् सिन्धूरपूरश्छविस्स श्रेयांसि रविर्ददातु नलिनीनिर्निद्रताकोविदः
शीतरश्मिकलामौलिः गङ्गार्द्रीकृतमस्तकः श्रेयसेस्तु विपत्तापं भक्तानां वारयन्निव
सद्दशासु विदशासु निर्णये मासवासरविचारनिश्चये
श्रीमणिर्थ[त्थ]मतमीक्ष्य तत्त्वतो **भोजदेव** इति संग्रहं व्यधात्
श्रीमाञ्छ्रीधरयी[ई]श्वरार्चनरतो **भोजेश्वराभ्यर्थितः** श्रीमुद्दा[चूडा]मणिम[स]**न्मणिर्थ**[त्थ]कथिताञ्शास्त्रानवेक्ष्य स्वयम्
चक्रे मासफले दशासु विदशास्वन्तर्दशासु क्रमं[मात्] किञ्चित्संग्रहमुत्तमं द्विजवर[रः] श्रीमाधवाभ्यर्चकः ।

End: कांतिं वस्तपनस्तनोतु विशदां कांतिं निशाकामुको धात्रेयो धृतयोस्तु वुद्धिविभवं पुष्णातु तारासुतः
मंत्रं मंत्रिवरः पुलोमतनयाभर्तुर्भृगोर्नंदनः कीर्तिं कुंदतुषारहारधवलां दीर्घं शनिर्जीवितम् ।

इति **श्रीवीररुद्र**[भद्र]कृतस्सारसंग्रहस्समाप्तः ॥ समाप्ता **वीरावली**[लिः] । मासवासरादिनिदर्शने उपादेया ॥

३२८०.

२८६१. वृद्धवसिष्ठसंहिता । लक्ष्मणाचार्यः.

VRIDDHAVASISHṬHASAṀHITÂ, JAGANMOHANASKANDHA, by LAKSHMAṆÂCHÂRYA.

The name of *Lakshmaṇâchârya* is not found in the other two MSS. which contain portions of the same text. The readings in brackets are taken from No. 3281.

Beginning: ॐ श्रीगणेशाय नमः ॥ ॐ वशिष्ठ उवाच
ॐ प्रह्वांभोजसुरासुरेंद्रनिलयस्फूर्यत्किरीटोज्वल-
ज्ज्योत्स्नालीढपदारविंदयुगलस्तत्वत्स्व[स्व]रूपी रविः
ब्रह्मांडोदरसंस्था[स्थि]ताखिलजगच्चो[ध्वां]तस्य सर्व[संध्वं]सनो[नं]
यः कुर्वन्नखिलं जगत्यनुदिनं पर्ये[र्यें]ति कालात्मकः १
ज्योतिःशास्त्रं समग्रं प्रथमपुरुषतः स्वर्णगर्भाद्विदित्वा
पूर्व्वं ब्रह्मांत[ह्मा तथो]पर्यखिलमुनिवरग[निग]णाः[ण]प्रार्थनार्थं चकार
तच्च[च्चे]दं विस्वरूपं [सुप्रसन्नं] मृदुष[प]दनिकरेशु[रैर्गु]ह्यमध्यात्मरूपं
शश्वद्विश्वप्रकाशी[शं] महचरितविदां निर्म्मलं शा[ज्ञा]नचक्षुः २
स्कंधद्वय[यं] वृत[त्त]विचित्रमर्थगंभीरमादावधुना यदुक्तं
तत्साह[त्संहि]तास्कंधमिदं तृतीयं वक्ष्ये जगन्मोहननामधेयं ३

Fol. 2: इति श्रीसारंगसाधुवचनामृतेन भट्टश्रीलक्ष्मणाचार्यविरचिते जगन्मोहने शास्त्रावतारः प्रथमोध्यायः १

Fol. 252: इति श्रीलक्ष्मणाचार्यविरु[र]चितं[ते] जगन्मोहने गृहगोधाशांति ॥ इति श्रीसारंगसाधुवचनामृतेन भट्ट-श्रीलक्ष्मणाचार्यविरचिते जगन्मोहने एकाधिकनवतितमः ध्यायः ॥ समाप्तम् ॥ कार्तिक पूर्णपंचदशा समाप्तम् प्र० २३ संवत् संवत् १९२७ रविवारे जंबूदेशे मध्ये लिखितं पंडितकश्मीरे नाम्ना नारायणे शुभंमस्तु सर्वजगताम् ॥

In Nos. 3281–82 the colophon of Adhyâya i. runs:

इति श्रीवृद्धवसिष्ठब्रह्मऋषिविरचितायां महासंहितायां शास्त्रस्वरूपलक्षणं नाम प्रथमोध्यायः १.

Similar colophons are found in these MSS. at the end of the other Adhyâyas.

३३५१.

१०५८. सूतिकाध्यायः । [वराहमिहिरः].

SÛTIKÂDHYÂYA, ascribed to VARÂHAMIHIRA.

A modern compilation of mixed prose and verse.

Beginning: ॐ श्रीगणेशाय नमः अथ सूतिकाध्यायो लिख्यते
मेषे श्यामांगवदना साधुः काचरलोचनः वाचाटः कर्कशो ह्रस्वः वातश्लेष्मप्रकृतिः २

पूर्वाभिमुखं शिरः गृहं पुरातनं स्त्रियाः पंच वा सप्त मलिनवस्त्र दक्षिणः स्कंदे वा वामजानौ लक्षणं नालवेष्टिताः पूर्वद्वारं प्रथमवर्षे भवेत्पीडा गुणवांस्तस्करश्च पंचमवर्षे अग्निभयं पादांगुष्टे दाहश्च दशमवर्षे रोगभयं सप्तविंशमवर्षे जलभयं द्वात्रिंशवर्षे अपमृत्युभयं.

End: सप्तममासे भवेत्पीडा द्वादशवर्षे अग्नि द्वात्रिंशमवर्षे अपमृत्युभयं यदि शुभग्रहा दृष्टास्तदा पंचाशीतिवर्षाणि जीवति अश्वयुजत्रयोदश्यां रविवासरे उत्तरफल्गुणनक्षत्रे मृत्युः १२

इति व मीनलग्नम् इति **वराहमिहरोक्तं सूतिकाध्यायं** समाप्तम् ॥ शुभं.

३३९९.

३२१३. अश्वायुर्वेदसारसंग्रहः । वाहाडः.

AS'VÂYURVEDASÂRASAṀGRAHA, by VÂHÂḌA.

Beginning: श्रीगणेशाय नमः ॥ ॥

ये देवि दुग्ध[र्धे]रकृतान्तमुखांतरस्था ये कालि कालघनपाशनितांतबद्धाः[द्धाः] ॥
ये चंडि चंडगुरुकल्मषसिंधुमग्नास्तान्पासि मोचयसि तारयसि स्मृता त्वं ॥ १ ॥
सा श्रीः करोत्वभिमतानि यदीयसव्यपाणौ सरोरुहभुवो गलिताश्रुबीजात् ॥
चित्रं बभूव हरिवृंदमनंतरूपमाश्रुक्षतो हुतवहं वडवाश्च वामे ॥ २ ॥
योश्वैरनूरुसहितो रथचक्रमेकमध्यासितं समधिरुह्य निरस्तदोषः ॥
निर्गछति ह्यपरिमेयमिदं खमर्को विद्राविताऽन्यगतिरस्तु स वो जयाय ॥ ३ ॥
ध्यात्वा गणाधिपमनंतरमंतरायकंदच्छिदं भगवतीमनु वाचमेकां ॥
संवित्समुद्रमुनिसत्तमशालिहोत्रप्राप्तान्यतो विरचयामि चिकित्सितानि ॥ ४ ॥
श्रीशालिहोत्रकृतशास्त्रसमुद्रमध्याद्धृत्य रत्ननिचयानिव शुद्धयोगात् ॥
आविष्करोमि सनिदानचिकित्सितानामेकावलीमतिकुतूहलिकंठयोग्यां ॥ ५ ॥
इछन्नऽथोत्तमहर्षिकृतेन गंतुं दुर्बोधयुक्तिविषमेण मनुष्यमात्रः ॥
मोहादहं जडमतिर्भविता जनस्य हासाय काक इव हंसगतिप्रपित्सुः ॥ ६ ॥

End: इति **किशोरसर्प्पदष्टचिकित्सा** ॥ इति **श्रीविक्रमात्मजवाहाडविरचितेऽश्वायुर्वेद किशोरचिकित्साधिकारः** समाप्तः ॥ ७७ ॥

३४४३.

३१४०. चिकित्सादर्पणः.

CHIKITSÂDARPAṆA.

श्रीदुर्गायै नमः ॥

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितं लिख्यते श्रीमता ग्रन्थश्चिकित्सादर्पणाभिधा ॥

श्रीदुर्गे प्रसीदः ॥ वैद्यनाथादिसर्व्वेभ्यो देवेभ्यो नमः

जीह्वा पीता खरस्पर्शा स्फुटिता मारुतेधिके ॥ रक्तास्या वा भवेत् पीत्ते कफे शुभ्रा द्रवा घना ॥ १ ॥
कृष्णा सकष्टदा जीह्वा सन्निपाताधिके तु सा मिश्रिते मिश्रिता ज्ञेया विष्णे रक्तविवर्जिता ॥

इति जीह्वापपरीक्षणं ॥

Fol. 26: *iti s'rîchikitsâdarpaṇe jâraṇâdhikârah*; fol. 36: *iti shaḍvidhajvarachikîtsâdhikârah.* Similar colophons at the end of other Chapters.

Fol. 311. The MS. breaks off with:

शिता चन्दनकाशीशं चूर्णं मधुसमन्वितं   प्रतिद्यात् प्रातरुत्थाय गरदोषविनाशनं
काशीश------ ॥० पारदं गन्धकं तुत्थं टंकणं रजनीसमं
देवदाल्या विसैर्म्मर्यं दिनं निष्कमेकन्तु दापयेत् एष। कालरसो------: सर्व्वविषापहः
नरमूत्रं पिवेच्चातु कालदष्टोपि जीवति ॥

ॐ सप्तकुलाय नमः सप्तये स्वाहा अनेन मं….

३४४५.

३२५९. चिकित्सार्णवसंहिता । लोहटः.

CHIKITSÂRṆAVASAṀHITÂ, by LOHAṬA.

The first leaf of the MS. is lost. It begins:

Fol. 2: विण्मूत्ररक्तता तृट् वलक्षयः । स्वेदो दाहश्च छर्दि मूर्छा च जायते
सन्नि तंद्रालस्यप्रतिश्यायछर्धरुच्यग्निमार्दवं ॥ मध्यपित्ते कफोद्रिक्ते लक्षणं हीनमारुते ।
दाहो रुचिर्भ्रमस्तृष्णा पीतविण्मूत्रतापि च । मध्यश्लेष्मणि पित्ताढ्ये लक्षणं स्वल्पमारुते ।
प्रलापो गौरवं तंद्रा शीतं च शिरसोतिरुक् । मध्येनिले हीनपित्ते लिंगमेतत्कफाधिके ।

Fol: 6. *iti s'rîlohaṭavirachitâyâṁ ariṇasaṁhitâyâṁ sannipâtâdhyâya*; fol. 10 *iti s'rîchikitsârṇavasaṁhitâyâṁ lohaṭakṛitâyâṁ jvaranidânam.* Similar colophons elsewhere.

Fol. 320. The MS. closes:

शीतपित्तश्चुदद्रुं चकोठश्चैवाल्पपित्तकः विसर्पश्च सविस्फोटसरोचैव मसूरिका
क्षुद्रास्यकर्णनासाद्दक् शिरस्त्री-लकामयाः चि-चेत्ययंमुद्देशा रुग्विनिश्चयसंग्रहाः
चिकित्सार्णवशास्त्रेस्मिंश्चिकित्साभूरिसंग्रहः कृतः **श्रीपद्मपुत्रेण लोहटेन** यथार्थिना
इतीह निष्पादितदेहमुत्तमसुखावहा लोकयशोर्थिता भिषक्
भवे ….

३४४६.

३११८. चिकित्सासारः । क्षेमंकरमिश्रः.

CHIKITSÂSÂRA, by KSHEMAṀKARA MIS'RA.

Beginning: ॐ श्रीगणेशाय नमः

ॐ कमलया कलितं कमलापतिं मिलितमंबिकया शशिशेखरम्
सुरवरोपनुतां च विधेः सुतां गणपतिं हतविघ्नततिं भजे
प्रसमीक्ष्य सिद्धयोगान्मुन्यनुभूताश्च ये बहुशः लिखति **चिकित्सासारे** ग्रंथे **क्षेमंकरं** सततं

अथ परिभाषा

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया

